# 3 Shrimaddevibhagavatamahapurane Tritiyah Skandhah

# ૩ શ્રીમદ્દેવીભાગવતમહાપુરાણે તૃતીયઃ સ્કન્ધઃ

## Document Information


Text title : Devi Bhagavata Mahapurana Skandha 03

File name : devIbhAgavatam03.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


March 31, 2024

*sanskritdocuments.org*

# 3 Shrimaddevibhagavatamahapurane Tritiyah Skandhah

# ૩ શ્રીમદ્દેવીભાગવતમહાપુરાણે તૃતીયઃ સ્કન્ધઃ

## ૩.૧ પ્રથમોઽધ્યાયઃ । ભુવનેશ્વરીવર્ણનમ્ ।

જનમેજય ઉવાચ -
ભગવન્ ભવતા પ્રોક્તં યજ્ઞમમ્બાભિધં મહત્ ।
સા કા કથં સમુત્પન્ના કુત્ર કસ્માચ્ચ કિઙ્ગુણા ॥ ૧॥

કીદૃશશ્ચ મખસ્તસ્યાઃ સ્વરૂપં કીદૃશં તથા ।
વિધાનં વિધિવદ્બ્રૂહિ સર્વજ્ઞોઽસિ દયાનિધે ॥ ૨॥

બ્રહ્માણ્ડસ્ય તથોત્પત્તિં વદ વિસ્તરતસ્તથા ।
યથોક્તં યાદૃશં બ્રહ્મન્નખિલં વેત્સિ ભૂસુર ॥ ૩॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ત્રયો દેવા મયા શ્રુતાઃ ।
સૃષ્ટિપાલનસંહારકારકાઃ સગુણાસ્ત્વમી ॥ ૪॥

સ્વતન્ત્રાસ્તે મહાત્માનઃ પારાશર્ય વદસ્વ મે ।
આહોસ્વિત્પરતન્ત્રાસ્તે શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ॥ ૫॥

મૃત્યુધર્માશ્ચ તે નો વા સચ્ચિદાનન્દરૂપિણઃ ।
અધિભૂતાદિભિર્યુક્તા ન વા દુઃખૈસ્ત્રિધાત્મકૈઃ ॥ ૬॥

કાલસ્ય વશગા નો વા તે સુરેન્દ્રા મહાબલાઃ ।
કથં તે વૈ સમુત્પન્ના કસ્માદિતિ ચ સંશયઃ ॥ ૭॥

હર્ષશોકયુતાસ્તે વૈ નિદ્રાલસ્યસમન્વિતાઃ ।
સપ્તધાતુમયાસ્તેષાં દેહાઃ કિં વાન્યથા મુને ॥ ૮॥

કૈર્દ્રવ્યૈર્નિર્મિતાસ્તે વૈ કૈર્ગુણૈરિન્દ્રિયૈસ્તથા ।
ભોગશ્ચ કીદૃશસ્તેષાં પ્રમાણમાયુષસ્તથા ॥ ૯॥

નિવાસસ્થાનમપ્યેષાં વિભૂતિં ચ વદસ્વ મે ।
શ્રોતુમિચ્છામ્યહં બ્રહ્મન્ વિસ્તરેણ કથામિમામ્ ॥ ૧૦॥

વ્યાસ ઉવાચ -
દુર્ગમઃ પ્રશ્નભારોઽયં કૃતો રાજંસ્ત્વયાઽધુના ।
બ્રહ્માદીનાં સમુત્પત્તિઃ કસ્માદિતિ મહામતે ॥ ૧૧॥

એતદેવ મયા પૂર્વં પૃષ્ટોઽસૌ નારદો મુનિઃ ।
વિસ્મિતઃ પ્રત્યુવાચેદમુત્થિતઃ શ૱ૃણુ ભૂપતે ॥ ૧૨॥

કસ્મિંશ્ચ સમયે ચાહં ગઙ્ગાતીરે સ્થિતં મુનિમ્ ।
અપશ્યં નારદં શાન્તં સર્વજ્ઞં વેદવિત્તમમ્ ॥ ૧૩॥

દૃષ્ટ્વાહં મુદિતો ભૂત્વા પાદયોરપતં મુનેઃ ।
તેજાજ્ઞમઃ સમીપેઽસ્ય સંવિષ્ટશ્ચ વરાસને ॥ ૧૪॥

શ્રુત્વા કુશલવાર્તાં વૈ તમપૃચ્છં વિધેઃ સુતમ્ ।
નિર્વિષ્ટં જાહ્નવીતીરે નિર્જને સૂક્ષ્મવાલુકે ॥ ૧૫॥

મુનેઽતિવિતતસ્યાસ્ય બ્રહ્માણ્ડસ્ય મહામતે ।
કઃ કર્તા પરમઃ પ્રોક્તસ્તન્મે બ્રૂહિ વિધાનતઃ ॥ ૧૬॥

કસ્માદેતત્સમુત્પન્નં બ્રહ્માણ્ડં મુનિસત્તમ ।
અનિત્યં વા તથા નિત્યં તદાચક્ષ્વ દ્વિજોત્તમ ॥ ૧૭॥

એકકર્તૃકમેતદ્વા બહુકર્તૃકમન્યથા ।
અકર્તૃકં ન કાર્યં સ્યાદ્વિરોધોઽયં વિભાતિ મે ॥ ૧૮॥

ઇતિ સન્દેહસન્દોહે મગ્નં માં તારયાધુના ।
વિકલ્પકોટીઃ કુર્વાણં સંસારેઽસ્મિન્ પ્રવિસ્તરે ॥ ૧૯॥

બ્રુવન્તિ શઙ્કરં કેચિન્મત્વા કારણકારણમ્ ।
સદાશિવં મહાદેવં પ્રલયોત્પત્તિવર્જિતમ્ ॥ ૨૦॥

આત્મારામં સુરેશં ચ ત્રિગુણં નિર્મલં હરમ્ ।
સંસારતારકં નિત્યં સૃષ્ટિસ્થિત્યન્તકારણમ્ ॥ ૨૧॥

અન્યે વિષ્ણું સ્તુવન્ત્યેનં સર્વેષાં પ્રભુમીશ્વરમ્ ।
પરમાત્માનમવ્યક્તં સર્વશક્તિસમન્વિતમ્ ॥ ૨૨॥

ભુક્તિદં મુક્તિદં શાન્તં સર્વાદિં સર્વતોમુખમ્ ।
વ્યાપકં વિશ્વશરણમનાદિનિધનં હરિમ્ ॥ ૨૩॥

ધાતારં ચ તથા ચાન્યે બ્રુવન્તિ સૃષ્ટિકારણમ્ ।

તમેવ સર્વવેત્તારં સર્વભૂતપ્રવર્તકમ્ ॥ ૨૪॥

ચતુર્મુખં સુરેશાનં નાભિપદ્મભવં વિભુમ્ ।
સ્રષ્ટારં સર્વલોકાનાં સત્યલોકનિવાસિનમ્ ॥ ૨૫॥

દિનેશં પ્રવદન્ત્યન્યે સર્વેશં વેદવાદિનઃ ।
સ્તુવન્તિ ચૈવ ગાયન્તિ સાયં પ્રાતરતન્દ્રિતાઃ ॥ ૨૬॥

યજન્તિ ચ તથા યજ્ઞે વાસવં ચ શતક્રતુમ્ ।
સહસ્રાક્ષં દેવદેવં સર્વેષાં પ્રભુમુલ્બણમ્ ॥ ૨૭॥

યજ્ઞાધીશં સુરાધીશં ત્રિલોકેશં શચીપતિમ્ ।
યજ્ઞાનાં ચૈવ ભોક્તારં સોમપં સોમપપ્રિયમ્ ॥ ૨૮॥

વરુણં ચ તથા સોમં પાવકં પવનં તથા ।
યમં કુબેરં ધનદં ગણાધીશં તથાપરે ॥ ૨૯॥

હેરમ્બં ગજવક્ત્રં ચ સર્વકાર્યપ્રસાધકમ્ ।
સ્મરણાત્સિદ્ધિદં કામં કામદં કામગં પરમ્ ॥ ૩૦॥

ભવાનીં કેચનાચાર્યાઃ પ્રવદન્ત્યખિલાર્થદામ્ ।
આદિમાયાં મહાશક્તિં પ્રકૃતિં પુરુષાનુગામ્ ॥ ૩૧॥

બ્રહ્મૈકતાસમાપન્નાં સૃષ્ટિસ્થિત્યન્તકારિણીમ્ ।
માતરં સર્વભૂતાનાં દેવતાનાં તથૈવ ચ ॥ ૩૨॥

અનાદિનિધનાં પૂર્ણાં વ્યાપિકાં સર્વજન્તુષુ ।
ઈશ્વરીં સર્વલોકાનાં નિર્ગુણાં સગુણાં શિવામ્ ॥ ૩૩॥

વૈષ્ણવીં શાઙ્કરીં બ્રાહ્મીં વાસવીં વારુણીં તથા ।
વારાહીં નારસિંહીં ચ મહાલક્ષ્મીં તથાદ્ભુતામ્ ॥ ૩૪॥

વેદમાતરમેકાં ચ વિદ્યાં ભવતરોઃ સ્થિરામ્ ।
સર્વદુઃખનિહન્ત્રીં ચ સ્મરણાત્સર્વકામદામ્ ॥ ૩૫॥

મોક્ષદાં ચ મુમુક્ષૂણાં કામદાં ચ ફલાર્થિનામ્ ।
ત્રિગુણાતીતરૂપાં ચ ગુણવિસ્તારકારકામ્ ॥ ૩૬॥

નિર્ગુણાં સગુણાં તસ્માત્તાં ધ્યાયન્તિ ફલાર્થિનઃ ।
નિરઞ્જનં નિરાકારં નિર્લેપં નિર્ગુણં કિલ ॥ ૩૭॥

અરૂપં વ્યાપકં બ્રહ્મ પ્રવદન્તિ મુનીશ્વરાઃ ।
વેદોપનિષદિ પ્રોક્તસ્તેજોમય ઇતિ ક્વચિત્ ॥ ૩૮॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રનયનસ્તથા ।
સહસ્રકરકર્ણશ્ચ સહસ્રાસ્યઃ સહસ્રપાત્ ॥ ૩૯॥

વિષ્ણોઃ પાદમથાકાશં પરમં સમુદાહૃતમ્ ।
વિરાજં વિરજં શાન્તં પ્રવદન્તિ મનીષિણઃ ॥ ૪૦॥

પુરુષોત્તમં તથા ચાન્યે પ્રવદન્તિ પુરાવિદઃ ।
નૈકોઽપીતિ વદન્ત્યન્યે પ્રભુરીશઃ કદાચન ॥ ૪૧॥

અનીશ્વરમિદં સર્વં બ્રહ્માણ્ડમિતિ કેચન ।
ન કદાપીશજન્યં યજ્જગદેતદચિન્તિતમ્ ॥ ૪૨॥

સદૈવેદમનીશં ચ સ્વભાવોત્થં સદેદૃશમ્ ।
અકર્તાસૌ પુમાન્પ્રોક્તઃ પ્રકૃતિસ્તુ તથા ચ સા ॥ ૪૩॥

એવં વદન્તિ સાઙ્ખ્યાશ્ચ મુનયઃ કપિલાદયઃ ।
એતે સન્દેહસન્દોહાઃ પ્રભવન્તિ તથાઽપરે ॥ ૪૪॥

વિકલ્પોપહતં ચેતઃ કિં કરોમિ મુનીશ્વર ।
ધર્માધર્મવિવક્ષાયાં ન મનો મે સ્થિરં ભવેત્ ॥ ૪૫॥

કો ધર્મઃ કીદૃશોઽધર્મશ્ચિહ્નં નૈવોપલભ્યતે ।
દેવાઃ સત્ત્વગુણોત્પન્નાઃ સત્યધર્મવ્યવસ્થિતાઃ ॥ ૪૬॥

પીડ્યન્તે દાનવૈઃ પાપૈઃ કુત્ર ધર્મવ્યવસ્થિતિઃ ।
ધર્મસ્થિતાઃ સદાચારાઃ પાણ્ડવા મમ વંશજાઃ ॥ ૪૭॥

દુઃખં બહુવિધં પ્રાપ્તાસ્તત્ર ધર્મસ્ય કા સ્થિતિઃ ।
અતો મે હૃદયં તાત વેપતેઽતીવ સંશયે ॥ ૪૮॥

કુરુ મેઽસંશયં ચેતઃ સમર્થોઽસિ મહામુને ।
ત્રાહિ સંસારવાર્ધેસ્ત્વં જ્ઞાનપોતેન માં મુને ॥ ૪૯॥

મજ્જન્તં ચોત્પતન્તં ચ મગ્નં મોહજલાવિલે ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે ભુવનેશ્વરીવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૩.૧॥

## ૩.૨ દ્વિતીયોઽધ્યાયઃ । બ્રહ્માદીનાઙ્ગતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
યત્ત્વયા ચ મહાબાહો પૃષ્ટોઽહં કુરુસત્તમ ।
તાન્પ્રશ્નાન્નારદઃ પ્રાહ મયા પૃષ્ટો મુનીશ્વરઃ ॥ ૧॥

નારદ ઉવાચ ।
વ્યાસ કિં તે બ્રવીમ્યદ્ય પુરાઽયં સંશયો મમ ।
ઉત્પન્નો હૃદયેઽત્યર્થં સન્દેહાસારપીડિતઃ ॥ ૨॥

ગત્વાઽહં પિતરં સ્થાને બ્રહ્માણમમિતૌજસમ્ ।
અપૃચ્છં યત્ત્વયા પૃષ્ટં વ્યાસાદ્ય પ્રશ્નમુત્તમમ્ ॥ ૩॥

પિતઃ કુતઃ સમુત્પન્નં બ્રહ્માણ્ડમખિલં વિભો ।
ભવત્કૃતેન વા સમ્યક્ કિં વા વિષ્ણુકૃતં ત્વિદમ્ ॥ ૪॥

રુદ્રકૃતં વા વિશ્વાત્મન્ બ્રૂહિ સત્યં જગત્પતે ।
આરાધનીયઃ કઃ કામં સર્વોત્કૃષ્ટશ્ચ કઃ પ્રભુઃ ॥ ૫॥

તત્સર્વં વદ મે બ્રહ્મન્સન્દેહાંશ્છિન્ધિ ચાનઘ ।
નિમગ્નો હ્યસ્મિ સંસારે દુઃખરૂપેઽનૃતોપમે ॥ ૬॥

સન્દેહાન્દોલિતં ચેતો ન પ્રશામ્યતિ કુત્રચિત્ ।
ન તીર્થેષુ ન દેવેષુ સાધનેષ્વિતરેષુ ચ ॥ ૭॥

અવિજ્ઞાય પરં તત્ત્વં કુતઃ શાન્તિઃ પરન્તપ ।
વિકીર્ણં બહુધા ચિત્તં નૈકત્ર સ્થિરતાં વ્રજેત્ ॥ ૮॥

કં સ્મરામિ યજે કં વા કં વ્રજામ્યર્ચયામિ કમ્ ।
સ્તૌમિ કં નાભિજાનામિ દેવ સર્વેશ્વરેશ્વરમ્ ॥ ૯॥

તતો માં પ્રત્યુવાચેદં બ્રહ્મા લોકપિતામહઃ ।
મયા સત્યવતીસૂનો કૃતે પ્રશ્ને સુદુસ્તરે ॥ ૧૦॥

બ્રહ્મોવાચ ।
કિં બ્રવીમિ સુતાદ્યાહં દુર્બોધં પ્રશ્નમુત્તમમ્ ।
ત્વયાશક્યં મહાભાગ વિષ્ણોરપિ સુનિશ્ચયાત્ ॥ ૧૧॥

રાગી કોઽપિ ન જાનાતિ સંસારેઽસ્મિન્મહામતે ।

વિરક્તશ્ચ વિજાનાતિ નિરીહો યો વિમત્સરઃ ॥ ૧૨॥

એકાર્ણવે પુરા જાતે નષ્ટે સ્થાવરજઙ્ગમે
ભૂતમાત્રે સમુત્પન્ને સઞ્જજ્ઞે કમલાદહમ્ ॥ ૧૩॥

નાપશ્યં તરણિં સોમં ન વૃક્ષાન્ન ચ પર્વતાન્ ।
કર્ણિકાયાં સમાવિષ્ટશ્ચિન્તામકરવં તદા ॥ ૧૪॥

કસ્માદહં સમુદ્ભૂતઃ સલિલેઽસ્મિન્મહાર્ણવે ।
કો મે ત્રાતા પ્રભુઃ કર્તા સંહર્તા વા યુગાત્યયે ॥ ૧૫॥

ન ચ ભૂર્વિદ્યતે સ્પષ્ટા યદાધારં જલં ત્વિદમ્ ।
પઙ્કજં કથમુત્પન્નં પ્રસિદ્ધં રૂઢિયોગયોઃ ॥ ૧૬॥

પશ્યામ્યદ્યાસ્ય પઙ્કં તં મૂલં વૈ પઙ્કજસ્ય ચ ।
ભવિષ્યતિ ધરા તત્ર મૂલં નાસ્ત્યત્ર સંશયઃ ॥ ૧૭॥

ઉત્તરન્સલિલે તત્ર યાવદ્વર્ષસહસ્રકમ્ ।
અન્વેષમાણો ધરણીં નાવાપ તાં યદા તદા ॥ ૧૮॥

તપસ્તપેતિ ચાકાશે વાગભૂદશરીરિણી ।
તતો મયા તપસ્તમં પદ્મે વર્ષસહસ્રકમ્ ॥ ૧૯॥

સૃજેતિ પુનરુદ્ભૂતા વાણી તત્ર શ્રુતા મયા ।
વિમૂઢોઽહં તદાકર્ણ્ય કં સૃજામિ કરોમિ કિમ્ ॥ ૨૦॥

તદા દૈત્યાવપિ પ્રાપ્તૌ દારુણૌ મધુકૈટભૌ ।
તાભ્યાં વિભીષિતશ્ચાહં યુદ્ધાય મકરાલયે ॥ ૨૧॥

તતોઽહં નાલમાલમ્બ્ય વારિમધ્યમવાતરમ્ ।
તદા તત્ર મયા દૃષ્ટઃ પુરુષઃ પરમાદ્ભુતઃ ॥ ૨૨॥

મેઘશ્યામશરીરસ્તુ પીતવાસાશ્ચતુર્ભુજઃ ।
શેષશાયી જગન્નાથો વનમાલાવિભૂષિતઃ ॥ ૨૩॥

શઙ્ખચક્રગદાપદ્માદ્યાયુધૈઃ સુવિરાજિતઃ ।
તમદ્રાક્ષં મહાવિષ્ણું શેષપર્યઙ્કશાયિનમ્ ॥ ૨૪॥

યોગનિદ્રાસમાક્રાન્તમવિસ્પન્દિનમચ્યુતમ્ ।
શયાનં તં સમાલોક્ય ભોગિભોગોપરિ સ્થિતમ્ ॥ ૨૫॥

ચિન્તા મમાદ્ભુતા જાતા કિં કરોમીતિ નારદ ।
મયા સ્મૃતા તદા દેવી સ્તુતા નિદ્રાસ્વરૂપિણી ॥ ૨૬॥

દેહાન્નિર્ગત્ય સા દેવી ગગને સંસ્થિતા શિવા ।
અવિતર્ક્યશરીરા સા દિવ્યાભરણમણ્ડિતા ॥ ૨૭॥

વિષ્ણોર્દેહં વિહાયાશુ વિરરાજ નભઃસ્થિતા ।
ઉદતિષ્ઠદમેયાત્મા તયા મુક્તો જનાર્દનઃ ॥ ૨૮॥

પઞ્ચવર્ષસહસ્રાણિ કૃતવાન્ યુદ્ધમુત્તમમ્ ।
તદા વિલોકિતૌ દૈત્યૌ હરિણા વિનિપાતિતૌ ॥ ૨૯॥

ઉત્સઙ્ગં વિમલં કૃત્વા તત્રૈવ નિહતૌ ચ તૌ ।
રુદ્રસ્તત્રૈવ સમ્પ્રાપ્તો યત્રાવાં સંસ્થિતાવુભૌ ॥ ૩૦॥

ત્રિભિઃ સંવીક્ષિતાસ્માભિઃ સ્વસ્થા દેવી મનોહરા ।
સંસ્તુતા પરમા શક્તિરુવાચાસ્માનવસ્થિતાન્ ॥ ૩૧॥

કૃપાવલોકનૈઃ કૃત્વા પાવનૈર્મુદિતાનથ ।
દેવ્યુવાચ ।
કાજેશાઃ સ્વાનિ કાર્યાણિ કુરુધ્વં સમતન્દ્રિતાઃ ॥ ૩૨॥

સૃષ્ટિસ્થિતિવિશિષ્ટાનિ હતાવેતૌ મહાસુરૌ ।
કૃત્વા સ્વાનિ નિકેતાનિ વસધ્વં વિગતજ્વરાઃ ॥ ૩૩॥

પ્રજાશ્ચતુર્વિધાઃ સર્વાઃ સૃજધ્વં સ્વવિભૂતિભિઃ ।
બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તસ્યાઃ પેશલં સુખદં મૃદુ ॥ ૩૪॥

અબ્રૂમ તામશક્તિઃ સ્મઃ કથં કુર્મસ્ત્વિમાઃ પ્રજાઃ ।
ન મહી વિતતા માતઃ સર્વત્ર વિતતં જલમ્ ॥ ૩૫॥

ન ભૂતાનિ ગુણાશ્ચાપિ તન્માત્રાણીન્દ્રિયાણિ ચ ।
તદાકર્ણ્ય વચોઽસ્માકં શિવા જાતા સ્મિતાનના ॥ ૩૬॥

ઝટિત્યેવાગતં તત્ર વિમાનં ગગનાચ્છુભમ્ ।
સોવાચાસ્મિન્સુરાઃ કામં વિશધ્વં ગતસાધ્વસાઃ ॥ ૩૭॥

વિમાને બ્રહ્મવિષ્ણ્વીશા દર્શયામ્યદ્ય ચાદ્ભુતમ્ ।
તન્નિશમ્ય વચસ્તસ્યા ઓમિત્યુક્ત્વા પુનર્વયમ્ ॥ ૩૮॥

સમારુહ્યોપવિષ્ટાઃ સ્મો વિમાને રત્નમણ્ડિતે ।
મુક્તાદામસુસંવીતે કિઙ્કિણીજાલશબ્દિતે ॥ ૩૯॥

સુરસદ્મનિભે રમ્યે ત્રયસ્તત્રાવિશઙ્કિતાઃ ।
સોપવિષ્ટાંસ્તતો દૃષ્ટ્વા દેવ્યસ્માન્વિજિતેન્દ્રિયાન્ ॥ ૪૦॥

સ્વશક્ત્યા તદ્વિમાનં વૈ નોદયામાસ ચામ્બરે ॥ ૪૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે બ્રહ્માદીનાઙ્ગતિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૩.૨॥

## ૩.૩ તૃતીયોઽધ્યાયઃ । વિમાનસ્થૈર્હરાદિભિર્દેવીદર્શનમ્ ।

બ્રહ્મોવાચ ।
વિમાનં તન્મનોવેગં યત્ર સ્થાનાન્તરે ગતમ્ ।
ન જલં તત્ર પશ્યામો વિસ્મિતાઃ સ્મો વયં તદા ॥ ૧॥

વૃક્ષાઃ સર્વફલા રમ્યાઃ કોકિલારાવમણ્ડિતાઃ ।
મહી મહીધરાઃ કામં વનાન્યુપવનાનિ ચ ॥ ૨॥

નાર્યશ્ચ પુરુષાશ્ચૈવ પશવશ્ચ સરિદ્વરાઃ ।
વાપ્યઃ કૂપાસ્તડાગાશ્ચ પલ્વલાનિ ચ નિર્ઝરાઃ ॥ ૩॥

પુરતો નગરં રમ્યં દિવ્યપ્રાકારમણ્ડિતમ્ ।
યજ્ઞશાલાસમાયુક્તં નાનાહર્મ્યવિરાજિતમ્ ॥ ૪॥

પ્રત્યભિજ્ઞા તદા જાતાપ્યસ્માકં પ્રેક્ષ્ય તત્પુરમ્ ।
સ્વર્ગોઽયમિતિ કેનાસૌ નિર્મિતોસ્તિ તદાદ્ભુતમ્ ॥ ૫॥

રાજાનં દેવસઙ્કાશં વ્રજન્તં મૃગયાં વને ।
અસ્માભિઃ સંસ્થિતા દૃષ્ટા વિમાનોપરિ ચામ્બિકા ॥ ૬॥

ક્ષણાચ્ચચાલ ગગને વિમાનં પવનેરિતમ્ ।
મુહૂર્તાદ્વા તતઃ પ્રાપ્તં દેશે ચાન્યે મનોહરે ॥ ૭॥

નન્દનં ચ વનં તત્ર દૃષ્ટમસ્માભિરુત્તમમ્ ।
પારિજાતતરુચ્છાયાસંશ્રિતા સુરભિઃ સ્થિતા ॥ ૮॥

ચતુર્દન્તો ગજસ્તસ્યાઃ સમીપે સમવસ્થિતઃ ।
અપ્સરસાં તત્ર વૃન્દાનિ મેનકાપ્રભૃતીનિ ચ ॥ ૯॥

ક્રીડન્તિ વિવિધૈર્ભાવૈર્ગાનનૃત્યસમન્વિતૈઃ ।
ગન્ધર્વાઃ શતશસ્તત્ર યક્ષા વિદ્યાધરાસ્તથા ॥ ૧૦॥

મન્દારવાટિકામધ્યે ગાયન્તિ ચ રમન્તિ ચ
દૃષ્ટઃ શતક્રતુસ્તત્ર પૌલોમ્યા સહિતઃ પ્રભુઃ ॥ ૧૧॥

વયં તુ વિસ્મિતાશ્ચાસ્મ દૃષ્ટ્વા ત્રૈવિષ્ટપં તદા ।
યાદઃપતિં કુબેરં ચ યમં સૂર્યં વિભાવસુમ્ ॥ ૧૨॥

વિલોક્ય વિસ્મિતાશ્ચાસ્મ વયં તત્ર સુરાન્સ્થિતાન્ ।
તદા વિનિર્ગતો રાજા પુરાત્તસ્માત્સુમણ્ડિતાત્ ॥ ૧૩॥

દેવરાજ ઇવાક્ષોભ્યો નરવાહ્યાવનૌ સ્થિતઃ ।
વિમાનસ્થા વયં તચ્ચ ચચાલ તરસાગતમ્ ॥ ૧૪॥

બ્રહ્મલોકં તદા દિવ્યં સર્વદેવનમસ્કૃતમ્ ।
તત્ર બ્રહ્માણમાલોક્ય વિસ્મિતૌ હરકેશવૌ ॥ ૧૫॥

સભાયાં તત્ર વેદાશ્ચ સર્વે સાઙ્ગાઃ સ્વરૂપિણઃ ।
સાગરાઃ સરિતશ્ચૈવ પર્વતાઃ પન્નગોરગાઃ ॥ ૧૬॥

મામૂચતુશ્ચતુર્વક્ત્રઃ કોઽયં બ્રહ્મા સનાતનઃ ।
તાવવોચમહં નૈવ જાને સૃષ્ટિપતિં પતિમ્ ॥ ૧૭॥

કોઽહં કોઽયં કિમર્થં વા ભ્રમોઽયં મમ ચેશ્વરૌ ।
ક્ષણાદથ વિમાનં તચ્ચચાલાશુ મનોજવમ્ ॥ ૧૮॥

કૈલાસશિખરે પ્રાપ્તં રમ્યે યક્ષગણાન્વિતે ।
મન્દારવાટિકારમ્યે કીરકોકિલકૂજિતે ॥ ૧૯॥

વીણામુરજવાદ્યૈશ્ચ નાદિતે સુખદે શિવે ।
યદા પ્રાપ્તં વિમાનં તત્તદૈવ સદનાચ્છુભાત્ ॥ ૨૦॥

નિર્ગતો ભગવાઞ્છમ્ભુર્વૃષારૂઢસ્ત્રિલોચનઃ ।
પઞ્ચાનનો દશભુજઃ કૃતસોમાર્ધશેખરઃ ॥ ૨૧॥

વ્યાઘ્રચર્મપરીધાનો ગજચર્મોત્તરીયકઃ ।
પાર્ષ્ણિરક્ષૌ મહાવીરૌ ગજાનનષડાનનૌ ॥ ૨૨॥

શિવેન સહ પુત્રૌ દ્વૌ વ્રજમાનૌ વિરેજતુઃ ।

નન્દિપ્રભૃતયઃ સર્વે ગણપાશ્ચ વરાશ્ચ તે ॥ ૨૩॥

જયશબ્દં પ્રયુઞ્જાના વ્રજન્તિ શિવપૃષ્ઠગાઃ ।
તં વીક્ષ્ય શઙ્કરં ચાન્યં વિસ્મિતાસ્તત્ર નારદ ॥ ૨૪॥

માતૃભિઃ સંશયાવિષ્ટસ્તત્રાહં ન્ચવસં મુને ।
ક્ષણાત્તસ્માદ્ગિરેઃ શૃઙ્ગાદ્વિમાનં વાતરંહસા ॥ ૨૫॥

વૈકુણ્ઠસદનં પ્રાપ્તં રમારમણમન્દિરમ્ ।
અસમ્ભાવ્યા વિભૂતિશ્ચ તત્ર દૃષ્ટા મયા સુત ॥ ૨૬॥

વિસિષ્મિયે તદા વિષ્ણુર્દૃષ્ટ્વા તત્પુરમુત્તમમ્ ।
સદનાગ્રે યયૌ તાવદ્ધરિઃ કમલલોચનઃ ॥ ૨૭॥

અતસીકુસુમાભાસઃ પીતવાસાશ્ચતુર્ભુજઃ ।
દ્વિજરાજાધિરૂઢશ્ચ દિવ્યાભરણભૂષિતઃ ॥ ૨૮॥

વીજ્યમાનસ્તદા લક્ષ્મ્યા કામિન્યા ચામરૈઃ શુભૈઃ ।
તં વીક્ષ્ય વિસ્મિતાઃ સર્વે વયં વિષ્ણું સનાતનમ્ ॥ ૨૯॥

પરસ્પરં નિરીક્ષન્તઃ સ્થિતાસ્તસ્મિન્ વરાસને ।
તતશ્ચચાલ તરસા વિમાનં વાતરંહસા ॥ ૩૦॥

સુધાસમુદ્રઃ સમ્પ્રાપ્તૌ મિષ્ટવારિમહોર્મિમાન્ ।
યાદોગણસમાકીર્ણશ્ચલદ્વીચિવિરાજિતઃ ॥ ૩૧॥

મન્દારપારિજાતાદ્યૈઃ પાદપૈરતિશોભિતઃ ।
નાનાસ્તરણસંયુક્તો નાનાચિત્રવિચિત્રિતઃ ॥ ૩૨॥

મુક્તાદામપરિક્લિષ્ટો નાનાદામવિરાજિતઃ ।
અશોકબકુલાખ્યૈશ્ચ વૃક્ષૈઃ કુરુબકાદિભિઃ ॥ ૩૩॥

સંવૃતઃ સર્વતઃ સૌમ્યૈઃ કેતકીચમ્પકૈર્વૃતઃ ।
કોકિલારાવસઙ્ઘુષ્ટો દિવ્યગન્ધસમન્વિતઃ ॥ ૩૪॥

દ્વિરેફાતિરણત્કારૈરઞ્જિતઃ પરમાદ્ભુતઃ ।
તસ્મિન્દ્વીપે શિવાકારઃ પર્યઙ્કઃ સુમનોહરઃ ॥ ૩૫॥

રત્નાલિખચિતોઽત્યર્થં નાનારત્નવિરાજિતઃ ।
દૃષ્ટોઽસ્માભિર્વિમાનસ્થૈર્દૂરતઃ પરિમણ્ડિતઃ ॥ ૩૬॥

નાનાસ્તરણસઞ્છન્ન ઇન્દ્રચાપસમન્વિતઃ ।
પર્યઙ્કપ્રવરે તસ્મિન્નુપવિષ્ટા વરાઙ્ગના ॥ ૩૭॥

રક્તમાલ્યામ્બરધરા રક્તગન્ધાનુલેપના ।
સુરક્તનયના કાન્તા વિદ્યુત્કોટિસમપ્રભા ॥ ૩૮॥

સુચારુવદના રક્તદન્તચ્છદવિરાજિતા ।
રમાકોટ્યધિકા કાન્ત્યા સૂર્યબિમ્બનિભાખિલા ॥ ૩૯॥

વરપાશાઙ્કુશાભીષ્ટધરા શ્રીભુવનેશ્વરી ।
અદૃષ્ટપૂર્વા દૃષ્ટા સા સુન્દરી સ્મિતભૂષણા ॥ ૪૦॥

હ્રીઙ્કારજપનિષ્ઠૈસ્તુ પક્ષિવૃન્દૈર્નિષેવિતા ।
અરુણા કરુણામૂર્તિઃ કુમારી નવયૌવના ॥ ૪૧॥

સર્વશ‍ૃઙ્ગારવેષાઢ્યા મન્દસ્મિતમુખામ્બુજા ।
ઉદ્યત્પીનકુચદ્વન્દ્વનિર્જિતામ્ભોજકુડ્મલા ॥ ૪૨॥

નાનામણિગણાકીર્ણભૂષણૈરુપશોભિતા ।
કનકાઙ્ગદકેયૂરકિરીટપરિશોભિતા ॥ ૪૩॥

કનકચ્છ્રીચક્રતાટઙ્કવિટઙ્કવદનામ્બુજા ।
હૃલ્લેખા ભુવનેશીતિ નામજાપપરાયણૈઃ ॥ ૪૪॥

સખીવૃન્દૈઃ સ્તુતા નિત્યં ભુવનેશી મહેશ્વરી ।
હૃલ્લેખાદ્યાભિરમરકન્યાભિઃ પરિવેષ્ટિતા ॥ ૪૫॥

અનઙ્ગકુસુમાદ્યાભિર્દેવીભિઃ પરિવેષ્ટિતા ।
દેવી ષટ્કોણમધ્યસ્થા યન્ત્રરાજોપરિ સ્થિતા ॥ ૪૬॥

દૃષ્ટ્વા તાં વિસ્મિતાઃ સર્વે વયં તત્ર સ્થિતાઽભવન્ ।
કેયં કાન્તા ચ કિં નામ ન જાનીમોઽત્ર સંસ્થિતાઃ ॥ ૪૭॥

સહસ્રનયના રામા સહસ્રકરસંયુતા ।
સહસ્રવદના રમ્યા ભાતિ દૂરાદસંશયમ્ ॥ ૪૮॥

નાપ્સરા નાપિ ગન્ધર્વી નેયં દેવાઙ્ગના કિલ ।
ઇતિ સંશયમાપન્નાસ્તત્ર નારદ સંસ્થિતાઃ ॥ ૪૯॥

તદાઽસૌ ભગવાન્વિષ્ણુર્દૃષ્ટ્વા તાં ચારુહાસિનીમ્ ।
ઉવાચામ્બાં સ્વવિજ્ઞાનાત્કૃત્વા મનસિ નિશ્ચયમ્ ॥ ૫૦॥

એષા ભગવતી દેવી સર્વેષાં કારણં હિ નઃ ।
મહાવિદ્યા મહામાયા પૂર્ણા પ્રકૃતિરવ્યયા ॥ ૫૧॥

દુર્જ્ઞેયાઽલ્પધિયાં દેવી યોગગમ્યા દુરાશયા ।
ઇચ્છા પરાત્મનઃ કામં નિત્યાનિત્યસ્વરૂપિણી ॥ ૫૨॥

દુરારાધ્યાઽલ્પભાગ્યૈશ્ચ દેવી વિશ્વેશ્વરી શિવા ।
વેદગર્ભા વિશાલાક્ષી સર્વેષામાદિરીશ્વરી ॥ ૫૩॥

એષા સંહૃત્ય સકલં વિશ્વં ક્રીડતિ સઙ્ક્ષયે ।
લિઙ્ગાનિ સર્વજીવાનાં સ્વશરીરે નિવેશ્ય ચ ॥ ૫૪॥

સર્વબીજમયી હ્યેષા રાજતે સામ્પ્રતં સુરૌ ।
વિભૂતયઃ સ્થિતાઃ પાર્શ્વે પશ્યતાં કોટિશઃ ક્રમાત્ ॥ ૫૫॥

દિવ્યાભરણભૂષાઢ્યા દિવ્યગન્ધાનુલેપનાઃ ।
પરિચર્યાપરાઃ સર્વાઃ પશ્યતાં બ્રહ્મશઙ્કરૌ ॥ ૫૬॥

ધન્યા વયં મહાભાગાઃ કૃતકૃત્યાઃ સ્મ સામ્પ્રતમ્ ।
યદત્ર દર્શનં પ્રાપ્તં ભગવત્યાઃ સ્વયં ત્વિદમ્ ॥ ૫૭॥

તપસ્તપ્તં પુરા યત્નાત્તસ્યેદં ફલમુત્તમમ્ ।
અન્યથા દર્શનં કુત્ર ભવેદસ્માકમાદરાત્ ॥ ૫૮॥

પશ્યન્તિ પુણ્યપુઞ્જા યે યે વદાન્યાસ્તપસ્વિનઃ ।
રાગિણો નૈવ પશ્યન્તિ દેવીં ભગવતીં શિવામ્ ॥ ૫૯॥

મૂલપ્રકૃતિરેવૈષા સદા પુરુષસઙ્ગતા ।
બ્રહ્માણ્ડં દર્શયત્યેષા કૃત્વા વૈ પરમાત્મને ॥ ૬૦॥

દ્રષ્ટાઽસૌ દૃશ્યમખિલં બ્રહ્માણ્ડં દેવતાઃ સુરૌ ।
તસ્યૈષા કારણં સર્વા માયા સર્વેશ્વરી શિવા ॥ ૬૧॥

ક્વાહં વા ક્વ સુરાઃ સર્વે રમ્ભાદ્યાઃ સુરયોષિતઃ ।
લક્ષાંશેન તુલામસ્યા ન ભવામઃ કથઞ્ચન ॥ ૬૨॥

સૈષા વરાઙ્ગના નામ યા વૈ દૃષ્ટા મહાર્ણવે ।
બાલભાવે મહાદેવી દોલયન્તીવ માં મુદા ॥ ૬૩॥

શયનં વટપત્રે ચ પર્યઙ્કે સુસ્થિરે દૃઢે ।

પાદાઙ્ગુષ્ઠં કરે કૃત્વા નિવેશ્ય મુખપઙ્કજે ॥ ૬૪॥

લેલિહન્તઞ્ચ ક્રીડન્તમનેકૈબાલચેષ્ટિતૈઃ ।
રમમાણં કોમલાઙ્ગં વટપત્રપુટે સ્થિતમ્ ॥ ૬૫॥

ગાયન્તી દોલયન્તી ચ બાલભાવાન્મયિ સ્થિતે ।
સેયં સુનિશ્ચિતં જ્ઞાતં જાતં મે દર્શનાદિવ ॥ ૬૬॥

કામં નો જનની સૈષા શ‍ૃણુ તં પ્રવદામ્યહમ્ ।
અનુભૂતં મયા પૂર્વં પ્રત્યભિજ્ઞા સમુત્થિતા ॥ ૬૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે વિમાનસ્થૈર્હરાદિભિર્દેવીદર્શનં નામ તૃતીયોઽધ્યાયઃ ॥ ૩.૩॥

## ૩.૪ ચતુર્થોઽધ્યાયઃ । વિષ્ણુના કૃતં દેવીસ્તોત્રમ્ ।

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ભગવાન્વિષ્ણુઃ પુનરાહ જનાર્દનઃ ।
વયં ગચ્છેમ પાર્શ્વેઽસ્યાઃ પ્રણમન્તઃ પુનઃ પુનઃ ॥ ૧॥

સેયં વરા મહામાયા દાસ્યત્યેષા વરાન્ હિ નઃ ।
સ્તુવામઃ સન્નિધિં પ્રાપ્ય નિર્ભયાશ્ચરણાન્તિકે ॥ ૨॥

યદિ નો વારયિષ્યન્તિ દ્વારસ્થાઃ પરિચારકાઃ ।
પઠિષ્યામશ્ચ તત્રસ્થાઃ સ્તુતિં દેવ્યાઃ સમાહિતાઃ ॥ ૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્તે હરિણા વાક્યે સુપ્રહૃષ્ટૌ સુસંસ્થિતૌ ।
જાતૌ પ્રમુદિતૌ કામં નિકટે ગમનાય ચ ॥ ૪॥

ઓમિત્યુક્ત્વા હરિં સર્વે વિમાનાત્ત્વરિતાસ્ત્રયઃ ।
ઉત્તીર્ય નિર્ગતા દ્વારિ શઙ્કમાના મનસ્યલમ્ ॥ ૫॥

દ્વારસ્થાન્ વીક્ષ્ય તાન્સર્વાન્દેવી ભગવતી તદા ।
સ્મિતં કૃત્વા ચકારાશુ તાંસ્ત્રીન્સ્ત્રીરૂપધારિણઃ ॥ ૬॥

વયં યુવતયો જાતાઃ સુરૂપાશ્ચારુભૂષણાઃ ।
વિસ્મયં પરમં પ્રાપ્તા ગતાસ્તત્સન્નિધિં પુનઃ ॥ ૭॥

સા દૃષ્ટ્વા નઃ સ્થિતાંસ્તત્ર સ્ત્રીરૂપાંશ્ચરણાન્તિકે ।

વ્યલોકયત ચાર્વઙ્ગી પ્રેમસમ્પૂર્ણયા દૃશા ॥ ૮॥

પ્રણમ્ય તાં મહાદેવીં પુરતઃ સંસ્થિતા વયમ્ ।
પરસ્પરં લોકયન્તઃ સ્ત્રીરૂપાશ્ચારુભૂષણાઃ ॥ ૯॥

પાદપીઠં પ્રેક્ષમાણા નાનામણિવિભૂષિતમ્ ।
સૂર્યકોટિપ્રતીકાશં સ્થિતાસ્તત્ર વયં ત્રયઃ ॥ ૧૦॥

કાશ્ચિદ્રક્તામ્બરાસ્તત્ર સહચર્યઃ સહસ્રશઃ ।
કાશ્ચિન્નીલામ્બરા નાર્યસ્તથા પીતામ્બરાઃ શુભાઃ ॥ ૧૧॥

દેવ્યઃ સર્વાઃ શુભાકારા વિચિત્રામ્બરભૂષણાઃ ।
વિરેજુઃ પાર્શ્વતસ્તસ્યાઃ પરિચર્યાપરાઃ કિલ ॥ ૧૨॥

જગુશ્ચ નનૃતુશ્ચાન્યાઃ પર્યુપાસન્ત તાઃ સ્ત્રિયઃ ।
વીણામારુતવાદ્યાનિ વાદયન્તો મુદાન્વિતાઃ ॥ ૧૩॥

શ ૃણુ નારદ વક્ષ્યામિ યદ્દૃષ્ટં તત્ર ચાદ્ભુતમ્ ।
નખદર્પણમધ્યે વૈ દેવ્યાશ્ચરણપઙ્કજે ॥ ૧૪॥

બ્રહ્માણ્ડમખિલં સર્વં તત્ર સ્થાવરજઙ્ગમમ્ ।
અહં વિષ્ણુશ્ચ રુદ્રશ્ચ વાયુરગ્નિર્યમો રવિઃ ॥ ૧૫॥

વરુણઃ શીતગુસ્ત્વષ્ટા કુબેરઃ પાકશાસનઃ ।
પર્વતાઃ સાગરા નદ્યો ગન્ધર્વાપ્સરસસ્તથા ॥ ૧૬॥

વિશ્વાવસુશ્ચિત્રકેતુઃ શ્વેતશ્ચિત્રાઙ્ગદસ્તથા ।
નારદસ્તુમ્બુરુશ્ચૈવ હાહાહૂહૂસ્તથૈવ ચ ॥ ૧૭॥

અશ્વિનૌ વસવઃ સાધ્યાઃ સિદ્ધાશ્ચ પિતરસ્તથા ।
નાગાઃ શેષાદયઃ સર્વે કિન્નરોરગરાક્ષસાઃ ॥ ૧૮॥

વૈકુણ્ઠો બ્રહ્મલોકશ્ચ કૈલાસઃ પર્વતોત્તમઃ ।
સર્વં તદખિલં દૃષ્ટં નખમધ્યસ્થિતં ચ નઃ ॥ ૧૯॥

મજ્જન્મપઙ્કજં તત્ર સ્થિતોઽહં ચતુરાનનઃ ।
શેષશાયી જગન્નાથસ્તથા ચ મધુકૈટભૌ ॥ ૨૦॥

બ્રહ્મોવાચ ।
એવં દૃષ્ટં મયા તત્ર પાદપદ્મનખે સ્થિતમ્ ।
વિસ્મતોઽહં તતો વીક્ષ્ય કિમેતદિતિ શઙ્કિતઃ ॥ ૨૧॥

વિષ્ણુશ્ચ વિસ્મયાવિષ્ટઃ શઙ્કરશ્ચ તથા સ્થિતઃ ।
તાં તદા મેનિરે દેવીં વયં વિશ્વસ્ય માતરમ્ ॥ ૨૨॥

તતો વર્ષશતં પૂર્ણં વ્યતિક્રાન્તં પ્રપશ્યતઃ ।
સુધામયે શિવે દ્વીપે વિહારં વિવિધં તદા ॥ ૨૩॥

સખ્ય ઇવ તદા તત્ર મેનિરેઽસ્માનવસ્થિતાન્ ।
દેવ્યઃ પ્રમુદિતાકારા નાનાભરણમણ્ડિતાઃ ॥ ૨૪॥

વયમપ્યતિરમ્યત્વાદ્બભૂવિમ વિમોહિતાઃ ।
પ્રહૃષ્ટમનસઃ સર્વે પશ્યન્ભાવાન્મનોરમાન્ ॥ ૨૫॥

એકદા તાં મહાદેવીં દેવીં શ્રીભુવનેશ્વરીમ્ ।
તુષ્ટાવ ભગવાન્વિષ્ણુર્યુવતીભાવસંસ્થિતઃ ॥ ૨૬॥

શ્રીભગવાનુવાચ ।
નમો દેવ્યૈ પ્રકૃત્યૈ ચ વિધાત્ર્યૈ સતતં નમઃ ।
કલ્યાણ્યૈ કામદાયૈ ચ વૃદ્ધ્યૈ સિદ્ધ્યૈ નમો નમઃ ॥ ૨૭॥

સચ્ચિદાનન્દરૂપિણ્યૈ સંસારારણયે નમઃ ।
પઞ્ચકૃત્યવિધાત્ર્યૈ તે ભુવનેશ્યૈ નમો નમઃ ॥ ૨૮॥

સર્વાધિષ્ટાનરૂપાયૈ કૂટસ્થાયૈ નમો નમઃ ।
અર્ધમાત્રાર્થભૂતાયૈ હૃલ્લેખાયૈ નમો નમઃ ॥ ૨૯॥

જ્ઞાતં મયાઽખિલમિદં ત્વયિ સન્નિવિષ્ટં
ત્વત્તોઽસ્ય સમ્ભવલયાવપિ માતરદ્ય ।
શક્તિશ્ચ તેઽસ્ય કરણે વિતતપ્રભાવા
જ્ઞાતાઽધુના સકલલોકમયીતિ નૂનમ્ ॥ ૩૦॥

વિસ્તાર્ય સર્વમખિલં સદસદ્વિકારં
સન્દર્શયસ્યવિકલં પુરુષાય કાલે ।
તત્ત્વૈશ્ચ ષોડશભિરેવ ચ સપ્તભિશ્ચ
ભાસીન્દ્રજાલમિવ નઃ કિલ રઞ્જનાય ॥ ૩૧॥

ન ત્વામૃતે કિમપિ વસ્તુગતં વિભાતિ
વ્યાપ્યૈવ સર્વમખિલં ત્વમવસ્થિતાઽસિ ।
શક્તિં વિના વ્યવહૃતો પુરુષોઽપ્યશક્તો

વમ્ભણ્યતે જનનિ બુદ્ધિમતા જનેન ॥ ૩૨॥

પ્રીણાસિ વિશ્વમખિલં સતતં પ્રભાવૈઃ
સ્વૈસ્તેજસા ચ સકલં પ્રકટીકરોષિ ।
અત્સ્યેવ દેવિ તરસા કિલ કલ્પકાલે
કો વેદ દેવિ ચરિતં તવ વૈ ભવસ્ય ॥ ૩૩॥

ત્રાતા વયં જનનિ તે મધુકૈટભાભ્યાં
લોકાશ્ચ તે સુવિતતાઃ ખલુ દર્શિતા વૈ ।
નીતાઃ સુખસ્ય ભવને પરમાં ચ કોટિં
યદ્દર્શનં તવ ભવાનિ મહાપ્રભાવમ્ ॥ ૩૪॥

નાહં ભવો ન ચ વિરિઞ્ચિ વિવેદ માતઃ
કોઽન્યો હિ વેત્તિ ચરિતં તવ દુર્વિભાવ્યમ્ ।
કાનીહ સન્તિ ભુવનાનિ મહાપ્રભાવે
હ્યસ્મિન્ભવાનિ રચિતે રચનાકલાપે ॥ ૩૫॥

અસ્માભિરત્ર ભુવને હરિરન્ય એવ
દૃષ્ટઃ શિવઃ કમલજઃ પ્રથિતપ્રભાવઃ ।
અન્યેષુ દેવિ ભુવનેપુ ન સન્તિ કિં તે
કિં વિદ્મ દેવિ વિતતં તવ સુપ્રભાવમ્ ॥ ૩૬॥

યાચેઽમ્બ તેઽઙ્ઘ્રિકમલં પ્રણિપત્ય કામં
ચિત્તે સદા વસતુ રૂપમિદં તવૈતત્ ।
નામાપિ વક્ત્રકુહરે સતતં તવૈવ
સન્દર્શનં તવ પદામ્બુજયોઃ સદૈવ ॥ ૩૭॥

ભૃત્યોઽયમસ્તિ સતતં મયિ ભાવનીયં
ત્વાં સ્વામિનીતિ મનસા નનુ ચિન્તયામિ ।
એષાઽઽવયોરવિરતા કિલ દેવિ ભૂયા-
દ્વ્યાપ્તિઃ સદૈવ જનની સુતયોરિવાર્થે ॥ ૩૮॥

ત્વં વેત્સિ સર્વમખિલં ભુવનપ્રપઞ્ચં
સર્વજ્ઞતા પરિસમાપ્તિનિતાન્તભૂમિઃ ।
કિં પામરેણ જગદમ્બ નિવેદનીયં
યદ્યુક્તમાચર ભવાનિ તવેઙ્ગિતં સ્યાત્ ॥ ૩૯॥

બ્રહ્મા સૃજત્યવતિ વિષ્ણુરુમાપતિશ્ચ
સંહારકારક ઇયં તુ જને પ્રસિદ્ધિઃ ।
કિં સત્યમેતદપિ દેવિ તવેચ્છયા વૈ
કર્તું ક્ષમા વયમજે તવ શક્તિયુક્તાઃ ॥ ૪૦॥

ધાત્રી ધરાધરસુતે ન જગદ્બિભર્તિ
આધારશક્તિરખિલં તવ વૈ બિભર્તિ ।
સૂર્યોઽપિ ભાતિ વરદે પ્રભયા યુતસ્તે
ત્વં સર્વમેતદખિલં વિરજા વિભાસિ ॥ ૪૧॥

બ્રહ્માઽહમીશ્વરવરઃ કિલ તે પ્રભાવા-
ત્સર્વે વયં જનિયુતા ન યદા તુ નિત્યાઃ ।
કેઽન્યે સુરાઃ શતમખપ્રમુખાશ્ચ નિત્યા
નિત્યા ત્વમેવ જનની પ્રકૃતિઃ પુરાણા ॥ ૪૨॥

ત્વં ચેદ્ભવાનિ દયસે પુરુષં પુરાણં
જાનેઽહમદ્ય તવ સન્નિધિગઃ સદૈવ ।
નોચેદહં વિભુરનાદિરનીહ ઈશો
વિશ્વાત્મધીરિતિ તમઃપ્રકૃતિઃ સદૈવ ॥ ૪૩॥

વિદ્યા ત્વમેવ નનુ બુદ્ધિમતાં નરાણાં
શક્તિસ્ત્વમેવ કિલ શક્તિમતાં સદૈવ ।
ત્વં કીર્તિકાન્તિકમલામલતુષ્ટિરૂપા
મુક્તિપ્રદા વિરતિરેવ મનુષ્યલોકે ॥ ૪૪॥

ગાયત્ર્યસિ પ્રથમવેદકલા ત્વમેવ
સ્વાહા સ્વધા ભગવતી સગુણાર્ધમાત્રા ।
આમ્નાય એવ વિહિતો નિગમો ભવત્યૈ
સઞ્જીવનાય સતતં સુરપૂર્વજાનામ્ ॥ ૪૫॥

મોક્ષાર્થમેવ રચયસ્યખિલં પ્રપઞ્ચં
તેષાં ગતાઃ ખલુ યતો નનુ જીવભાવમ્ ।
અંશા અનાદિનિધનસ્ય કિલાનઘસ્ય
પૂર્ણાર્ણવસ્ય વિતતા હિ યથા તરઙ્ગાઃ ॥ ૪૬॥

જીવો યદા તુ પરિવેત્તિ તવૈવ કૃત્યં
ત્વં સંહરસ્યખિલમેતદિતિ પ્રસિદ્ધમ્ ।

નાટ્યં નટેન રચિતં વિતથેઽન્તરઙ્ગે
કાર્યે કૃતે વિરમસે પ્રથિતપ્રભાવા ॥ ૪૭॥

ત્રાતા ત્વમેવ મમ મોહમયાદ્ભવાબ્ધે-
સ્ત્વામમ્બિકે સતતમેમિ મહાર્તિદે ચ ।
રાગાદિભિર્વિરચિતે વિતથે કિલાન્તે
મામેવ પાહિ બહુદુઃખકરે ચ કાલે ॥ ૪૮॥

નમો દેવિ મહાવિદ્યે નમામિ ચરણૌ તવ ।
સદા જ્ઞાનપ્રકાશં મે દેહિ સર્વાર્થદે શિવે ॥ ૪૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે વિષ્ણુના કૃતં દેવીસ્તોત્રં નામ ચતુર્થોઽધ્યાયઃ ॥ ૩.૪॥

## ૩.૫ પઞ્ચમોઽધ્યાયઃ । હરબ્રહ્મકૃતસ્તુતિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વિરતે વિષ્ણૌ દેવદેવે જનાર્દને ।
ઉવાચ શઙ્કરઃ શર્વઃ પ્રણતઃ પુરતઃ સ્થિતઃ ॥ ૧॥

શિવ ઉવાચ ।
યદિ હરિસ્તવ દેવિ વિભાવજ-
સ્તદનુ પદ્મજ એવ તવોદ્ભવઃ ।
કિમહમત્ર તવાપિ ન સદ્ગુણઃ
સકલલોકવિધૌ ચતુરા શિવે ॥ ૨॥

ત્વમસિ ભૂઃ સલિલં પવનસ્તથા
ખમપિ વહ્નિગુણશ્ચ તથા પુનઃ ।
જનનિ તાનિ પુનઃ કરણાનિ ચ
ત્વમસિ બુદ્ધિમનોઽપ્યથ હઙ્કૃતિઃ ॥ ૩॥

ન ચ વિદન્તિ વદન્તિ ચ યેઽન્યથા
હરિહરાજકૃતં નિખિલં જગત્ ।
તવ કૃતાસ્ત્રય એવ સદૈવ તે
વિરચયન્તિ જગત્સચરાચરમ્ ॥ ૪॥

અવનિવાયુખવહ્નિજલાદિભિઃ

સવિષયૈઃ સગુણૈશ્ચ જગદ્ભવેત્ ।
યદિ તદા કથમદ્ય ચ તત્સ્ફુટં
પ્રભવતીતિ તવામ્બ કલામૃતે ॥ ૫॥

ભવસિ સર્વમિદં સચરાચરં
ત્વમજવિષ્ણુશિવાકૃતિકલ્પિતમ્ ।
વિવિધવેષવિલાસકુતૂહલૈ-
ર્વિરમસે રમસેઽમ્બ યથારુચિ ॥ ૬॥

સકલલોકસિસૃક્ષુરહં હરિઃ
કમલભૂશ્ચ ભવામ યદાઽમ્બિકે ।
તવ પદામ્બુજપાંસુપરિગ્રહં
સમધિગમ્ય તદા નનુ ચક્રિમ ॥ ૭॥

યદિ દયાર્દ્રમના ન સદામ્બિકે
કથમહં વિહિતશ્ચ તમોગુણઃ ।
કમલજશ્ચ રજોગુણસમ્ભવઃ
સુવિહિતઃ કિમુ સત્ત્વગુણો હરિઃ ॥ ૮॥

યદિ ન તે વિષમા મતિરમ્બિકે
કથમિદં બહુધા વિહિતં જગત્ ।
સચિવભૂપતિભૃત્યજનાવૃતં
બહુધનૈરધનૈશ્ચ સમાકુલમ્ ॥ ૯॥

તવ ગુણાસ્રય એવ સદા ક્ષમાઃ
પ્રકટનાવનસંહરણેષુ વૈ ।
હરિહરદ્રુહિણાશ્ચ ક્રમાત્ત્વયા
વિરચિતાસ્ત્રિજગતાં કિલ કારણમ્ ॥ ૧૦॥

પરિચિતાનિ મયા હરિણા તથા
કમલજેન વિમાનગતેન વૈ ।
પથિગતૈર્ભુવનાનિ કૃતાનિ વા
કથય કેન ભવાનિ નવાનિ ચ ॥ ૧૧॥

સૃજસિ પાસિ જગજ્જગદમ્બિકે
સ્વકલયા કિયદિચ્છસિ નાશિતુમ્ ।
રમયસે સ્વપતિં પુરુષં સદા

તવ ગતિં ન હિ વિદ્મ વયં શિવે ॥ ૧૨॥

જનનિ દેહિ પદામ્બુજસેવનં
યુવતિભાગવતાનપિ નઃ સદા ।
પુરુષતામધિગમ્ય પદામ્બુજા-
દ્વિરહિતાઃ ક્વ લભેમ સુખં સ્ફુટમ્ ॥ ૧૩॥

ન રુચિરસ્તિ મમામ્બ પદામ્બુજં
તવ વિહાય શિવે ભુવનેષ્વલમ્ ।
નિવસિતું નરદેહમવાપ્ય ચ
ત્રિભુવનસ્ય પતિત્વમવાપ્ય વૈ ॥ ૧૪॥

સુદતિ નાસ્તિ મનાગપિ મે રતિ-
ર્યુવતિભાવમવાપ્ય તવાન્તિકે ।
પુરુષતા ક્વ સુખાય ભવત્યલં
તવ પદં ન યદીક્ષણગોચરમ્ ॥ ૧૫॥

ત્રિભુવનેષુ ભવત્વિયમમ્બિકે
મમ સદૈવ હિ કીર્તિરનાવિલા ।
યુવતિભાવમવાપ્ય પદામ્બુજં
પરિચિતં તવ સંસૃતિનાશનમ્ ॥ ૧૬॥

ભુવિ વિહાય તવાન્તિકસેવનં
ક ઇહ વાઞ્છતિ રાજ્યમકણ્ટકમ્ ।
ત્રુટિરસૌ કિલ યાતિ યુગાત્મતાં
ન નિકટં યદિ તેઽઙ્ઘ્રિસરોરુહમ્ ॥ ૧૭॥

તપસિ યે નિરતા મુનયોઽમલા-
સ્તવ વિહાય પદામ્બુજપૂજનમ્ ।
જનનિ તે વિધિના કિલ વઞ્ચિતાઃ
પરિભવો વિભવે પરિકલ્પિતઃ ॥ ૧૮॥

ન તપસા ન દમેન સમાધિના
ન ચ તથા વિહિતૈઃ ક્રતુભિર્યથા ।
તવ પદાબ્જપરાગનિષેવણા-
દ્ભવતિ મુક્તિરજે ભવસાગરાત્ ॥ ૧૯॥

કુરુ દયાં દયસે યદિ દેવિ માં
કથય મન્ત્રમનાવિલમદ્ભુતમ્ ।
સમભવં પ્રજપન્સુખિતો હ્યહં
સુવિશદં ચ નવાર્ણમનુત્તમમ્ ॥ ૨૦॥

પ્રથમજન્મનિ ચાધિગતો મયા
તદધુના ન વિભાતિ નવાક્ષરઃ ।
કથય માં મનુમદ્ય ભવાર્ણવા-
જ્જનનિ તારય તારય તારકે ॥ ૨૧॥

ઇત્યુક્તા સા તદા દેવી શિવેનાદ્ભુતતેજસા ।
ઉચ્ચચારામ્બિકા મન્ત્રં પ્રસ્ફુટં ચ નવાક્ષરમ્ ॥ ૨૨॥

તં ગૃહીત્વા મહાદેવઃ પરાં મુદમવાપ હ ।
પ્રણમ્ય ચરણૌ દેવ્યાસ્તત્રૈવાવસ્થિતઃ શિવઃ ॥ ૨૩॥

જપન્નવાક્ષરં મન્ત્રં કામદં મોક્ષદં તથા ।
બીજયુક્તં શુભોચ્ચારં શઙ્કરસ્તસ્થિવાંસ્તદા ॥ ૨૪॥

તં તથાऽવસ્થિતં દૃષ્ટ્વા શઙ્કરં લોકશઙ્કરમ્ ।
અવોચં તાં મહામાયાં સંસ્થિતોऽહં પદાન્તિકે ॥ ૨૫॥

ન વેદાસ્ત્વામેવં કલયિતુમિહાસન્નપટવો
યતસ્તે નોચુસ્ત્વાં સકલજનધાત્રીમવિકલામ્ ।
સ્વધાભૂતા દેવી સકલમખહોમેષુ વિહિતા
તદા ત્વં સર્વજ્ઞા જનનિ ખલુ જાતા ત્રિભુવને ॥ ૨૬॥

કર્તાऽહં પ્રકરોમિ સર્વમખિલં બ્રહ્માણ્ડમત્યદ્ભુતં
કોऽન્યોસ્તીહ ચરાચરે ત્રિભુવને મત્તઃ સમર્થઃ પુમાન્ ।
ધન્યોऽસ્મ્યત્ર ન સંશયઃ કિલ યદા બ્રહ્માऽસ્મિ લોકાતિગો
મગ્નોऽહં ભવસાગરે પ્રવિતતે ગર્વાભિવેશાદિતિ ॥ ૨૭॥

અદ્યાહં તવ પાદપઙ્કજપરાગાદાનગર્વેણ વૈ
ધન્યોऽસ્મીતિ યથાર્થવાદનિપુણો જાતઃ પ્રસાદાચ્ચ તે ।
યાચે ત્વાં ભવભીતિનાશચતુરાં મુક્તિપ્રદાં ચેશ્વરીં
હિત્વા મોહકૃતં મહાર્તિનિગડં ત્વદ્ભક્તિયુક્તં કુરુ ॥ ૨૮॥

અતોऽહઞ્ચ જાતો વિમુક્તઃ કથં સ્યાં

સરોજાદમેયાત્ત્વદાવિષ્કૃતાદ્વૈ ।
તવાજ્ઞાકરઃ કિઙ્કરોઽસ્મીતિ નૂનં
શિવે પાહિ માં મોહમગ્નં ભવાબ્ધૌ ॥ ૨૯॥

ન જાનન્તિ યે માનવાસ્તે વદન્તિ
પ્રભું માં તવાદ્યં ચરિત્રં પવિત્રમ્ ।
યજન્તીહ યે યાજકાઃ સ્વર્ગકામા
ન તે તે પ્રભાવં વિદન્ત્યેવ કામમ્ ॥ ૩૦॥

ત્વયા નિર્મિતોઽહં વિધિત્વે વિહારં
વિકર્તું ચતુર્ધા વિધાયાદિસર્ગમ્ ।
અહં વેદ્મિ કોઽન્યો વિવેદાતિમાયે
ક્ષમસ્વાપરાધં ત્વહઙ્કારજં મે ॥ ૩૧॥

શ્રમં યેઽષ્ટધા યોગમાર્ગે પ્રવૃત્તાઃ
પ્રકુર્વન્તિ મૂઢાઃ સમાધૌ સ્થિતા વૈ ।
ન જાનન્તિ તે નામ મોક્ષપ્રદં વા
સમુચ્ચારિતં જાતુ માતર્મિષેણ ॥ ૩૨॥

વિચારે પરે તત્ત્વસઙ્ખ્યાવિધાને
પદે મોહિતા નામ તે સંવિહાય ।
ન કિં તે વિમૂઢા ભવાબ્ધૌ ભવાનિ
ત્વમેવાસિ સંસારમુક્તિપ્રદા વૈ ॥ ૩૩॥

પરં તત્ત્વવિજ્ઞાનમાદ્યૈર્જનૈર્યૈ-
રજે ચાનુભૂતં ત્યજન્ત્યેવ તે કિમ્ ।
નિમેષાર્ધમાત્રં પવિત્રં ચરિત્રં
શિવા ચામ્બિકા શક્તિરીશેતિ નામ ॥ ૩૪॥

ન કિં ત્વં સમર્થાઽસિ વિશ્વં વિધાતું
દૃશૈવાશુ સર્વં ચતુર્ધા વિભક્તમ્ ।
વિનોદાર્થમેવં વિધિં માં વિધાયા-
દિસર્ગે કિલેદં કરોષીતિ કામમ્ ॥ ૩૫॥

હરિઃ પાલકઃ કિં ત્વયાઽસૌ મધોર્વા
તથા કૈટભાદ્રક્ષિતઃ સિન્ધુમધ્યે ।
હરઃ સંહૃતઃ કિં ત્વયાઽસૌ ન કાલે

કથં મે ભ્રુવોર્મધ્યદેશાત્સ જાતઃ ॥ ૩૬॥

ન તે જન્મ કુત્રાપિ દૃષ્ટં શ્રુતં વા
કુતઃ સમ્ભવસ્તે ન કોઽપીહ વેદ ।
કિલાદ્યાસિ શક્તિસ્ત્વમેકા ભવાનિ
સ્વતન્ત્રૈઃ સમસ્તૈરતો બોધિતાઽસિ ॥ ૩૭॥

ત્વયા સંયુતોઽહં વિકર્તું સમર્થો
હરિસ્ત્રાતુમમ્બ ત્વયા સંયુતશ્ચ ।
હરઃ સમ્પ્રહર્તું ત્વયૈવેહ યુક્તઃ
ક્ષમા નાદ્ય સર્વે ત્વયા વિપ્રયુક્તાઃ ॥ ૩૮॥

યથાઽહં હરિઃ શઙ્કરઃ કિં તથાઽન્યે
ન જાતા ન સન્તીહ નો વાઽભવિષ્યન્ ।
ન મુહ્યન્તિ કેઽસ્મિંસ્તવાત્યન્તચિત્રે
વિનોદે વિવાદાસ્પદેઽલ્પાશયાનામ્ ॥ ૩૯॥

અકર્તા ગુણસ્પષ્ટ એવાદ્ય દેવો
નિરીહોઽનુપાધિઃ સદૈવાકલશ્ચ ।
તથાપીશ્વરસ્તે વિતીર્ણં વિનોદં
સુસમ્પશ્યતીત્યાહુરેવં વિધિજ્ઞાઃ ॥ ૪૦॥

દૃષ્ટાદૃષ્ટવિભેદેઽસ્મિન્પ્રાક્ત્વત્તો વૈ પુમાન્પરઃ ।
નાન્યઃ કોઽપિ તૃતીયોઽસ્તિ પ્રમેયે સુવિચારિતે ॥ ૪૧॥

ન મિથ્યા વેદવાક્યં વૈ કલ્પનીયં કદાચન ।
વિરોધોઽયં મયાઽત્યન્તં હૃદયે તુ વિશઙ્કિતઃ ॥ ૪૨॥

એકમેવાદ્વિતીયં યદ્બ્રહ્મ વેદા વદન્તિ વૈ ।
સા કિં ત્વં વાપ્યસૌ વા કિં સન્દેહં વિનિવર્તય ॥ ૪૩॥

નિઃસંશયં ન મે ચેતઃ પ્રભવત્યવિશઙ્કિતમ્ ।
દ્વિત્વૈકત્વવિચારેઽસ્મિન્નિમગ્નં ક્ષુલ્લકં મનઃ ॥ ૪૪॥

સ્વમુખેનાપિ સન્દેહં છેત્તુમર્હસિ મામકમ્ ।
પુણ્યભોગાચ્ચ મે પ્રાપ્તા સઙ્ગતિસ્તવ પાદયોઃ ॥ ૪૫॥

પુમાનસિ ત્વં સ્ત્રી વાસિ વદ વિસ્તરતો મમ ।
જ્ઞાત્વાઽહં પરમાં શક્તિં મુક્તઃ સ્યાં ભવસાગરાત્ ॥ ૪૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે હરબ્રહ્મકૃતસ્તુતિવર્ણનં પઞ્ચમોઽધ્યાયઃ ॥ ૩.૫॥

## ૩.૬ ષષ્ઠોઽધ્યાયઃ । બ્રહ્મણે શ્રીદેવ્યા ઉપદેશવર્ણનમ્ ।

બ્રહ્મોવાચ ।
ઇતિ પૃષ્ટા મયા દેવી વિનયાવનતેન ચ ।
ઉવાચ વચનં શ્લક્ષ્ણમાદ્યા ભગવતી હિ સા ॥ ૧॥

દેવ્યુવાચ ।
સદૈકત્વં ન ભેદોઽસ્તિ સર્વદૈવ મમાસ્ય ચ ।
યોઽસૌ સાહમહં યોઽસૌ ભેદોઽસ્તિ મતિવિભ્રમાત્ ॥ ૨॥

આવયોરન્તરં સૂક્ષ્મં યો વેદ મતિમાન્હિ સઃ ।
વિમુક્તઃ સ તુ સંસારાન્મુચ્યતે નાત્ર સંશયઃ ॥ ૩॥

એકમેવાદ્વિતીયં વૈ બ્રહ્મ નિત્યં સનાતનમ્ ।
દ્વૈતભાવં પુનર્યાતિ કાલ ઉત્પિત્સુસંજ્ઞકે ॥ ૪॥

યથા દીપસ્તથોપાધેર્યોગાત્સઞ્જાયતે દ્વિધા ।
છાયેવાદર્શમધ્યે વા પ્રતિબિમ્બં તથાવયોઃ ॥ ૫॥

ભેદ ઉત્પત્તિકાલે વૈ સર્ગાર્થં પ્રભવત્યજ ।
દૃશ્યાદૃશ્યવિભેદોઽયં દ્વૈવિધ્યે સતિ સર્વથા ॥ ૬॥

નાહં સ્ત્રી ન પુમાંશ્ચાહં ન ક્લીબં સર્ગસઙ્ક્ષયે ।
સર્ગે સતિ વિભેદઃ સ્યાત્કલ્પિતોઽયં ધિયા પુનઃ ॥ ૭॥

અહં બુદ્ધિરહં શ્રીશ્ચ ધૃતિઃ કીર્તિઃ સ્મૃતિસ્તથા ।
શ્રદ્ધા મેધા દયા લજ્જા ક્ષુધા તૃષ્ણા તથા ક્ષમા ॥ ૮॥

કાન્તિઃ શાન્તિઃ પિપાસા ચ નિદ્રા તન્દ્રા જરાજરા ।
વિદ્યાવિદ્યા સ્પૃહા વાઞ્છા શક્તિશ્ચાશક્તિરેવ ચ ॥ ૯॥

વસા મજ્જા ચ ત્વક્ચાહં દૃષ્ટિર્વાગનૃતાનૃતા ।
પરા મધ્યા ચ પશ્યન્તી નાડ્યોઽહં વિવિધાશ્ચ યાઃ ॥ ૧૦॥

કિં નાહં પશ્ય સંસારે મદ્વિયુક્તં કિમસ્તિ હિ ।

સર્વમેવાહમિત્યેવં નિશ્ચયં વિદ્ધિ પદ્મજ ॥ ૧૧॥

એતૈર્મે નિશ્ચિતૈ રૂપૈર્વિહીનં કિં વદસ્વ મે ।
તસ્માદહં વિધે ચાસ્મિન્સર્ગે વૈ વિતતાભવમ્ ॥ ૧૨॥

નૂનં સર્વેષુ દેવેષુ નાનાનામધરા હ્યહમ્ ।
ભવામિ શક્તિરૂપેણ કરોમિ ચ પરાક્રમમ્ ॥ ૧૩॥

ગૌરી બ્રાહ્મી તથા રૌદ્રી વારાહી વૈષ્ણવી શિવા ।
વારુણી ચાથ કૌબેરી નારસિંહી ચ વાસવી ॥ ૧૪॥

ઉત્પન્નેષુ સમસ્તેષુ કાર્યેષુ પ્રવિશામિ તાન્ ।
કરોમિ સર્વકાર્યાણિ નિમિત્તં તં વિધાય વૈ ॥ ૧૫॥

જલે શીતં તથા વહ્નાવૌષ્ણ્યં જ્યોતિર્દિવાકરે ।
નિશાનાથે હિમા કામં પ્રભવામિ યથા તથા ॥ ૧૬॥

મયા ત્યક્તં વિધે નૂનં સ્પન્દિતું ન ક્ષમં ભવેત્ ।
જીવજાતં ચ સંસારે નિશ્ચયોઽયં બ્રુવે ત્વયિ ॥ ૧૭॥

અશક્તઃ શઙ્કરો હન્તું દૈત્યાન્કિલ મયોજ્ઝિતઃ ।
શક્તિહીનં નરં બ્રૂતે લોકશ્ચૈવાતિદુર્બલમ્ ॥ ૧૮॥

રુદ્રહીનં વિષ્ણુહીનં ન વદન્તિ જનાઃ કિલ ।
શક્તિહીનં યથા સર્વે પ્રવદન્તિ નરાધમમ્ ॥ ૧૯॥

પતિતઃ સ્ખલિતો ભીતઃ શાન્તઃ શત્રુવશં ગતઃ ।
અશક્તઃ પ્રોચ્યતે લોકે નારુદ્રઃ કોઽપિ કથ્યતે ॥ ૨૦॥

તદ્વિદ્ધિ કારણં શક્તિર્યથા ત્વં ચ સિસૃક્ષસિ ।
ભવિતા ચ યદા યુક્તઃ શક્ત્યા કર્તા તદાખિલમ્ ॥ ૨૧॥

તથા હરિસ્તથા શમ્ભુસ્તથેન્દ્રોઽથ વિભાવસુઃ ।
શશી સૂર્યો યમસ્ત્વષ્ટા વરુણઃ પવનસ્તથા ॥ ૨૨॥

ધરા સ્થિરા તદા ધર્તું શક્તિયુક્તા યદા ભવેત્ ।
અન્યથા ચેદશક્તા સ્યાત્પરમાણોશ્ચ ધારણે ॥ ૨૩॥

તથા શેષસ્તથા કૂર્મો યેઽન્યે સર્વે ચ દિગ્ગજાઃ ।
મદ્યુક્તા વૈ સમર્થાશ્ચ સ્વાનિ કાર્યાણિ સાધિતુમ્ ॥ ૨૪॥

જલં પિબામિ સકલં સંહરામિ વિભાવસુમ્ ।
પવનં સ્તમ્ભયામ્યદ્ય યદિચ્છામિ તથાચરમ્ ॥ ૨૫॥

તત્ત્વાનાં ચૈવ સર્વેષાં કદાપિ કમલોદ્ભવ ।
અસતાં ભાવસન્દેહઃ કર્તવ્યો ન કદાચન ॥ ૨૬॥

કદાચિત્પ્રાગભાવઃ સ્યાત્પ્રધ્વંસાભાવ એવ વા ।
મૃત્પિણ્ડેષુ કપાલેષુ ઘટાભાવો યથા તથા ॥ ૨૭॥

અદ્યાત્ર પૃથિવી નાસ્તિ ક્વ ગતેતિ વિચારણે ।
સઞ્જાતા ઇતિ વિજ્ઞેયા અસ્યાસ્તુ પરમાણવઃ ॥ ૨૮॥

શાશ્વતં ક્ષણિકં શૂન્યં નિત્યાનિત્યં સકર્તુકમ્ ।
અહઙ્કારાગ્રિમઞ્ચૈવ સપ્તભેદૈર્વિવક્ષિતમ્ ॥ ૨૯॥

ગૃહાણાજ મહતત્ત્વમહઙ્કારસ્તદુદ્ભવઃ ।
તતઃ સર્વાણિ ભૂતાનિ રચયસ્વ યથા પુરા ॥ ૩૦॥

વ્રજન્તુ સ્વાનિ ધિષ્ણ્યાનિ વિરચ્ય નિવસન્તુ વઃ ।
સ્વાનિ સ્વાનિ ચ કાર્યાણિ કુર્વન્તુ દૈવભાવિતાઃ ॥ ૩૧॥

ગૃહાણેમાં વિધે શક્તિં સુરૂપાં ચારુહાસિનીમ્ ।
મહાસરસ્વતીં નામ્ના રજોગુણયુતાં વરામ્ ॥ ૩૨॥

શ્વેતામ્બરધરાં દિવ્યાં દિવ્યભૂષણભૂષિતામ્ ।
વરાસનસમારૂઢાં ક્રીડાર્થં સહચારિણીમ્ ॥ ૩૩॥

એષા સહચરી નિત્યં ભવિષ્યતિ વરાઙ્ગના ।
માવમંસ્થા વિભૂતિં મે મત્વા પૂજ્યતમાં પ્રિયામ્ ॥ ૩૪॥

ગચ્છ ત્વમનયા સાર્ધં સત્યલોકં બતાશુ વૈ ।
બીજાચ્ચતુર્વિધં સર્વં સમુત્પાદય સામ્પ્રતમ્ ॥ ૩૫॥

લિઙ્ગકોશાશ્ચ જીવૈસ્તૈઃ સહિતાઃ કર્મભિસ્તથા ।
વર્તન્તે સંસ્થિતાઃ કાલે તાન્કુરુ ત્વં યથા પુરા ॥ ૩૬॥

કાલકર્મસ્વભાવાખ્યૈઃ કારણૈઃ સકલં જગત્ ।
સ્વભાવસ્વગુણૈર્યુક્તં પૂર્વવત્સચરાચરમ્ ॥ ૩૭॥

માનનીયસ્ત્વયા વિષ્ણુઃ પૂજનીયશ્ચ સર્વદા ।
સત્ત્વગુણપ્રધાનત્વાદધિકઃ સર્વતઃ સદા ॥ ૩૮॥

યદા યદા હિ કાર્યં વો ભવિષ્યતિ દુરત્યયમ્ ।
કરિષ્યતિ પૃથિવ્યાં વૈ અવતારં તદા હરિઃ ॥ ૩૯॥

તિર્યગ્યોનાવથાન્યત્ર માનુષીં તનુમાશ્રિતઃ ।
દાનવાનાં વિનાશં વૈ કરિષ્યતિ જનાર્દનઃ ॥ ૪૦॥

ભવોઽયં તે સહાયશ્ચ ભવિષ્યતિ મહાબલઃ ।
સમુત્પાદ્ય સુરાન્સર્વાન્વિહરસ્વ યથાસુખમ્ ॥ ૪૧॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા નાનાયજ્ઞૈઃ સદક્ષિણૈઃ ।
યજિષ્યન્તિ વિધાનેન સર્વાન્વઃ સુસમાહિતાઃ ॥ ૪૨॥

મન્ત્રામોચ્ચારણાત્સર્વે મખેષુ સકલેષુ ચ ।
સદા તૃપ્તાશ્ચ સન્તુષ્ટા ભવિષ્યધ્વં સુરાઃ કિલ ॥ ૪૩॥

શિવશ્ચ માનનીયો વૈ સર્વથા યત્તમોગુણઃ ।
યજ્ઞકાર્યેષુ સર્વેષુ પૂજનીયઃ પ્રયત્નતઃ ॥ ૪૪॥

યદા પુનઃ સુરાણાં વૈ ભયં દૈત્યાદ્ભવિષ્યતિ ।
શક્તયો મે તદોત્પન્ના હરિષ્યન્તિ સુવિગ્રહાઃ ॥ ૪૫॥

વારાહી વૈષ્ણવી ગૌરી નારસિંહી સદાશિવા ।
એતાશ્ચાન્યાશ્ચ કાર્યાણિ કુરુ ત્વં કમલોદ્ભવ ॥ ૪૬॥

નવાક્ષરમિમં મન્ત્રં બીજધ્યાનયુતં સદા ।
જપન્સર્વાણિ કાર્યાણિ કુરુ ત્વં કમલોદ્ભવ ॥ ૪૭॥

મન્ત્રાણામુત્તમોઽયં વૈ ત્વં જાનીહિ મહામતે ।
હૃદયે તે સદા ધાર્યઃ સર્વકામાર્થસિદ્ધયે ॥ ૪૮॥

ઇત્યુક્ત્વા માં જગન્માતા હરિં પ્રાહ શુચિસ્મિતા ।
વિષ્ણો વ્રજ ગૃહાણેમાં મહાલક્ષ્મીં મનોહરામ્ ॥ ૪૯॥

સદા વક્ષઃસ્થલે સ્થાને ભવિતા નાત્ર સંશયઃ ।
ક્રીડાર્થં તે મયા દત્તા શક્તિઃ સર્વાર્થદા શિવા ॥ ૫૦॥

ત્વયેયં નાવમન્તવ્યા માનનીયા ચ સર્વદા ।
લક્ષ્મીનારાયણાખ્યોઽયં યોગો વૈ વિહિતો મયા ॥ ૫૧॥

જીવનાર્થં કૃતા યજ્ઞા દેવાનાં સર્વથા મયા ।

અવિરોધેન સઙ્ગેન વર્તિતવ્યં ત્રિભિઃ સદા ॥ ૫૨॥

ત્વં ચ વેધાઃ શિવસ્ત્વેતે દેવા મદ્ગુણસમ્ભવાઃ ।
માન્યાઃ પૂજ્યાશ્ચ સર્વેષાં ભવિષ્યન્તિ ન સંશયઃ ॥ ૫૩॥

યે વિભેદં કરિષ્યન્તિ માનવા મૂઢચેતસઃ ।
નિરયં તે ગમિષ્યન્તિ વિભેદાન્નાત્ર સંશયઃ ॥ ૫૪॥

યો હરિઃ સ શિવઃ સાક્ષાદ્યઃ શિવઃ સ સ્વયં હરિઃ ।
એતયોર્ભેદમાતિષ્ઠન્નરકાય ભવેન્નરઃ ॥ ૫૫॥

તથૈવ દ્રુહિણો જ્ઞેયો નાત્ર કાર્યા વિચારણા ।
અપરો ગુણભેદોઽસ્તિ શૃણુ વિષ્ણો બ્રવીમિ તે ॥ ૫૬॥

મુખ્યઃ સત્ત્વગુણસ્તેઽસ્તુ પરમાત્મવિચિન્તને ।
ગૌણત્વેઽપિ પરૌ ખ્યાતૌ રજોગુણતમોગુણૌ ॥ ૫૭॥

લક્ષ્મ્યા સહ વિકારેષુ નાનાભેદેષુ સર્વદા ।
રજોગુણયુતો ભૂત્વા વિહરસ્વાનયા સહ ॥ ૫૮॥

વાગ્બીજં કામરાજં ચ માયાબીજં તૃતીયકમ્ ।
મન્ત્રોઽયં ત્વં રમાકાન્ત મદ્દત્તઃ પરમાર્થદઃ ॥ ૫૯॥

ગૃહીત્વા જપ તં નિત્યં વિહરસ્વ યથાસુખમ્ ।
ન તે મૃત્યુભયં વિષ્ણો ન કાલપ્રભવં ભયમ્ ॥ ૬૦॥

યાવદેષ વિહારો મે ભવિષ્યતિ સુનિશ્ચયઃ ।
સંહરિષ્યામ્યહં સર્વં યદા વિશ્વં ચરાચરમ્ ॥ ૬૧॥

ભવન્તોઽપિ તદા નૂનં મયિ લીના ભવિષ્યથ ।
સ્મર્તવ્યોઽયં સદા મન્ત્રઃ કામદો મોક્ષદસ્તથા ॥ ૬૨॥

ઉદ્ગીથેન ચ સંયુક્તઃ કર્તવ્યઃ શુભમિચ્છતા ।
કારયિત્વાથ વૈકુણ્ઠં વસ્તવ્યં પુરુષોત્તમ ॥ ૬૩॥

વિહરસ્વ યથાકામં ચિન્તયન્માં સનાતનીમ્ ।
બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વાસુદેવં સા ત્રિગુણા પ્રકૃતિઃ પરા ॥ ૬૪॥

નિર્ગુણા શઙ્કરં દેવમવોચદમૃતં વચઃ ।
દેવ્યુવાચ ।

ગૃહાણ હરગૌરીં ત્વં મહાકાલીં મનોહરામ્ ॥ ૬૫॥

કૈલાસં કારયિત્વા ચ વિહરસ્વ યથાસુખમ્ ।
મુખ્યસ્તમોગુણસ્તેઽસ્તુ ગૌણૌ સત્ત્વરજોગુણૌ ॥ ૬૬॥

વિહરાસુરનાશાર્થં રજોગુણતમોગુણૌ ।
તપસ્તપ્તં તથા કર્તું સ્મરણં પરમાત્મનઃ ॥ ૬૭॥

સર્વસત્ત્વગુણઃ શાન્તો ગૃહીતવ્યઃ સદાનઘ ।
સર્વથા ત્રિગુણા યૂયં સૃષ્ટિસ્થિત્યન્તકારકાઃ ॥ ૬૮॥

એભિર્વિહીનં સંસારે વસ્તુ નૈવાત્ર કુત્રચિત્ ।
વસ્તુમાત્રં તુ યદૃશ્યં સંસારે ત્રિગુણં હિ તત્ ॥ ૬૯॥

દૃશ્યં ચ નિર્ગુણં લોકે ન ભૂતં નો ભવિષ્યતિ ।
નિર્ગુણઃ પરમાત્માસૌ ન તુ દૃશ્યઃ કદાચન ॥ ૭૦॥

સગુણા નિર્ગુણા ચાહં સમયે શઙ્કરોત્તમા ।
સદાહં કારણં શમ્ભો ન ચ કાર્યં કદાચન ॥ ૭૧॥

સગુણા કારણત્વાદ્વૈ નિર્ગુણા પુરુષાન્તિકે ।
મહત્તત્ત્વમહઙ્કારો ગુણાઃ શબ્દાદયસ્તથા ॥ ૭૨॥

કાર્યકારણરૂપેણ સંસરન્તે ત્વહર્નિશમ્ ॥

સદુદ્ભૂતસ્ત્વહઙ્કારસ્તેનાહં કારણં શિવા ॥ ૭૩॥

અહઙ્કારશ્ચ મે કાર્યં ત્રિગુણોઽસૌ પ્રતિષ્ઠિતઃ ।
અહઙ્કારાન્મહત્તત્ત્વં બુદ્ધિઃ સા પરિકીર્તિતા ॥ ૭૪॥

મહત્તત્ત્વં હિ કાર્યં સ્યાદહઙ્કારો હિ કારણમ્ ।
તન્માત્રાણિ ત્વહઙ્કારાદુત્પદ્યન્તે સદૈવ હિ ॥ ૭૫॥

કારણં પઞ્ચભૂતાનાં તાનિ સર્વસમુદ્ભવે ।
કર્મેન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ચ ॥ ૭૬॥

મહાભૂતાનિ પઞ્ચૈવ મનઃ ષોડશમેવ ચ ।
કાર્યઞ્ચ કારણઞ્ચૈવ ગણોઽયં ષોડશાત્મકઃ ॥ ૭૭॥

પરમાત્મા પુમાનાદ્યો ન કાર્યં ન ચ કારણમ્ ।
એવં સમુદ્ભવઃ શમ્ભો સર્વેષામાદિસમ્ભવે ॥ ૭૮॥

સઙ્ક્ષેપેણ મયા પ્રોક્તસ્તવ તત્ર સમુદ્ભવઃ ।
વ્રજન્ત્વદ્ય વિમાનેન કાર્યાર્થં મમ સત્તમાઃ ॥ ૭૯॥

સ્મરણાદ્દર્શનં તુભ્યં દાસ્યેઽહં વિષમે સ્થિતે ।
સ્મર્તવ્યાહં સદા દેવાઃ પરમાત્મા સનાતનઃ ॥ ૮૦॥

ઉભયોઃ સ્મરણાદેવ કાર્યસિદ્ધિરસંશયમ્ ।
બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વિસસર્જાસ્માન્દત્ત્વા શક્તીઃ સુસંસ્કૃતાઃ ॥ ૮૧॥

વિષ્ણવેઽથ મહાલક્ષ્મીં મહાકાલીં શિવાય ચ ।
મહાસરસ્વતીં મહ્યં સ્થાનાત્તસ્માદ્વિસર્જિતાઃ ॥ ૮૨॥

સ્થલાન્તરં સમાસાદ્ય તે જાતાઃ પુરુષા વયમ્ ।
ચિન્તયન્તઃ સ્વરૂપં તત્પ્રભાવં પરમાદ્ભુતમ્ ॥ ૮૩॥

વિમાનં તત્સમાસાદ્ય સંરૂઢાસ્તત્ર વૈ ત્રયઃ ।
ન દ્વીપોઽસૌ ન સા દેવી સુધાસિન્ધુસ્તથૈવ ચ ॥

પુનર્દૃષ્ટં વિમાનં વૈ તત્રાસ્માભિર્ન ચાન્યથા ॥ ૮૪॥

આસાદ્ય તસ્મિન્વિતતે વિમાને
પ્રાપ્તા વયં પઙ્કજસન્નિધૌ ચ ।
મહાર્ણવે યત્ર હતૌ દુરત્યયૌ
મુરારિણા તૌ મધુકૈટભાખ્યૌ ॥ ૮૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે બ્રહ્મણે શ્રીદેવ્યા ઉપદેશવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૩.૬॥

## ૩.૭ સપ્તમોઽધ્યાયઃ । તત્ત્વનિરૂપણવર્ણનમ્ ।

બ્રહ્મોવાચ ।
એવમ્પ્રભાવા સા દેવી મયા દૃષ્ટાથ વિષ્ણુના ।
શિવેનાપિ મહાભાગ તાસ્તા દેવ્યઃ પૃથક્પૃથક્ ॥ ૧॥

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય પિતુર્વાક્યં નારદો મુનિસત્તમઃ ।
પપ્રચ્છ પરમપ્રીતઃ પ્રજાપતિમિદં વચઃ ॥ ૨॥

નારદ ઉવાચ ।
પુમાનાદ્યોઽવિનાશી યો નિર્ગુણોઽચ્યુતિરવ્યયઃ ।
દૃષ્ટશ્ચૈવાનુભૂતશ્ચ તદ્વદસ્વ પિતામહ ॥ ૩॥

ત્રિગુણા વીક્ષિતા શક્તિર્નિર્ગુણા કીદૃશી પિતઃ ।
તસ્યાઃ સ્વરૂપં મે બ્રૂહિ પુરુષસ્ય ચ પદ્મજ ॥ ૪॥

યદર્થઞ્ચ મયા તપ્તં શ્વેતદ્વીપે મહાતપઃ ।
દૃષ્ટાઃ સિદ્ધા મહાત્માનસ્તાપસા ગતમન્યવઃ ॥ ૫॥

પરમાત્મા ન સમ્પ્રાપ્તો મયાઽસૌ દૃષ્ટિગોચરઃ ।
પુનઃ પુનસ્તપસ્તીવ્રં કૃતં તત્ર પ્રજાપતે ॥ ૬॥

ભવતા સગુણા શક્તિર્દૃષ્ટા તાત મનોરમા ।
નિર્ગુણા નિર્ગુણશ્ચૈવ કીદૃશૌ તૌ વદસ્વ મે ॥ ૭॥

વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટઃ પિતા તેન નારદેન પ્રજાપતિઃ ।
ઉવાચ વચનં તથ્યં સ્મિતપૂર્વં પિતામહઃ ॥ ૮॥

બ્રહ્મોવાચ ।
નિર્ગુણસ્ય મુને રૂપં ન ભવેદૃષ્ટિગોચરમ્ ।
દૃશ્યઞ્ચ નશ્વરં યસ્માદરૂપં દૃશ્યતે કથમ્ ॥ ૯॥

નિર્ગુણા દુર્ગમા શક્તિર્નિર્ગુણશ્ચ તથા પુમાન્ ।
જ્ઞાનગમ્યૌ મુનીનાં તુ ભાવનીયૌ તથા પુનઃ ॥ ૧૦॥

અનાદિનિધનૌ વિદ્ધિ સદા પ્રકૃતિપૂરુષૌ ।
વિશ્વાસેનાભિગમ્યૌ તૌ નાવિશ્વાસેન કર્હિચિત્ ॥ ૧૧॥

ચૈતન્યં સર્વભૂતેષુ યત્તદ્વિદ્ધિ પરાત્મકમ્ ।
તેજઃ સર્વત્રગં નિત્યં નાનાભાવેષુ નારદ ॥ ૧૨॥

તઞ્ચ તાઞ્ચ મહાભાગ વ્યાપકૌ વિદ્ધિ સર્વગૌ ।
તાભ્યાં વિહીનં સંસારે ન કિઞ્ચિદ્વસ્તુ વિદ્યતે ॥ ૧૩॥

તૌ વિચિન્ત્યૌ સદા દેહે મિશ્રીભૂતૌ સદાવ્યયૌ ।
એકરૂપૌ ચિદાત્માનૌ નિગુણૌ નિર્મલાવુભૌ ॥ ૧૪॥

યા શક્તિઃ પરમાત્માઽસૌ સા યોઽસૌ સા પરમા મતા ।

અન્તરં નૈતયોઃ કોઽપિ સૂક્ષ્મં વેદ ચ નારદ ॥ ૧૫॥

અધીત્ય સર્વશાસ્ત્રાણિ વેદાન્સાઙ્ગાંશ્ચ નારદ ।
ન જાનાતિ તયોઃ સૂક્ષ્મમન્તરં વિરતિં વિના ॥ ૧૬॥

અહઙ્કારકૃતં સર્વં વિશ્વં સ્થાવરજઙ્ગમમ્ ।
કથં તદ્રહિતં પુત્ર ભવેત્કલ્પશતૈરપિ ॥ ૧૭॥

નિર્ગુણં સગુણઃ પુત્ર કથં પશ્યતિ ચક્ષુષા ।
સગુણં ચ મહાબુદ્ધે ચેતસા સંવિચારય ॥ ૧૮॥

પિત્તેનાચ્છાદિતા જિહ્વા ચક્ષુશ્ચ મુનિસત્તમ ।
કટુ પિત્તં વિજાનાતિ રસં રૂપં ન તત્તથા ॥ ૧૯॥

ગુણૈઃ સમાવૃતં ચેતઃ કથં જાનાતિ નિર્ગુણમ્ ।
અહઙ્કારોદ્ભવં તચ્ચ તદ્વિહીનં કથં ભવેત્ ॥ ૨૦॥

યાવન્ન ગુણવિચ્છેદસ્તાવત્તદ્દર્શનં કુતઃ ।
તં પશ્યતિ તદા ચિત્તે યદાઽહઙ્કારવર્જિતઃ ॥ ૨૧॥

નારદ ઉવાચ ।
સ્વરૂપં દેવદેવેશ ત્રયાણામેવ વિસ્તરાત્ ।
ગુણાનાં યત્સ્વરૂપોઽસ્તિ હ્યહઙ્કારસ્ત્રિરૂપકઃ ॥ ૨૨॥

સાત્ત્વિકો રાજસશ્ચૈવ તામસશ્ચ તથાપરઃ ।
વિભેદેન સ્વરૂપાણિ વદસ્વ પુરુષોત્તમ ॥ ૨૩॥

યજ્જ્ઞાત્વા વિપ્રમુચ્યેઽહં જ્ઞાનં તદ્વદ મે પ્રભો ।
ગુણાનાં લક્ષણાન્યેવ વિતતાનિ વિભાગશઃ ॥ ૨૪॥

બ્રહ્મોવાચ ।
ત્રયાણાં શક્તયસ્તિસ્ત્રસ્તદ્બ્રવીમિ તવાનઘ ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિરર્થશક્તિસ્તથાપરા ॥ ૨૫॥

સાત્ત્વિકસ્ય જ્ઞાનશક્તી રાજસસ્ય ક્રિયાત્મિકા ।
દ્રવ્યશક્તિસ્તામસસ્ય તિસ્રશ્ચ કથિતાસ્તવ ॥ ૨૬॥

તેષાં કાર્યાણિ વક્ષ્યામિ શ ૃણુ નારદ તત્ત્વતઃ ।
તામસ્યા દ્રવ્યશક્તેશ્ચ શબ્દસ્પર્શસમુદ્ભવઃ ॥ ૨૭॥

રૂપં રસશ્ચ ગન્ધશ્ચ તન્માત્રાણિ પ્રચક્ષતે ।

શબ્દૈકગુણમાકાશં વાયુઃ સ્પર્શગુણસ્તથા ॥ ૨૮॥

સુરૂપૈકગુણોઽગ્નિશ્ચ જલં રસગુણાત્મકમ્ ।
પૃથ્વી ગન્ધગુણા જ્ઞેયા સૂક્ષ્માણ્યેતાનિ નારદ ॥ ૨૯॥

દશૈતાનિ મિલિત્વા તુ દ્રવ્યશક્તિયુતાનિ વૈ ।
તામસાહઙ્કારજઃ સ્યાત્સર્ગસ્તદનુવૃત્તિકઃ ॥ ૩૦॥

રાજસ્યાશ્ચ ક્રિયાશક્તેરુત્પન્નાનિ શ ૃણુષ્વ મે ।
શ્રોત્રં ત્વગ્રસના ચક્ષુર્ઘ્રાણં ચૈવ ચ પઞ્ચમમ્ ॥ ૩૧॥

જ્ઞાનેન્દ્રિયાણિ ચૈતાનિ તથા કર્મેન્દ્રિયાણિ ચ ।
વાક્પાણિપાદપાયુશ્ચ ગુહ્યાન્તાનિ ચ પઞ્ચ વૈ ॥ ૩૨॥

પ્રાણોઽપાનશ્ચ વ્યાનશ્ચ સમાનોદાનવાયવઃ ।
પઞ્ચદશ મિલિત્વૈવ રાજસઃ સર્ગ ઉચ્યતે ॥ ૩૩॥

સાધનાનિ કિલૈતાનિ ક્રિયાશક્તિમયાનિ ચ ।
ઉપાદાનં કિલૈતેષાં ચિદનુવૃત્તિરુચ્યતે ॥ ૩૪॥

જ્ઞાનશક્તિસમાયુક્તાઃ સાત્ત્વિકાચ્ચ સમુદ્ભવાઃ ।
દિશો વાયુશ્ચ સૂર્યશ્ચ વરુણશ્ચાશ્વિનાવપિ ॥ ૩૫॥

જ્ઞાનેન્દ્રિયાણાં પઞ્ચાનાં પઞ્ચાધિષ્ઠાતૃદેવતાઃ ।
ચન્દ્રો બ્રહ્મા તથા રુદ્રઃ ક્ષેત્રજ્ઞશ્ચ ચતુર્થકઃ ॥ ૩૬॥

ઇત્યન્તઃકરણાખ્યસ્ય બુદ્ધ્યાદેશ્ચાધિદૈવતમ્ ।
ચત્વાર્યેવ તથા પ્રોક્તાઃ કિલાધિષ્ઠાતૃદેવતાઃ ॥ ૩૭॥

મનસા સહ ચૈતાનિ નૂનં પઞ્ચદશૈવ તુ ।
સાત્ત્વિકસ્ય તુ સર્ગોઽયં સાત્ત્વિકાખ્યઃ પ્રકીર્તિતઃ ॥ ૩૮॥

સ્થૂલસૂક્ષ્માદિભેદેન દ્વે રૂપે પરમાત્મનઃ ।
જ્ઞાનરૂપં નિરાકારં નિદાનં તત્પ્રચક્ષતે ॥ ૩૯॥

સાધકસ્ય તુ ધ્યાનાદૌ સ્થૂલરૂપં પ્રચક્ષતે ।
શરીરં સૂક્ષ્મમેવેદં પુરુષસ્ય પ્રકીર્તિતમ્ ॥ ૪૦॥

મમ ચૈવ શરીરં વૈ સૂત્રમિત્યભિધીયતે ।
સ્થૂલં શરીરં વક્ષ્યામિ બ્રહ્મણઃ પરમાત્મનઃ ॥ ૪૧॥

શ઼ૃણુ નારદ યત્નેન યચ્છ્રુત્વા વિપ્રમુચ્યતે ।
તન્માત્રાણિ પુરોક્તાનિ ભૂતસૂક્ષ્માણિ યાનિ વૈ ॥ ૪૨॥

પઞ્ચીકૃત્ય તુ તાન્યેવ પઞ્ચભૂતસમુદ્ભવઃ ।
પઞ્ચીકરણભેદોઽયં શ઼ૃણુ સંવદતઃ કિલ ॥ ૪૩॥

પ્રથમં રસતન્માત્રામુપાદાય મનસ્યપિ ।
કલ્પયેચ્ચ તથા તદ્વૈ યથા ભવતિ ચોદકમ્ ॥ ૪૪॥

શિષ્ટાનાં ચૈવ ભૂતાનામંશાન્કૃત્વા પૃથક્પૃથક્ ।
ઉદકે મિશ્રયેચ્ચાંશાન્કૃતે રસમયે તતઃ ॥ ૪૫॥

તદા ભૂતવિભાગે ચ ચૈતન્યે ચ પ્રકાશિતે ।
ચૈતન્યસ્ય પ્રવેશાત્તુ તદાઽહમિતિ સંશયઃ ॥ ૪૬॥

પ્રતીયમાને તેનૈવ વિશેષેણાભિમાનતઃ ।
આદિનારાયણો દેવો ભગવાનિતિ ચોચ્યતે ॥ ૪૭॥

ઘનીભૂતેઽથ ભૂતાનાં વિભાગે સ્પષ્ટતાં ગતે ।
વૃદ્ધિં પ્રાપ્ય ગુણૈશ્ચેત્થમેકૈકગુણવૃદ્ધિતઃ ॥ ૪૮॥

આકાશસ્ય ગુણશ્ચૈકઃ શબ્દ એવ ન ચાપરઃ ।
શબ્દસ્પર્શૌ ચ વાયોશ્ચ દ્વૌ ગુણૌ પરિકીર્તિતૌ ॥ ૪૯॥

અગ્નેઃ શબ્દશ્ચ સ્પર્શશ્ચ રૂપમેતે ત્રયો ગુણાઃ ।
શબ્દસ્પર્શરૂપરસાશ્ચત્વારો વૈ જલસ્ય ચ ॥ ૫૦॥

સ્પર્શશબ્દરસા રૂપં ગન્ધશ્ચ પૃથિવીગુણાઃ ।
એવં મિલિતયોગૈશ્ચ બ્રહ્માણ્ડોત્પત્તિરુચ્યતે ॥ ૫૧॥

સર્વે જીવા મિલિત્વૈવ બ્રહ્માણ્ડાંશસમુદ્ભવાઃ ।
ચતુરશીતિલક્ષાશ્ચ પ્રોક્તા વૈ જીવજાતયઃ ॥ ૫૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે તત્ત્વનિરૂપણવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૩.૭॥

## ૩.૮ અષ્ટમોઽધ્યાયઃ । ગુણાનાં રૂપસંસ્થાનાદિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
સર્ગોઽયં કથિતસ્તાત યત્પૃષ્ટોઽહં ત્વયાઽધુના ।

ગુણાનાં રૂપસંસ્થાં વૈ શ‍ૃણુષ્વૈકાગ્રમાનસઃ ॥ ૧॥

સત્ત્વં પ્રીત્યાત્મકં જ્ઞેયં સુખાત્પ્રીતિસમુદ્ભવઃ ।
આર્જવં ચ તથા સત્યં શૌચં શ્રદ્ધા ક્ષમા ધૃતિઃ ॥ ૨॥

અનુકમ્પા તથા લજ્જા શાન્તિઃ સન્તોષ એવ ચ ।
એતૈઃ સત્ત્વપ્રતીતિશ્ચ જાયતે નિશ્ચલા સદા ॥ ૩॥

શ્વેતવર્ણં તથા સત્ત્વં ધર્મે પ્રીતિકરઃ સદા ।
સચ્છ્રદ્ધોત્પાદકં નિત્યમસચ્છ્રદ્ધાનિવારકમ્ ॥ ૪॥

સાત્ત્વિકી રાજસી ચૈવ તામસી ચ તથાપરા ।
શ્રદ્ધા તુ ત્રિવિધા પ્રોક્તા મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૫॥

રક્તવર્ણં રજઃ પ્રોક્તમપ્રીતિકરમદ્ભુતમ્ ।
અપ્રીતિર્દુઃખયોગત્વાદ્ભવત્યેવ સુનિશ્ચિતા ॥ ૬॥

પ્રદ્વેષોઽથ તથા દ્રોહો મત્સરઃ સ્તમ્ભ એવ ચ ।
ઉત્કણ્ઠા ચ તથા નિદ્રા શ્રદ્ધા તત્ર ચ રાજસી ॥ ૭॥

માનો મદસ્તથા ગર્વો રજસા કિલ જાયતે ।
પ્રત્યેતવ્યં રજસ્ત્વેતૈર્લક્ષણૈશ્ચ વિચક્ષણૈઃ ॥ ૮॥

કૃષ્ણવર્ણં તમઃ પ્રોક્તં મોહનં ચ વિષાદકૃત્ ।
આલસ્યં ચ તથાઽજ્ઞાનં નિદ્રા દૈન્યં ભયં તથા ॥ ૯॥

વિવાદશ્ચૈવ કાર્પણ્યં કૌટિલ્યં રોષ એવ ચ ।
વૈષમ્યં વાતિનાસ્તિક્યં પરદોષાનુદર્શનમ્ ॥ ૧૦॥

પ્રત્યેતવ્યં તમસ્ત્વેતૈર્લક્ષણૈઃ સર્વથા બુધૈઃ ।
તામસ્યા શ્રદ્ધયા યુક્તં પરતાપોપપાદકમ્ ॥ ૧૧॥

સત્ત્વં પ્રકાશયિતવ્યં નિયન્તવ્યં રજઃ સદા ।
સંહર્તવ્યં તમઃ કામં જનેન શુભમિચ્છતા ॥ ૧૨॥

અન્યોન્યાભિભવાચ્ચૈતે વિરુધ્યન્તિ પરસ્પરમ્ ।
તથોઽન્યોન્યાશ્રયાઃ સર્વે ન તિષ્ઠન્તિ નિરાશ્રયાઃ ॥ ૧૩॥

સત્ત્વં ન કેવલં ક્વાપિ ન રજો ન તમસ્તથા ।
મિલિતાશ્ચ સદા સર્વે તેનાન્યોન્યાશ્રયાઃ સ્મૃતાઃ ॥ ૧૪॥

અન્યોન્યમિથુનાચ્ચૈવ વિસ્તારં કથયામ્યહમ્ ।
શ‍ૃણુ નારદ યજ્જ્ઞાત્વા મુચ્યતે ભવબન્ધનાત્ ॥ ૧૫॥

સન્દેહોઽત્ર ન કર્તવ્યો જ્ઞાત્વેત્યુક્તં મયા વચઃ ।
જ્ઞાતં તદનુભૂતં યત્પરિજ્ઞાતં ફલે સતિ ॥ ૧૬॥

શ્રવણાદ્દર્શનાચ્ચૈવ સપદ્યેવ મહામતે ।
સંસ્કારાનુભવાચ્ચૈવ પરિજ્ઞાતં ન જાયતે ॥ ૧૭॥

શ્રુતં તીર્થં પવિત્રઞ્ચ શ્રદ્ધોત્પન્ના ચ રાજસી ।
નિર્ગતસ્તત્ર તીર્થે વૈ દૃષ્ટં ચૈવ યથાશ્રુતમ્ ॥ ૧૮॥

સ્નાતસ્તત્ર કૃતં કૃત્યં દત્તં દાનં ચ રાજસમ્ ।
સ્થિતસ્તત્ર કિયત્કાલં રજોગુણસમાવૃતઃ ॥ ૧૯॥

રાગદ્વેષાન્ન નિર્મુક્તઃ કામક્રોધસમાવૃતઃ ।
પુનરેવ ગૃહં પ્રાપ્તો યથાપૂર્વં તથા સ્થિતઃ ॥ ૨૦॥

શ્રુતં ચ નાનુભૂતં વૈ તેન તીર્થં મુનીશ્વર ।
ન પ્રાપ્તં ચ ફલં યસ્માદશ્રુતં વિદ્ધિ નારદ ॥ ૨૧॥

નિષ્પાપત્વં બલં વિદ્ધિ તીર્થસ્ય મુનિસત્તમ ।
કૃષેઃ ફલં યથા લોકે નિષ્પન્નાન્નસ્ય ભક્ષણમ્ ॥ ૨૨॥

પાપદેહવિકારા યે કામક્રોધાદયઃ પરે ।
લોભો મોહસ્તથા તૃષ્ણા દ્વેષો રાગસ્તથા મદઃ ॥ ૨૩॥

અસૂયેર્ષ્યાક્ષમાશાન્તિઃ પાપાન્યેતાનિ નારદ ।
ન નિર્ગતાનિ દેહાત્તુ તાવત્પાપયુતો નરઃ ॥ ૨૪॥

કૃતે તીર્થે યદૈતાનિ દેહાન્ન નિર્ગતાનિ ચેત્ ।
નિષ્ફલઃ શ્રમ એવૈકઃ કર્ષકસ્ય યથા તથા ॥ ૨૫॥

શ્રમેણાપીડિતં ક્ષેત્રં કૃષ્ટા ભૂમિઃ સુદુર્ઘટા ।
ઉપ્તં બીજં મહાર્ઘં ચ હિતા વૃત્તિરુદાહૃતા ॥ ૨૬॥

અહોરાત્રં પરિક્લિષ્ટો રક્ષણાર્થં ફલોત્સુકઃ ।
કાલે સુપ્તસ્તુ હેમન્તે વને વ્યાઘ્રાદિભિર્ભૃશમ્ ॥ ૨૭॥

ભક્ષિતં શલભૈઃ સર્વં નિરાશશ્ચ કૃતઃ પુનઃ ।
તદ્વત્તીર્થશ્રમઃ પુત્ર કષ્ટદો ન ફલપ્રદઃ ॥ ૨૮॥

સત્ત્વં સમુત્કટં જાતં પ્રવૃદ્ધં શાસ્ત્રદર્શનાત્ ।
વૈરાગ્યં તત્ફલં જાતં તામસાર્થેષુ નારદ ॥ ૨૯॥

પ્રસહ્યાભિભવત્યેવ તદ્રજસ્તમસી ઉભે ।
રજઃ સમુત્કટં જાતં પ્રવૃત્તં લોભયોગતઃ ॥ ૩૦॥

તત્તથાભિભવત્યેવ તમઃસત્ત્વે તથા ઉભે ।
તમસ્તથોત્કટં ભૂત્વા પ્રવૃદ્ધં મોહયોગતઃ ॥ ૩૧॥

તત્સત્ત્વરજસી ચોભે સઙ્ગમ્યાભિભવત્યપિ ।
વિસ્તરં કથયામ્યદ્ય યથાભિભવતીતિ વૈ ॥ ૩૨॥

યદા સત્ત્વં પ્રવૃદ્ધં વૈ મતિર્ધર્મે સ્થિતા તદા ।
ન ચિન્તયતિ બાહ્યાર્થં રજસ્તમઃસમુદ્ભવમ્ ॥ ૩૩॥

અર્થં સત્ત્વસમુદ્ભૂતં ગૃહ્ણાતિ ચ ન ચાન્યથા ।
અનાયાસકૃતં ચાર્થં ધર્મં યજ્ઞં ચ વાઞ્છતિ ॥ ૩૪॥

સાત્ત્વિકેષ્વેવ ભોગેષુ કામં વૈ કુરુતે તદા ।
રાજસેષુ ન મોક્ષાર્થં તામસેષુ પુનઃ કુતઃ ॥ ૩૫॥

એવં જિત્વા રજઃ પૂર્વં તતશ્ચ તમસો જયઃ ।
સત્ત્વં ચ કેવલં પુત્ર તદા ભવતિ નિર્મલમ્ ॥ ૩૬॥

યદા રજઃ પ્રવૃદ્ધં વૈ ત્યક્ત્વા ધર્માન્ સનાતનાન્ ।
અન્યથાકુરુતે ધર્માચ્છ્રદ્ધાં પ્રાપ્ય તુ રાજસીમ્ ॥ ૩૭॥

રાજસાદર્થસંવૃદ્ધિસ્તથા ભોગસ્તુ રાજસઃ ।
સત્ત્વં વિનિર્ગતં તેન તમસશ્ચાપિ નિગ્રહઃ ॥ ૩૮॥

યદા તમો વિવૃદ્ધં સ્યાદુત્કટં સમ્બભૂવ હ ।
તદા વેદે ન વિશ્વાસો ધર્મશાસ્ત્રે તથૈવ ચ ॥ ૩૯॥

શ્રદ્ધાં ચ તામસીં પ્રાપ્ય કરોતિ ચ ધનાત્યયમ્ ।
દ્રોહં સર્વત્ર કુરુતે ન શાન્તિમધિગચ્છતિ ॥ ૪૦॥

જિત્વા સત્ત્વં રજશ્ચૈવ ક્રોધનો દુર્મતિઃ શઠઃ ।
વર્તતે કામચારેણ ભાવેષુ વિતતેષુ ચ ॥ ૪૧॥

એકં સત્ત્વં ન ભવતિ રજશ્ચૈકં તમસ્તથા ।

સહૈવાશ્રિત્ય વર્તન્તે ગુણા મિથુનધર્મિણઃ ॥ ૪૨॥

રજો વિના ન સત્ત્વં સ્યાદ્રજઃ સત્ત્વં વિના ક્વચિત્ ।
તમો વિના ન ચૈવૈતે વર્તન્તે પુરુષર્ષભ ॥ ૪૩॥

તમસ્તાભ્યાં વિહીનં તુ કેવલં ન કદાચન ।
સર્વે મિથુનધર્માણો ગુણાઃ કાર્યાન્તરેષુ વૈ ॥ ૪૪॥

અન્યોન્યસંશ્રિતાઃ સર્વે તિષ્ઠન્તિ ન વિયોજિતાઃ ।
અન્યોન્યજનકાશ્ચૈવ યતઃ પ્રસવધર્મિણઃ ॥ ૪૫॥

સત્ત્વં કદાચિચ્ચ રજસ્તમસી જનયત્યુત ।
કદાચિત્તુ રજઃ સત્ત્વતમસી જનયત્યપિ ॥ ૪૬॥

કદાચિત્તુ તમઃ સત્ત્વરજસી જનયત્યુભે ।
જનયન્ત્યેવમન્યોન્યં મૃત્પિણ્ડશ્ચ ઘટં યથા ॥ ૪૭॥

બુદ્ધિસ્થાસ્તે ગુણાઃ કામાન્બોધયન્તિ પરસ્પરમ્ ।
દેવદત્તવિષ્ણુમિત્રયજ્ઞદત્તાદયો યથા ॥ ૪૮॥

યથા સ્ત્રીપુરુષશ્ચૈવ મિથુનૌ ચ પરસ્પરમ્ ।
તથા ગુણાઃ સમાયાન્તિ યુગ્મભાવં પરસ્પરમ્ ॥ ૪૯॥

રજસો મિથુને સત્ત્વં સત્ત્વસ્ય મિથુને રજઃ ।
ઉભે તે સત્ત્વરજસી તમસો મિથુને વિદુઃ ॥ ૫૦॥

નારદ ઉવાચ ।
ઇત્યેતત્કથિતં પિત્રા ગુણરૂપમનુત્તમમ્ ।
શ્રુત્વાપ્યેતત્સ એવાહં તતોઽપૃચ્છં પિતામહમ્ ॥ ૫૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે ગુણાનાં રૂપસંસ્થાનાદિવર્ણનં નામ અષ્ટમોઽધ્યાયઃ ॥ ૩.૮॥

## ૩.૯ નવમોઽધ્યાયઃ । ગુણાનાં ગુણપરિજ્ઞાનવર્ણનમ્ ।

નારદ ઉવાચ ।
ગુણાનાં લક્ષણં તાત ભવતા કથિતં કિલ ।
ન તૃપ્તોઽસ્મિ પિબન્મિષ્ટં ત્વન્મુખાત્પ્રચ્યુતં રસમ્ ॥ ૧॥

ગુણાનાં તુ પરિજ્ઞાનં યથાવદનુવર્ણય ।

યેનાહં પરમાં શાન્તિમધિગચ્છામિ ચેતસિ ॥ ૨॥

વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટસ્તુ પુત્રેણ નારદેન મહાત્મના ।
ઉવાચ ચ જગત્કર્તા રજોગુણસમુદ્ભવઃ ॥ ૩॥

બ્રહ્મોવાચ ।
શ‌ૃણુ નારદ વક્ષ્યામિ ગુણાનાં પરિવર્ણનમ્ ।
સમ્યઙ્ નાહં વિજાનામિ યથામતિ વદામિ તે ॥ ૪॥

સત્ત્વં તુ કેવલં નૈવ કુત્રાપિ પરિલક્ષ્યતે ।
મિશ્રીભાવાત્તુ તેષાં વૈ મિશ્રત્વં પ્રતિભાતિ વૈ ॥ ૫॥

યથા કાચિદ્વરા નારી સર્વભૂષણભૂષિતા ।
હાવભાવયુતા કામં ભર્તુઃ પ્રીતિકરી ભવેત્ ॥ ૬॥

માતાપિત્રોસ્તથા સૈવ બન્ધુવર્ગસ્ય પ્રીતિદા ।
દુઃખં મોહં સપત્નીષુ જનયત્યપિ સૈવ હિ ॥ ૭॥

એવં સત્ત્વેન તેનૈવ સ્ત્રીત્વમાપાદિતેન ચ ।
રજસસ્તમસશ્ચૈવ જનિતા વૃત્તિરન્યથા ॥ ૮॥

રજસા સ્ત્રીકૃતેનૈવ તમસા ચ તથા પુનઃ ।
અન્યોન્યસ્ય સમાયોગાદન્યથા પ્રતિભાતિ વૈ ॥ ૯॥

અવસ્થાનાત્સ્વભાવેષુ ન વૈ જાત્યન્તરાણિ ચ ।
લક્ષ્યતે વિપરીતાનિ યોગાન્નારદ કુત્રચિત્ ॥ ૧૦॥

યથા રૂપવતી નારી યૌવનેન વિભૂષિતા ।
લજ્જામાધુર્યયુક્તા ચ તથા વિનયસંયુતા ॥ ૧૧॥

કામશાસ્ત્રવિધિજ્ઞા ચ ધર્મશાસ્ત્રેઽપિ સમ્મતા ।
ભર્તુઃપ્રીતિકરી ભૂત્વા સપત્નીનાં ચ દુઃખદા ॥ ૧૨॥

મોહદુઃખસ્વભાવસ્થા સત્ત્વસ્થેત્યુચ્યતે જનૈઃ ।
તથા સત્ત્વં વિકુર્વાણમન્યભાવં વિભાતિ વૈ ॥ ૧૩॥

ચોરૈરુપદ્રુતાનાં હિ સાધૂનાં સુખદા ભવેત્ ।
દુઃખા મૂઢા ચ દસ્યૂનાં સૈવ સેના તથાગુણા ॥ ૧૪॥

વિપરીતપ્રતીતિં વૈ વર્જયન્તિ સ્વભાવતઃ ।

યથા ચ દુર્દિનં જાતં મહામેઘઘનાવૃતમ્ ॥ ૧૫॥

વિદ્યુત્સ્તનિતસંયુક્તં તિમિરેણાવગુણ્ઠિતમ્ ।
સિઞ્ચદ્ભૂમિં પ્રવર્ષદ્વૈ તમોરૂપમુદાહૃતમ્ ॥ ૧૬॥

યદેતત્કર્ષકાણાં વૈ તદેવાતીવ દુર્દિનમ્ ।
બીજોપસ્કરયુક્તાનાં સુખદં પ્રભવત્યુત ॥ ૧૭॥

અપ્રચ્છન્નગૃહાણાં ચ દુર્ભગાનાં વિશેષતઃ ।
તૃણકાષ્ઠગૃહીતાનાં દુઃખદં ગૃહમેધિનામ્ ॥ ૧૮॥

પ્રોષિતભર્તૃકાણાં વૈ મોહદં પ્રવદન્ત્યપિ ।
સ્વભાવસ્થા ગુણાઃ સર્વે વિપરીતા વિભાન્તિ વૈ ॥ ૧૯॥

લક્ષણાનિ પુનસ્તેષાં શ ૃણુ પુત્ર બ્રવીમ્યહમ્ ।
લઘુપ્રકાશકં સત્ત્વં નિર્મલં વિશદં સદા ॥ ૨૦॥

યદાઽઙ્ગાનિ લઘૂન્યેવ નેત્રાદીનીન્દ્રિયાણિ ચ ।
નિર્મલં ચ તથા ચેતો ગૃહ્ણાતિ વિષયાન્ન તાન્ ॥ ૨૧॥

તદા સત્ત્વં શરીરે વૈ મન્તવ્યઞ્ચ સમુત્કટમ્ ।
જૃમ્ભાં સ્તમ્ભં ચ તન્દ્રાં ચ ચલઞ્ચૈવ રજઃ પુનઃ ॥ ૨૨॥

યદા તદુત્કટં જાતં દેહે યસ્ય ચ કસ્યચિત્ ।
કલિં મૃગયતે કર્તું ગન્તું ગ્રામાન્તરં તથા ॥ ૨૩॥

ચલચિત્તસ્ય સોઽત્યર્થં વિવાદે ચોદ્યતસ્તથા ।
ગુરુમાવરણં કામં તમો ભવતિ તદ્યદા ॥ ૨૪॥

તદાઽઙ્ગાનિ ગુરૂણ્યાશુ પ્રભવન્ત્યાવૃતાનિ ચ ।
ઇન્દ્રિયાણિ મનઃ શૂન્યં નિદ્રાં નૈવાભિવાઞ્છતિ ॥ ૨૫॥

ગુણાનાં લક્ષણાન્યેવં વિજ્ઞેયાનીહ નારદ ।
નારદ ઉવાચ ।
વિભિન્નલક્ષણાઃ પ્રોક્તાઃ પિતામહ ગુણાસ્ત્રયઃ ॥ ૨૬॥

કથમેકત્ર સંસ્થાને કાર્યં કુર્વન્તિ શાશ્વતમ્ ।
પરસ્પરં મિલિત્વા હિ વિભિન્નાઃ શત્રવઃ કિલ ॥ ૨૭॥

એકત્રસ્થાઃ કથં કાર્યં કુર્વન્તીતિ વદસ્વ મે ।
બ્રહ્મોવાચ ।

શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ ગુણાસ્તે દીપવૃત્તયઃ ॥ ૨૮॥

પ્રદીપશ્ચ યથા કાર્યં પ્રકરોત્યર્થદર્શનમ્ ।
વર્તિસ્તૈલં યથાર્ચિશ્ચ વિરુદ્ધાશ્ચ પરસ્પરમ્ ॥ ૨૯॥

વિરુદ્ધં હિ તથા તૈલમગ્નિના સહ સઙ્ગતમ્ ।
તૈલં વર્તિવિરોધ્યેવ પાવકોઽપિ પરસ્પરમ્ ॥ ૩૦॥

એકત્રસ્થાઃ પદાર્થાનાં પ્રકુર્વન્તિ પ્રદર્શનમ્ ।
નારદ ઉવાચ ।
એવં પ્રકૃતિજાઃ પ્રોક્તા ગુણાઃ સત્યવતીસુત ॥ ૩૧॥

વિશ્વસ્ય કારણં તે વૈ મયા પૂર્વં યથા શ્રુતમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્તં નારદેનાથ મમ સર્વં સવિસ્તરમ્ ॥ ૩૨॥

ગુણાનાં લક્ષણં સર્વં કાર્યં ચૈવ વિભાગશઃ ।
આરાધ્યા પરમા શક્તિર્યયા સર્વમિદં તતમ્ ॥ ૩૩॥

સગુણા નિર્ગુણા ચૈવ કાર્યભેદે સદૈવ હિ ।
અકર્તા પુરુષઃ પૂર્ણો નિરીહઃ પરમોઽવ્યયઃ ॥ ૩૪॥

કરોત્યેષા મહામાયા વિશ્વં સદસદાત્મકમ્ ।
બ્રહ્મા વિષ્ણુસ્તથા રુદ્રઃસૂર્યશ્ચન્દ્રઃ શચીપતિઃ ॥ ૩૫॥

અશ્વિનૌ વસવસ્ત્વષ્ટા કુબેરો યાદસાં પતિઃ ।
વહ્નિર્વાયુસ્તથા પૂષા સેનાનીશ્ચ વિનાયકઃ ॥ ૩૬॥

સર્વે શક્તિયુતાઃ શક્તાઃ કર્તું કાર્યાણિ સ્વાનિ ચ ।
અન્યથા તેઽપ્યશક્તા વૈ પ્રસ્પન્દિતુમનીશ્વરાઃ ॥ ૩૭॥

સા ચૈવ કારણં રાજન્ જગતઃ પરમેશ્વરી ।
સમારાધય તાં ભૂપ કુરુ યજ્ઞં જનાધિપ ॥ ૩૮॥

પૂજનં પરયા ભક્ત્યા તસ્યા એવ વિધાનતઃ ।
મહાલક્ષ્મીર્મહાકાલી તથા મહાસરસ્વતી ॥ ૩૯॥

ઈશ્વરી સર્વભૂતાનાં સર્વકારણકારણમ્ ।
સર્વકામાર્થદા શાન્તા સુખસેવ્યા દયાન્વિતા ॥ ૪૦॥

નામોચ્ચારણમાત્રેણ વાઞ્છિતાર્થફલપ્રદા ।

દેવૈરારાધિતા પૂર્વં બ્રહ્મવિષ્ણુમહેશ્વરૈઃ ॥ ૪૧॥

મોક્ષકામૈશ્ચ વિવિધૈસ્તાપસૈર્વિજિતાત્મભિઃ ।
અસ્પષ્ટમપિ યન્નામ પ્રસઙ્ગેનાપિ ભાષિતમ્ ॥ ૪૨॥

દદાતિ વાઞ્છિતાનર્થાન્દુર્લભાનપિ સર્વથા ।
ઐ ઐ ઇતિ ભયાર્તેન દૃષ્ટ્વા વ્યાઘ્રાદિકં વને ॥ ૪૩॥

બિન્દુહીનમપીત્યુક્તં વાઞ્છિતં પ્રદદાતિ વૈ ।
તત્ર સત્યવ્રતસ્યૈવ દૃષ્ટાન્તો નૃપસત્તમ ॥ ૪૪॥

પ્રત્યક્ષ એવ ચાસ્માકં મુનીનાં ભાવિતાત્મનામ્ ।
બ્રાહ્મણાનાં સમાજેષુ તસ્યોદાહરણં બુધૈઃ ॥ ૪૫॥

કથ્યમાનં મયા રાજઞ્છ્રુતં સર્વં સવિસ્તરમ્ ।
અનક્ષરો મહામૂર્ખો નામ્ના સત્યવ્રતો દ્વિજઃ ॥ ૪૬॥

શ્રુત્વાઽક્ષરં કોલમુખાત્સમુચ્ચાર્ય સ્વયં તતઃ ।
બિન્દુહીનં પ્રસઙ્ગેન જાતોઽસૌ વિબુધોત્તમઃ ॥ ૪૭॥

ઐકારોચ્ચારણાદ્દેવી તુષ્ટા ભગવતી તદા ।
ચકાર કવિરાજં તં દયાર્દ્રા પરમેશ્વરી ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે ગુણપરિજ્ઞાનવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૩.૯॥

## ૩.૧૦ દશમોઽધ્યાયઃ । સત્યવ્રતાખ્યાનવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કોઽસૌ સત્યવ્રતો નામ બ્રાહ્મણો દ્વિજસત્તમઃ ।
કસ્મિન્દેશે સમુત્પન્નઃ કીદૃશશ્ચ વદસ્વ મે ॥ ૧॥

કથં તેન શ્રુતઃ શબ્દઃ કથમુચ્ચારિતઃ પુનઃ ।
સિદ્ધિશ્ચ કીદૃશી જાતા તસ્ય વિપ્રસ્ય તત્ક્ષણાત્ ॥ ૨॥

કથં તુષ્ટા ભવાની સા સર્વજ્ઞા સર્વસંસ્થિતા ।
વિસ્તરેણ વદસ્વાદ્ય કથામેતાં મનોરમામ્ ॥ ૩॥

સૂત ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા રાજ્ઞા વ્યાસઃ સત્યવતીસુતઃ ।

ઉવાચ પરમોદારં વચનં રસવચ્છુચિ ॥ ૪॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ કથાં પૌરાણિકીં શુભામ્ ।
શ્રુતા મુનિસમાજેષુ મયા પૂર્વં કુરૂદ્વહ ॥ ૫॥

એકદાઽહં કુરુશ્રેષ્ઠ કુર્વંસ્તીર્થાટનં શુચિ ।
સમ્પ્રાપ્તો નૈમિષારણ્યં પાવનં મુનિસેવિતમ્ ॥ ૬॥

પ્રણમ્યાહં મુનીન્સર્વાન્ સ્થિતસ્તત્ર વરાશ્રમે ।
વિધિપુત્રાસ્તુ યત્રાસઞ્જીવન્મુક્તા મહાવ્રતાઃ ॥ ૭॥

કથાપ્રસઙ્ગ એવાસીત્તત્ર વિપ્રસમાગમે ।
જમદગ્નિસ્તુ પપ્રચ્છ મુનીનેવં સમાસ્થિતઃ ॥ ૮॥

જમદગ્નિરુવાચ ।
સન્દેહોઽસ્તિ મહાભાગા મમ ચેતસિ તાપસાઃ ।
સમાજેષુ મુનીનાં વૈ નિઃસન્દેહો ભવામ્યહમ્ ॥ ૯॥

બ્રહ્મા વિષ્ણુસ્તથા રુદ્રો મઘવા વરુણોઽનલઃ ।
કુબેરઃ પવનસ્ત્વષ્ટા સેનાનીશ્ચ ગણાધિપઃ ॥ ૧૦॥

સૂર્યોઽશ્વિનૌ ભગઃ પૂષા નિશાનાથો ગ્રહાસ્તથા ।
આરાધનીયતમઃ કોઽત્ર વાઞ્છિતાર્થફલપ્રદઃ ॥ ૧૧॥

સુખસેવ્યશ્ચ સતતં ચાશુતોષશ્ચ માનદાઃ ।
બ્રુવન્તુ મુનયઃ શીઘ્રં સર્વજ્ઞાઃ સંશિતવ્રતાઃ ॥ ૧૨॥

એવં પ્રશ્ને કૃતે તત્ર લોમશો વાક્યમબ્રવીત્ ।
જમદગ્ને શ‍ૃણુષ્વૈતદ્યત્પૃષ્ટં વૈ ત્વયાઽધુના ॥ ૧૩॥

સેવનીયતમા શક્તિઃ સર્વેષાં શુભમિચ્છતામ્ ।
પરા પ્રકૃતિરાદ્યા ચ સર્વગા સર્વદા શિવા ॥ ૧૪॥

દેવાનાં જનની સૈવ બ્રહ્માદીનાં મહાત્મનામ્ ।
આદિપ્રકૃતિમૂલં સા સંસારપાદપસ્ય વૈ ॥ ૧૫॥

સ્મૃતા ચોચ્ચારિતા દેવી દદાતિ કિલ વાઞ્છિતમ્ ।
સર્વૈર્દેવાર્દ્રચિત્તા સા વરદાનાય સેવિતા ॥ ૧૬॥

ઇતિહાસં પ્રવક્ષ્યામિ શ‍ૃણ્વન્તુ મુનયઃ શુભમ્ ।

અક્ષરોચ્ચારણાદેવ યથા પ્રાપ્તં દ્વિજેન વૈ ॥ ૧૭॥

કોસલેષુ દ્વિજઃ કશ્ચિદ્દેવદત્તેતિ વિશ્રુતઃ ।
અનપત્યશ્ચકારેષ્ટિં પુત્રાય વિધિપૂર્વકમ્ ॥ ૧૮॥

તમસાતીરમાસ્થાય કૃત્વા મણ્ડપમુત્તમમ્ ।
દ્વિજાનાહૂય વેદજ્ઞાન્સત્રકર્મવિશારદાન્ ॥ ૧૯॥

કૃત્વા વેદીં વિધાનેન સ્થાપયિત્વા વિભાવસૂન્ ।
પુત્રેષ્ટિં વિધિવત્તત્ર ચકાર દ્વિજસત્તમઃ ॥ ૨૦॥

બ્રહ્માણં કલ્પયામાસ સુહોત્રં મુનિસત્તમમ્ ।
અધ્વર્યું યાજ્ઞવલ્ક્યં ચ હોતારં ચ બૃહસ્પતિમ્ ॥ ૨૧॥

પ્રસ્તોતારં તથા પૈલમુદ્ગાતારં ચ ગોભિલમ્ ।
સભ્યાનન્યાન્મુનીન્કૃત્વા વિધિવત્પ્રદદૌ વસુ ॥ ૨૨॥

ઉદ્ગાતા સામગઃ શ્રેષ્ઠઃ સપ્તસ્વરસમન્વિતમ્ ।
રથન્તરમગાયત્તુ સ્વરિતેન સમન્વિતમ્ ॥ ૨૩॥

તદાઽસ્ય સ્વરભઙ્ગોઽભૂત્કૃતે શ્વાસે મુહુર્મુહુઃ ।
દેવદત્તશ્ચુકોપાશુ ગોભિલં પ્રત્યુવાચ હ ॥ ૨૪॥

મૂર્ખોઽસિ મુનિમુખ્યાદ્ય સ્વરભઙ્ગસ્ત્વયા કૃતઃ ।
કામ્યકર્મણિ સઞ્જાતે પુત્રાર્થં યજતશ્ચ મે ॥ ૨૫॥

ગોભિલસ્તુ તદોવાચ દેવદત્તં સુકોપિતઃ ।
મૂર્ખસ્તે ભવિતા પુત્રઃ શઠઃ શબ્દવિવર્જિતઃ ॥ ૨૬॥

સર્વપ્રાણિશરીરે તુ શ્વાસોચ્છ્વાસઃ સુદુર્ગ્રહઃ ।
ન મેઽત્ર દૂષણં કિઞ્ચિત્સ્વરભઙ્ગે મહામતે ॥ ૨૭॥

તચ્છ્રુત્વા વચનં તસ્ય ગોભિલસ્ય મહાત્મનઃ ।
શાપાદ્ભીતો દેવદત્તસ્તમુવાચાતિદુઃખિતઃ ॥ ૨૮॥

કથં ક્રુદ્ધોઽસિ વિપ્રેન્દ્ર વૃથા મયિ નિરાગસિ ।
અક્રોધના હિ મુનયો ભવન્તિ સુખદાઃ સદા ॥ ૨૯॥

સ્વલ્પેઽપરાધે વિપ્રેન્દ્ર કથં શપ્તસ્ત્વયા હ્યહમ્ ।
અપુત્રોઽહં સુતપ્તઃ પ્રાક્ તાપયુક્તઃ પુનઃ કૃતઃ ॥ ૩૦॥

મૂર્ખપુત્રાદપુત્રત્વં વરં વેદવિદો વિદુઃ ।
તથાપિ બ્રાહ્મણો મૂર્ખઃ સર્વેષાં નિન્દ્ય એવ હિ ॥ ૩૧॥

પશુવચ્છૂદ્રવચ્ચૈવ ન યોગ્યઃ સર્વકર્મસુ ।
કિં કરોમીહ મૂર્ખેણ પુત્રેણ દ્વિજસત્તમ ॥ ૩૨॥

યથા શૂદ્રસ્તથા મૂર્ખો બ્રાહ્મણો નાત્ર સંશયઃ ।
ન પૂજાર્હો ન દાનાર્હો નિન્દ્યશ્ચ સર્વકર્મસુ ॥ ૩૩॥

દેશે વૈ વસમાનશ્ચ બ્રાહ્મણો વેદવર્જિતઃ ।
કરદઃ શૂદ્રવચ્ચૈવ મન્તવ્યઃ સ ચ ભૂભુજા ॥ ૩૪॥

નાસને પિતૃકાર્યેષુ દેવકાર્યેષુ સ દ્વિજઃ ।
મૂર્ખઃ સમુપવેશ્યશ્ચ કાર્યશ્ચ ફલમિચ્છતા ॥ ૩૫॥

રાજ્ઞા શૂદ્રસમો જ્ઞેયો ન યોજ્યઃ સર્વકર્મસુ ।
કર્ષકસ્તુ દ્વિજઃ કાર્યો બ્રાહ્મણો વેદવર્જિતઃ ॥ ૩૬॥

વિના વિપ્રેણ કર્તવ્યં શ્રાદ્ધં કુશચટેન વૈ ।
ન તુ વિપ્રેણ મૂર્ખેણ શ્રાદ્ધં કાર્યં કદાચન ॥ ૩૭॥

આહારાદધિકં ચાન્નં ન દાતવ્યમપણ્ડિતે ।
દાતા નરકમાપ્નોતિ ગ્રહીતા તુ વિશેષતઃ ॥ ૩૮॥

ધિગ્રાજ્યં તસ્ય રાજ્ઞો વૈ યસ્ય દેશેઽબુધા જનાઃ ।
પૂજ્યન્તે બ્રાહ્મણા મૂર્ખા દાનમાનાદિકૈરપિ ॥ ૩૯॥

આસને પૂજને દાને યત્ર ભેદો ન ચાણ્વપિ ।
મૂર્ખપણ્ડિતયોર્ભેદો જ્ઞાતવ્યો વિબુધેન વૈ ॥ ૪૦॥

મૂર્ખા યત્ર સુગર્વિષ્ઠા દાનમાનપરિગ્રહૈઃ ।
તસ્મિન્દેશે ન વસ્તવ્યં પણ્ડિતેન કથઞ્ચન ॥ ૪૧॥

અસતામુપકારાય દુર્જનાનાં વિભૂતયઃ ।
પિચુમન્દઃ ફલાઢ્યોઽપિ કાકૈરેવોપભુજ્યતે ॥ ૪૨॥

ભુક્ત્વાન્નં વેદવિદ્વિપ્રો વેદાભ્યાસં કરોતિ વૈ ।
ક્રીડન્તિ પૂર્વજાસ્તસ્ય સ્વર્ગે પ્રમુદિતાઃ કિલ ॥ ૪૩॥

ગોભિલાતઃ વિમુક્તં વૈ ત્વયા વેદવિદુત્તમ ।
સંસારે મૂર્ખપુત્રત્વં મરણાદતિગર્હિતમ્ ॥ ૪૪॥

કૃપાં કુરુ મહાભાગ શાપસ્યાનુગ્રહં પ્રતિ ।
દીનોદ્ધારણશક્તોઽસિ પતામિ તવ પાદયોઃ ॥ ૪૫॥

લોમશ ઉવાચ ।
ઇત્યુક્ત્વા દેવદત્તસ્તુ પતિતસ્તસ્ય પાદયોઃ ।
સ્તુવન્દીનહૃદત્યર્થં કૃપણઃ સાશ્રુલોચનઃ ॥ ૪૬॥

ગોભિલસ્તુ તદા તત્ર દૃષ્ટ્વા તં દીનચેતસમ્ ।
ક્ષણકોપા મહાન્તો વૈ પાપિષ્ઠાઃ કલ્પકોપનાઃ ॥ ૪૭॥

જલં સ્વભાવતઃ શીતં પાવકાતપયોગતઃ ।
ઉષ્ણં ભવતિ તચ્છીઘ્રં તદ્વિના શિશિરં ભવેત્ ॥ ૪૮॥

દયાવાન્ગોભિલસ્ત્વાહ દેવદત્તં સુદુઃખિતમ્ ।
મૂર્ખો ભૂત્વા સુતસ્તે વૈ વિદ્વાનપિ ભવિષ્યતિ ॥ ૪૯॥

ઇતિ દત્તવરઃ સોઽથ મુદિતોઽભૂદ્દ્વિજર્ષભઃ ।
ઇષ્ટિં સમાપ્ય વિપ્રાન્વૈ વિસસર્જ યથાવિધિ ॥ ૫૦॥

કાલેન કિયતા તસ્ય ભાર્યા રૂપમતી સતી ।
ગર્ભં દધાર કાલે સા રોહિણી રોહિણીસમા ॥ ૫૧॥

ગર્ભાધાનાદિકં કર્મ ચકાર વિધિવદ્દ્વિજઃ ।
પુંસવનવિધાનઞ્ચ શ‍ૃઙ્ગારકરણં તથા ॥ ૫૨॥

સીમન્તોન્નયનઞ્ચૈવ કૃતં વેદવિધાનતઃ ।
દદૌ દાનાનિ મુદિતો મત્વેષ્ટિં સફલાં તથા ॥ ૫૩॥

શુભેઽહ્નિ સુષુવે પુત્રં રોહિણી રોહિણીયુતે ।
દિને લગ્ને શુભેઽત્યર્થં જાતકર્મ ચકાર સઃ ॥ ૫૪॥

પુત્રદર્શનકં કૃત્વા નામકર્મ ચકાર ચ ।
ઉતથ્ય ઇતિ પુત્રસ્ય કૃતં નામ પુરાવિદા ॥ ૫૫॥

સ ચાષ્ટમે તથા વર્ષે શુભે વૈ શુભવાસરે ।
તસ્યોપનયનં કર્મ ચકાર વિધિવત્પિતા ॥ ૫૬॥

વેદમધ્યાપયામાસ ગુરુસ્તં વૈ વ્રતે સ્થિતમ્ ।
નોચ્ચચાર તથોતથ્યઃ સંસ્થિતો મુગ્ધવત્તદા ॥ ૫૭॥

બહુધા પાઠિતઃ પિત્રા ન દધાર મતિં શઠઃ ।
મૂઢવત્તિષ્ઠતેઽત્યર્થં તં શુશોચ પિતા તદા ॥ ૫૮॥

એવં કુર્વન્સદાઽભ્યાસં જાતો દ્વાદશવાર્ષિકઃ ।
ન વેદ વિધિવત્કર્તું સન્ધ્યાવન્દનકં વિધિમ્ ॥ ૫૯॥

મૂર્ખોઽભૂદિતિ લોકેષુ ગતા વાર્તાઽતિવિસ્તરા ।
બ્રાહ્મણેષુ ચ સર્વેષુ તાપસેષ્વિતરેષુ ચ ॥ ૬૦॥

જહાસ લોકસ્તં વિપ્રં યત્ર તત્ર ગતં મુને ।
પિતા માતા નિનિન્દાથ મૂર્ખં તમતિભર્ત્સયન્ ॥ ૬૧॥

નિન્દિતોઽથ જનૈઃ કામં પિતૃભ્યામથ બાન્ધવૈઃ ।
વૈરાગ્યમગમદ્વિપ્રો જગામ વનમપ્યસૌ ॥ ૬૨॥

અન્ધો વરસ્તથા પઙ્ગુર્ન મૂર્ખસ્તુ વરઃ સુતઃ ।
ઇત્યુક્ત્વોઽસૌ પિતૃભ્યાં વૈ વિવેશ કાનનં પ્રતિ ॥ ૬૩॥

ગઙ્ગાતીરે શુભે સ્થાને કૃત્વોટજમનુત્તમમ્ ।
વન્યાં વૃત્તિં ચ સઙ્કલ્પ્ય સ્થિતસ્તત્ર સમાહિતઃ ॥ ૬૪॥

નિયમં ચ પરં કૃત્વા નાસત્યં પ્રબ્રવીમ્યહમ્ ।
સ્થિતસ્તત્રાશ્રમે રમ્યે બ્રહ્મચર્યવ્રતો હિ સઃ ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે સત્યવ્રતાખ્યાનવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૩.૧૦॥

## ૩.૧૧ એકાદશોઽધ્યાયઃ । સત્યવ્રતાખ્યાનવર્ણનમ્ ।

લોમશ ઉવાચ ।
ન વેદાધ્યયનં કિઞ્ચિજ્જાનાતિ ન જપં તથા ।
ધ્યાનં ન દેવતાનાઞ્ચ ન ચૈવારાધનં તથા ॥ ૧॥

નાસનં વેદ વિપ્રોઽસૌ પ્રાણાયામં તથા પુનઃ ।
પ્રત્યાહારં તુ નો વેદ ભૂતશુદ્ધિઞ્ચ કારણમ્ ॥ ૨॥

ન મન્ત્રકીલકં જાપ્યં ગાયત્રીઞ્ચ ન વેદ સઃ ।
શૌચં સ્નાનવિધિઞ્ચૈવ તથાચમનકં પુનઃ ॥ ૩॥

પ્રાણાગ્નિહોત્રં નો વેદ બલિદાનં ન ચાતિથિમ્ ।

ન સન્ધ્યાં સમિધો હોમં વિવેદ ચ તથા મુનિઃ ॥ ૪॥

સોઽકરોત્પ્રાતરુત્થાય યત્કિઞ્ચિદ્દન્તધાવનમ્ ।
સ્નાનં ચ શૂદ્રવત્તત્ર ગઙ્ગાયાં મન્ત્રવર્જિતમ્ ॥ ૫॥

ફલાન્યાદાય વન્યાનિ મધ્યાન્હેઽપિ યદૃચ્છયા ।
ભક્ષ્યાભક્ષ્યપરિજ્ઞાનં ન જાનાતિ શઠસ્તથા ॥ ૬॥

સત્યં બ્રૂતે સ્થિતસ્તત્ર નાનૃતં વદતે પુનઃ ।
જનૈઃ સત્યતપા નામ કૃતમસ્ય દ્વિજસ્ય વૈ ॥ ૭॥

નાહિતં કસ્યચિત્કુર્યાન્ન તથાઽવિહિતં ક્વચિત્ ।
સુખં સ્વપિતિ તત્રૈવ નિર્ભયશ્ચિન્તયન્નિતિ ॥ ૮॥

કદા મે મરણં ભાવિ દુઃખં જીવામિ કાનને ।
જીવિતં ધિક્ચ મૂર્ખસ્ય તરસા મરણં ધ્રુવમ્ ॥ ૯॥

દૈવેનાહં કૃતો મૂર્ખો નાન્યોઽત્ર કારણં મમ ।
પ્રાપ્ય ચૈવોત્તમં જન્મ વૃથા જાતં મમાધુના ॥ ૧૦॥

યથા વન્ધ્યા સુરૂપા ચ યથા વા નિષ્ફલો દ્રુમઃ ।
અદુગ્ધદોહા ધેનુશ્ચ તથાઽહં નિષ્ફલઃ કૃતઃ ॥ ૧૧॥

કિં નુ નિન્દામ્યહં દૈવં નૂનં કર્મ મમેદૃશમ્ ।
ન દત્તં પુસ્તકં કૃત્વા બ્રાહ્મણાય મહાત્મને ॥ ૧૨॥

ન વૈ વિદ્યા મયા દત્તા પૂર્વજન્મનિ નિર્મલા ।
તેનાહં કર્મયોગેન શઠોઽસ્મિ ચ દ્વિજાધમઃ ॥ ૧૩॥

ન ચ તીર્થે તપસ્તપ્તં સેવિતા ન ચ સાધવઃ ।
ન દ્વિજાઃ પૂજિતા દ્રવ્યૈસ્તેન જાતોઽસ્મિ દુષ્ટધીઃ ॥ ૧૪॥

વર્તન્તે મુનિપુત્રાશ્ચ વેદશાસ્ત્રાર્થપારગાઃ ।
અહં સુમૂઢઃ સઞ્જાતો દૈવયોગેન કેનચિત્ ॥ ૧૫॥

ન જાનામિ તપસ્તપ્તું કિં કરોમિ સુસાધનમ્ ।
મિથ્યાયં મેઽત્ર સઙ્કલ્પો ન મે ભાગ્યં શુભં કિલ ॥ ૧૬॥

દૈવમેવ પરં મન્યે ધિક્પૌરુષમનર્થકમ્ ।
વૃથા શ્રમકૃતં કાર્યં દૈવાદ્ભવતિ સર્વથા ॥ ૧૭॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ શક્રાદ્યાઃ કિલ દેવતાઃ ।
કાલસ્ય વશગાઃ સર્વે કાલો હિ દુરતિક્રમઃ ॥ ૧૮॥

એવંવિધાન્વિતર્કાંસ્તુ કુર્વાણોઽહર્નિશં દ્વિજઃ ।
સ્થિતસ્તત્રાશ્રમે તીરે જાન્હવ્યાઃ પાવને સ્થલે ॥ ૧૯॥

વિરક્તઃ સ તુ સઞ્જાતઃ સ્થિતસ્તત્રાશ્રમે દ્વિજઃ ।
કાલાતિવાહનં શાન્તશ્ચકાર વિજને વને ॥ ૨૦॥

એવં સ્થિતસ્ય તુ વને વિમલોદકે વૈ
વર્ષાણિ તત્ર નવપઞ્ચ ગતાનિ કામમ્ ।
નારાધનં ન ચ જપં ન વિવેદ મન્ત્રં
કાલાતિવાહનમસૌ કૃતવાન્ વને વૈ ॥ ૨૧॥

જાનાતિ તસ્ય વિતતં વ્રતમેવ લોકઃ
સત્યં વદત્યપિ મુનિઃ કિલ નામજાતમ્ ।
જાતં યશશ્ચ સકલેષુ જનેષુ કામં
સત્યવ્રતોઽયમનિશં ન મૃષાભિભાષી ॥ ૨૨॥

તત્રૈકદા તુ મૃગયાં રમમાણ એવ
પ્રાપ્તો નિષાદનિશઠો ધૃતચાપબાણઃ ।
ક્રીડન્ વનેઽતિવિપુલે યમતુલ્યદેહઃ
ક્રૂરાકૃતિર્હનનકર્મણિ ચાતિદક્ષઃ ॥ ૨૩॥

તેનાતિકૃષ્ટેન શરેણ વિદ્ધઃ
કોલઃ કિરાતેન ધનુર્ધરેણ ।
પલાયમાનો ભયવિહ્વલશ્ચ
મુનેઃ સમીપં વિદ્રુતો જગામ ॥ ૨૪॥

વિકમ્પમાનો રુધિરાર્દ્રદેહો
યદા જગામાશ્રમમણ્ડલં વૈ ।
કાલસ્તદાતીવ દયાર્દ્રભાવં
પ્રાપ્તો મુનિસ્તત્ર સમીક્ષ્ય દીનમ્ ॥ ૨૫॥

અગ્રે વ્રજન્તં રુધિરાર્દ્રદેહં
દૃષ્ટ્વા મુનિઃ સૂકરમાશુ વિદ્ધમ્ ।
દયાભિવેશાદતિકમ્પમાનઃ

સારસ્વતં બીજમથોચ્ચચાર ॥ ૨૬॥

અજ્ઞાતપૂર્વં ચ તથાશ્રુતઞ્ચ
દૈવાન્મુખે વૈ સમુપાગતઞ્ચ ।
ન જ્ઞાતવાન્બીજમસૌ વિમૂઢો
મમજ્જ શોકે સ મુનિર્મહાત્મા ॥ ૨૭॥

કોલઃ પ્રવિશ્યાશ્રમમણ્ડલં તદ્
ગતો નિકુઞ્જે પ્રવિલીય ગૂઢમ્ ।
અપ્રાપ્તમાર્ગો દૃઢનિર્વિણ્ણચેતાઃ
પ્રવેપમાનઃ શરપીડિતત્વાત્ ॥ ૨૮॥

તતઃ ક્ષણાદાકરણાન્તકૃષ્ટં
ચાપં દધાનોઽતિકરાલદેહઃ ।
પ્રાપ્તસ્તદન્તે સ ચ મૃગ્યમાણો
નિષાદરાજઃ કિલ કાલ એવ ॥ ૨૯॥

દૃષ્ટ્વા મુનિં તત્ર કુશાસને સ્થિતં
નામ્ના તુ સત્યવ્રતમદ્વિતીયમ્ ।
વ્યાધઃ પ્રણમ્ય પ્રમુખે સ્થિતોઽસૌ
પપ્રચ્છ કોલઃ ક્વ ગતો દ્વિજેશ ॥ ૩૦॥

જાનામિ તેઽહં સુવ્રતં પ્રસિદ્ધં
તેનાદ્ય પૃચ્છે મમ બાણવિદ્ધઃ ।
ક્ષુધાર્દિતં મે સકલં કુટુમ્બં
વિભર્તુકામઃ કિલ આગતોઽસ્મિ ॥ ૩૧॥

વૃત્તિર્મમૈષા વિહિતા વિધાત્રા
નાન્યાઽસ્તિ વિપ્રેન્દ્ર ઋતં બ્રવીમિ ।
ભર્તવ્યમેવેહ કુટુમ્બમઞ્જસા
કેનાપ્યુપાયેન શુભાશુભેન ॥ ૩૨॥

સત્યં બ્રવીત્વદ્ય સત્યવ્રતોઽસિ
ક્ષુધાતુરો વર્તતે પોષ્યવર્ગઃ ।
ક્વાસૌ ગતઃ સૂકરો બાણવિદ્ધઃ
પૃચ્છામ્યહં વાડવ બ્રૂહિ તૂર્ણમ્ ॥ ૩૩॥

તેનેતિ પૃષ્ટઃ સ મુનિર્મહાત્મા
વિતર્કમગ્નઃ પ્રબભૂવ કામમ્ ।
સત્યવ્રતં મેઽદ્ય ભવેન્ન ભગ્નં
ન દૃષ્ટ ઇત્યુચ્ચરિતેન કિં વૈ ॥ ૩૪॥

ગતોઽત્ર કોલઃ શરવિદ્ધદેહઃ
કથં બ્રવીમ્યદ્ય મૃષાઽમૃષા વા ।
ક્ષુધાર્દિતોઽયં પરિપૃચ્છતીવ
દૃષ્ટ્વા હનિષ્યત્યપિ સૂકરં વૈ ॥ ૩૫॥

સત્યં ન સત્યં ખલુ યત્ર હિંસા
દયાન્વિતં ચાનૃતમેવ સત્યમ્ ।
હિતં નરાણાં ભવતીહ યેન
તદેવ સત્યં ન તથાઽન્યથૈવ ॥ ૩૬॥

હિતં કથં સ્યાદુભયોર્વિરુદ્ધયો-
સ્તદુત્તરં કિં ન યથા મૃષા વચઃ ।
વિચારયન્વાઽવ ધર્મસઙ્કટે
ન પ્રાપ વક્તું વચનં યથોચિતમ્ ॥ ૩૭॥

બાણાહતં વીક્ષ્ય દયાન્વિતઞ્ચ
કોલં તદન્તે સમુદાહૃતં વચઃ ।
તેન પ્રસન્ના નિજબીજતઃ શિવા
વિદ્યાં દુરાપાં પ્રદદૌ ચ તસ્મૈ ॥ ૩૮॥

બીજોચ્ચારણતો દેવ્યા વિદ્યા પ્રસ્ફુરિતાખિલા ।
વાલ્મીકેશ્ચ યથાપૂર્વં તથા સ હ્યભવત્કવિઃ ॥ ૩૯॥

તમુવાચ દ્વિજો વ્યાધં સમ્મુખસ્થં ધનુર્ધરમ્ ।
સત્યકામસ્તુ ધર્માત્મા શ્લોકમેકં દયાપરઃ ॥ ૪૦॥

યા પશ્યતિ ન સા બ્રૂતે યા બ્રૂતે સા ન પશ્યતિ ।
અહો વ્યાધ સ્વકાર્યાર્થિન્ કિં પૃચ્છસિ પુનઃ પુનઃ ॥ ૪૧॥

ઇત્યુક્તસ્તુ તદા તેન ગતોઽસૌ પશુહા પુનઃ ।
નિરાશઃ સૂકરે તસ્મિન્પરાવૃત્તો નિજાલયે ॥ ૪૨॥

બ્રાહ્મણસ્તુ કવિર્જાતઃ પ્રાચેતસ ઇવાપરઃ ।

પ્રસિદ્ધઃ સર્વલોકેષુ નામ્ના સત્યવ્રતો દ્વિજઃ ॥ ૪૩॥

સારસ્વતં તતો બીજં જજાપ વિધિપૂર્વકમ્ ।
પણ્ડિતશ્ચાતિવિખ્યાતો દ્વિજોઽસૌ ધરણીતલે ॥ ૪૪॥

પ્રતિપર્વસુ ગાયન્તિ બ્રાહ્મણા યદ્યશઃ સદા ।
આખ્યાનં ચાતિવિસ્તીર્ણં સ્તુવન્તિ મુનયઃ કિલ ॥ ૪૫॥

તચ્છ્રુત્વા સદનં તસ્ય સમાગમ્ય તદાશ્રમે ।
યેન ત્યક્તઃ પુરા તેન ગૃહં નીતોઽતિમાનિતઃ ॥ ૪૬॥

તસ્માદ્રાજન્સદા સેવ્યા પૂજનીયા ચ ભક્તિતઃ ।
આદિશક્તિઃ પરા દેવી જગતાં કારણં હિ સા ॥ ૪૭॥

તસ્યા યજ્ઞં મહારાજ કુરુ વેદવિધાનતઃ ।
સર્વકામપ્રદં નિત્યં નિશ્ચયં કથિતં પુરા ॥ ૪૮॥

સ્મૃતા સમ્પૂજિતા ભક્ત્યા ધ્યાતા ચોચ્ચારિતા સ્તુતા ।
દદાતિ વાઞ્છિતાનર્થાન્કાર્યદા તેન કીર્ત્યતે ॥ ૪૯॥

અનુભાવમિદં રાજન્ કર્તવ્યં સર્વથા બુધૈઃ ।
દૃષ્ટ્વા રોગયુતાન્દીનાન્ક્ષુધિતાન્નિર્ધનાઞ્છઠાન્ ॥ ૫૦॥

જનાનાર્તાંસ્તથા મૂર્ખાન્પીડિતાન્વૈરિભિઃ સદા ।
દાસાનાજ્ઞાકરાન્ક્ષુદ્રાન્વિકલાન્વિહ્વલાનથ ॥ ૫૧॥

અતૃપ્તાન્ભોજને ભોગે સદાર્તાનજિતેન્દ્રિયાન્ ।
તૃષ્ણાધિકાનશક્તાંશ્ચ સદાધિપરિપીડિતાન્ ॥ ૫૨॥

તથા વિભવસમ્પન્નાન્ પુત્રપૌત્રવિવર્ધનાન્ ।
પુષ્ટદેહાંશ્ચ સમ્ભોગૈઃ સંયુતાન્વેદવાદિનઃ ॥ ૫૩॥

રાજલક્ષ્મ્યા યુતાઞ્છૂરાન્વશીકૃતજનાનથ ।
સ્વજનૈરવિયુક્તાંશ્ચ સર્વલક્ષણલક્ષિતાન્ ॥ ૫૪॥

વ્યતિરેકાન્વયાભ્યાં ચ વિચેતવ્યં વિચક્ષણૈઃ ।
એભિર્ન પૂજિતા દેવી સર્વાર્થફલદા શિવા ॥ ૫૫॥

સમારાધિતા ચ તથા નૃભિરેભિઃ સદામ્બિકા ।
યતોઽમી સુખિનઃ સર્વે સંસારેઽસ્મિન્ન સંશયઃ ॥ ૫૬॥

વ્યાસ ઉવાચ ।
ઇતિ રાજઞ્છ્રુતં તત્ર મયા મુનિસમાગમે ।
લોમશસ્ય મુખાત્કામં દેવીમાહાત્મ્યમુત્તમમ્ ॥ ૫૭॥

ઇતિ સઞ્ચિન્ત્ય રાજેન્દ્ર કર્તવ્યં ચ સદાર્ચનમ્ ।
ભક્ત્યા પરમયા દેવ્યાઃ પ્રીત્યા ચ પુરુષર્ષભ ॥ ૫૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે સત્યવ્રતાખ્યાનવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૩.૧૧॥

## ૩.૧૨ દ્વાદશોઽધ્યાયઃ । અમ્બાયજ્ઞવિધિવર્ણનમ્ ।

રાજોવાચ ।
વદ યજ્ઞવિધિં સમ્યગ્દેવ્યાસ્તસ્યાઃ સમન્તતઃ ।
શ્રુત્વા કરોમ્યહં સ્વામિન્યથાશક્તિ હ્યતન્દ્રિતઃ ॥ ૧॥

પૂજાવિધિં ચ મન્ત્રાંશ્ચ હોમદ્રવ્યમસંશયમ્ ।
બ્રાહ્મણાઃ કતિસઙ્ખ્યાશ્ચ દક્ષિણાશ્ચતથા પુનઃ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ દેવ્યા યજ્ઞં વિધાનતઃ ।
ત્રિવિધં તુ સદા જ્ઞેયં વિધિદૃષ્ટેન કર્મણા ॥ ૩॥

સાત્ત્વિકં રાજસં ચૈવ તામસં ચ તથાપરમ્ ।
મુનીનાં સાત્ત્વિકં પ્રોક્તં નૃપાણાં રાજસં સ્મૃતમ્ ॥ ૪॥

તામસં રાક્ષસાનાં વૈ જ્ઞાનિનાં તુ ગુણોજ્ઝિતમ્ ।
વિમુક્તાનાં જ્ઞાનમયં વિસ્તરાત્પ્રબ્રવીમિ તે ॥ ૫॥

દેશઃ કાલસ્તથા દ્રવ્યં મન્ત્રાશ્ચ બ્રાહ્મણાસ્તથા ।
શ્રદ્ધા ચ સાત્વકી યત્ર તં યજ્ઞં સાત્ત્વિકં વિદુઃ ॥ ૬॥

દ્રવ્યશુદ્ધિઃ ક્રિયાશુદ્ધિર્મન્ત્રશુદ્ધિશ્ચ ભૂમિપ ।
ભવેદ્યદિ તદા પૂર્ણં ફલં ભવતિ નાન્યથા ॥ ૭॥

અન્યાયોપાર્જિતેનૈવ કર્તવ્યં સુકૃતં કૃતમ્ ।
ન કીર્તિરિહ લોકે ચ પરલોકે ન તત્ફલમ્ ॥ ૮॥

તસ્માન્ન્યાયાર્જિતેનૈવ કર્તવ્યં સુકૃતં સદા ।

યશસે પરલોકાય ભવત્યેવ સુખાય ચ ॥ ૯॥

પ્રત્યક્ષં તવ રાજેન્દ્ર પાણ્ડવૈસ્તુ મખઃ કૃતઃ ।
રાજસૂયઃ ક્રતુવરઃ સમાપ્તવરદક્ષિણઃ ॥ ૧૦॥

યત્ર સાક્ષાદ્ધરિઃ કૃષ્ણો યાદવેન્દ્રો મહામનાઃ ।
બ્રાહ્મણાઃ પૂર્ણવિદ્યાશ્ચ ભારદ્વાજાદયસ્તથા ॥ ૧૧॥

કૃત્વા યજ્ઞં સુસમ્પૂર્ણં માસમાત્રેણ પાણ્ડવૈઃ ।
પ્રાપ્તં મહત્તરં કષ્ટં વનવાસશ્ચ દારુણઃ ॥ ૧૨॥

પીડનઞ્ચૈવ પાઞ્ચાલ્યાસ્તથા દ્યૂતે પરાજયઃ ।
વનવાસો મહત્કષ્ટં ક્વ ગતં મખજં ફલમ્ ॥ ૧૩॥

દાસત્વઞ્ચ વિરાટસ્ય કૃતં સર્વમહાત્મભિઃ ।
કીચકેન પરિક્લિષ્ટા દ્રૌપદી ચ પ્રમદ્વરા ॥ ૧૪॥

આશીર્વાદા દ્વિજાતીનાં ક્વ ગતાઃ શુદ્ધચેતસામ્ ।
ભક્તિર્વા વાસુદેવસ્ય ક્વ ગતા તત્ર સઙ્કટે ॥ ૧૫॥

ન રક્ષિતા તદા બાલા કેનાપિ દ્રુપદાત્મજા ।
પ્રાપ્તકેશગ્રહા કાલે સાધ્વી ચ વરવર્ણિની ॥ ૧૬॥

કિમત્ર ચિન્તનીયં વૈ ધર્મવૈગુણ્યકારણમ્ ।
કેશવે સતિ દેવેશે ધર્મપુત્રે યુધિષ્ઠિરે ॥ ૧૭॥

ભવિતવ્યમિતિ પ્રોક્તે નિષ્ફલઃ સ્યાત્તદાગમઃ ।
વેદમન્ત્રાસ્તથાન્યે ચ વિતથાઃ સ્યુરસંશયમ્ ॥ ૧૮॥

સાધનં નિષ્ફલં સર્વમુપાયશ્ચ નિરર્થકઃ ।
ભવિતવ્યં ભવત્યેવ વચને પ્રતિપાદકે ॥ ૧૯॥

આગમોઽપ્યર્થવાદઃ સ્યાત્ક્રિયાઃ સર્વા નિરર્થકાઃ ।
સ્વર્ગાર્થઞ્ચ તપો વ્યર્થં વર્ણધર્મશ્ચ વૈ તથા ॥ ૨૦॥

સર્વં પ્રમાણં વ્યર્થં સ્યાદ્ભવિતવ્યે કૃતે હૃદિ ।
ઉભયઞ્ચાપિ મન્તવ્યં દૈવં ચોપાય એવ ચ ॥ ૨૧॥

કૃતે કર્મણિ ચેત્સિદ્ધિર્વિપરિતા યદા ભવેત્ ।
વૈગુણ્યં કલ્પનીયં સ્યાત્પ્રાજ્ઞૈઃ પણ્ડિતમૌલિભિઃ ॥ ૨૨॥

તત્કર્મ બહુધા પ્રોક્તં વિદ્વદ્ભિઃ કર્મકારિભિઃ ।
કર્તૃભેદાન્મન્ત્રભેદાદ્દ્રવ્યભેદાત્તથા પુનઃ ॥ ૨૩॥

યથા મઘવતા પૂર્વં વિશ્વરૂપો વૃતો ગુરુઃ ।
વિપરીતં કૃતં તેન કર્મ માતૃહિતાય વૈ ॥ ૨૪॥

દેવેભ્યો દાનવેભ્યસ્તુ સ્વસ્તીત્યુક્ત્વા પુનઃ પુનઃ ।
અસુરા માતૃપક્ષીયાઃ કૃતં તેષાઞ્ચ રક્ષણમ્ ॥ ૨૫॥

દૈત્યાન્ દૃષ્ટ્વાતિસમ્પુષ્ટાંશ્ચુકોપ મઘવા તદા ।
શિરાંસિ તસ્ય વજ્રેણ ચિચ્છેદ તરસા હરિઃ ॥ ૨૬॥

ક્રિયાવૈગુણ્યમત્રૈવ કર્તૃભેદાદસંશયમ્ ।
નોચેત્પઞ્ચાલરાજેન રોષેણાપિ કૃતા ક્રિયા ॥ ૨૭॥

ભારદ્વાજવિનાશાય પુત્રસ્યોત્પાદનાય ચ ।
ધૃષ્ટદ્યુમ્નઃ સમુત્પન્નો વેદિમધ્યાચ્ચ દ્રૌપદી ॥ ૨૮॥

પુરા દશરથેનાપિ પુત્રેષ્ટિસ્તુ કૃતા યદા ।
અપુત્રસ્ય સુતાસ્તસ્ય ચત્વારઃ સમ્પ્રજજ્ઞિરે ॥ ૨૯॥

અતઃ ક્રિયા કૃતા યુક્ત્યા સિદ્ધિદા સર્વથા ભવેત્ ।
અયુક્ત્યા વિપરિતા સ્યાત્સર્વથા નૃપસત્તમ ॥ ૩૦॥

પાણ્ડવાનાં યથા યજ્ઞે કિઞ્ચિદ્વૈગુણ્યયોગતઃ ।
વિપરીતં ફલં પ્રાપ્તં નિર્જિતાસ્તે દુરોદરે ॥ ૩૧॥

સત્યવાદી તથા રાજન્ ધર્મપુત્રો યુધિષ્ઠિરઃ ।
દ્રૌપદી ચ તથા સાધ્વી તથાન્યેપ્યનુજાઃ શુભાઃ ॥ ૩૨॥

કુદ્રવ્યયોગાદ્વૈગુણ્યં સમુત્પન્નં મખેઽથવા ।
સાભિમાનૈઃ કૃતાદ્વાપિ દૂષણં સમુપસ્થિતમ્ ॥ ૩૩॥

સાત્ત્વિકસ્તુ મહારાજ દુર્લભો વૈ મખઃ સ્મૃતઃ ।
વૈખાનસમુનીનાં હિ વિહિતોઽસૌ મહામખઃ ॥ ૩૪॥

સાત્ત્વિકં ભોજનં યે વૈ નિત્યં કુર્વન્તિ તાપસાઃ ।
ન્યાયાર્જિતઞ્ચ વન્યઞ્ચ તથા ઋષ્યં સુસંસ્કૃતમ્ ॥ ૩૫॥

પુરોડાશપરા નિત્યં વિયૂપા મન્ત્રપૂર્વકાઃ ।
શ્રદ્ધાધિકા મખા રાજન્ સાત્ત્વિકાઃ પરમાઃ સ્મૃતાઃ ॥ ૩૬॥

રાજસા દ્રવ્યબહુલાઃ સયૂપાશ્ચ સુસંસ્કૃતાઃ ।
ક્ષત્રિયાણાં વિશાઞ્ચૈવ સાભિમાનાશ્ચ વૈ મખાઃ ॥ ૩૭॥

તામસા દાનવાનાં વૈ સક્રોધા મદવર્ધકાઃ ।
સામર્ષાઃ સંસ્કૃતાઃ ક્રૂરા મખાઃ પ્રોક્તા મહાત્મભિઃ ॥ ૩૮॥

મુનીનાં મોક્ષકામાનાં વિરક્તાનાં મહાત્મનામ્ ।
માનસસ્તુ સ્મૃતો યાગઃ સર્વસાધનસંયુતઃ ॥ ૩૯॥

અન્યેષુ સર્વયજ્ઞેષુ કિઞ્ચિન્ન્યૂનં ભવેદપિ ।
દ્રવ્યેણ શ્રદ્ધયા વાઽપિ ક્રિયયા બ્રાહ્મણૈસ્તથા ॥ ૪૦॥

દેશકાલપૃથગ્દ્રવ્યસાધનૈઃ સકલૈસ્તથા ।
નાન્યો ભવતિ પૂર્ણો વૈ તથા ભવતિ માનસઃ ॥ ૪૧॥

પ્રથમં તુ મનઃ શોધ્યં કર્તવ્યં ગુણવર્જિતમ્ ।
શુદ્ધે મનસિ દેહો વૈ શુદ્ધ એવ ન સંશયઃ ॥ ૪૨॥

ઇન્દ્રિયાર્થપરિત્યક્તં યદા જાતં મનઃ શુચિ ।
તદા તસ્ય મખસ્યાસૌ પ્રભવેદધિકારવાન્ ॥ ૪૩॥

તદાઽસૌ મણ્ડપં કૃત્વા બહુયોજનવિસ્તૃતમ્ ।
સ્તમ્ભૈશ્ચ વિપુલૈઃ શ્લક્ષ્ણૈર્યજ્ઞિયદ્રુમસમ્ભવૈઃ ॥ ૪૪॥

વેદીં ચ વિશદાં તત્ર મનસા પરિકલ્પયેત્ ।
અગ્નયોઽપિ તથા સ્થાપ્યા વિધિવન્મનસા કિલ ॥ ૪૫॥

બ્રાહ્મણાનાઞ્ચ વરણં તથૈવ પ્રતિપાદ્ય ચ ।
બ્રહ્માધ્વર્યુસ્તથા હોતા પ્રસ્તોતા વિધિપૂર્વકમ્ ॥ ૪૬॥

ઉદ્ગાતા પ્રતિહર્તા ચ સભ્યાશ્ચાન્યે યથાવિધિ ।
પૂજનીયાઃ પ્રયત્નેન મનસૈવ દ્વિજોત્તમાઃ ॥ ૪૭॥

પ્રાણોઽપાનસ્તથા વ્યાનઃ સમાનોદાન એવ ચ ।
પાવકાઃ પઞ્ચ એવૈતે સ્થાપ્યા વેદ્યાં વિધાનતઃ ॥ ૪૮॥

ગાર્હપત્યસ્તદા પ્રાણોઽપાનશ્ચાહવનીયકઃ ।
દક્ષિણાગ્નિસ્તથા વ્યાનઃ સમાનશ્ચાવસથ્યકઃ ॥ ૪૯॥

સભ્યોદાનઃ સ્મૃતા હ્યેતે પાવકાઃ પરમોત્કટાઃ ।

દ્રવ્યઞ્ચ મનસા ભાવ્યં નિર્ગુણં પરમં શુચિ ॥ ૫૦॥

મન એવ તદા હોતા યજમાનસ્તથૈવ તત્ ।
યજ્ઞાધિદેવતા બ્રહ્મ નિર્ગુણં ચ સનાતનમ્ ॥ ૫૧॥

ફલદા નિર્ગુણા શક્તિઃ સદા નિર્વેદદા શિવા ।
બ્રહ્મવિદ્યાખિલાધારા વ્યાપ્ય સર્વત્ર સંસ્થિતા ॥ ૫૨॥

તદુદ્દેશેન તદ્દ્રવ્યં હુનેત્પ્રાણાગ્નિષુ દ્વિજઃ ।
પશ્ચાચ્ચિત્તં નિરાલમ્બં કૃત્વા પ્રાણાનપિ પ્રભો ॥ ૫૩॥

કુણ્ડલીમુખમાર્ગેણ હુનેદ્બ્રહ્મણિ શાશ્વતે ।
સ્વાનુભૂત્યા સ્વયં સાક્ષાત્સ્વાત્મભૂતાં મહેશ્વરીમ્ ॥ ૫૪॥

સમાધિનૈવ યોગેન ધ્યાયેચ્ચેતસ્યનાકુલઃ ।
સર્વભૂતસ્થમાત્માનં સર્વભૂતાનિ ચાત્મનિ ॥ ૫૫॥

યદા પશ્યતિ ભૂતાત્મા તદા પશ્યતિ તાં શિવામ્ ।
દૃષ્ટ્વા તાં બ્રહ્મવિદ્ભૂયાત્સચ્ચિદાનન્દરૂપિણીમ્ ॥ ૫૬॥

તદા માયાદિકં સર્વં દગ્ધં ભવતિ ભૂમિપ ।
પ્રારબ્ધં કર્મમાત્રં તુ યાવદ્દેહં ચ તિષ્ઠતિ ॥ ૫૭॥

જીવન્મુક્તસ્તદા જાતો મૃતો મોક્ષમવાપ્નુયાત્ ।
કૃતકૃત્યો ભવેત્તાત યો ભજેજ્જગદમ્બિકામ્ ॥ ૫૮॥

તસ્માત્સર્વપ્રયત્નેન ધ્યેયા શ્રીભુવનેશ્વરી ।
શ્રોતવ્યા ચૈવ મન્તવ્યા ગુરુવાક્યાનુસારતઃ ॥ ૫૯॥

રાજન્નેવં કૃતો યજ્ઞો મોક્ષદો નાત્ર સંશયઃ ।
અન્યે યજ્ઞાઃ સકામાસ્તુ પ્રભવન્તિ ક્ષયોન્મુખાઃ ॥ ૬૦॥

અગ્નિષ્ટોમેન વિધિવત્સ્વર્ગકામો યજેદિતિ ।
વેદાનુશાસનં ચૈતત્પ્રવદન્તિ મનીષિણઃ ॥ ૬૧॥

ક્ષીણે પુણ્યે મૃત્યુલોકં વિશન્તિ ચ યથામતિ ।
તસ્માત્તુ માનસઃ શ્રેષ્ઠો યજ્ઞોઽપ્યક્ષય એવ સઃ ॥ ૬૨॥

ન રાજ્ઞા સાધિતું યોગ્યો મખોઽસૌ જયમિચ્છતા ।
તામસસ્તુ કૃતઃ પૂર્વં સર્પયજ્ઞસ્ત્વયાધુના ॥ ૬૩॥

વૈરં નિર્વાહિતં રાજંસ્તક્ષકસ્ય દુરાત્મનઃ ।
યત્કૃતે નિહતાઃ સર્પાસ્ત્વયાઽગ્નૌ કોટિશઃ પરે ॥ ૬૪॥

દેવીયજ્ઞં કુરુષ્વાદ્ય વિતતં વિધિપૂર્વકમ્ ।
વિષ્ણુના યઃ કૃતઃ પૂર્વં સૃષ્ટ્યાદૌ નૃપસત્તમ ॥ ૬૫॥

તથા ત્વં કુરુ રાજેન્દ્ર વિધિં તે પ્રબ્રવીમ્યહમ્ ।
બ્રાહ્મણાઃ સન્તિ રાજેન્દ્ર વિધિજ્ઞા વેદવિત્તમાઃ ॥ ૬૬॥

દેવીબીજવિધાનજ્ઞા મન્ત્રમાર્ગવિચક્ષણાઃ ।
યાજકાસ્તે ભવિષ્યન્તિ યજમાનસ્ત્વમેવ હિ ॥ ૬૭॥

કૃત્વા યજ્ઞં વિધાનેન દત્ત્વા પુણ્યં મખાર્જિતમ્ ।
સમુદ્ધર મહારાજ પિતરં દુર્ગતિઙ્ગતમ્ ॥ ૬૮॥

વિપ્રાવમાનજં પાપં દુર્ઘટં નરકપ્રદમ્ ।
તથૈવ શાપજો દોષઃ પ્રાપ્તઃ પિત્રા તવાનઘ ॥ ૬૯॥

તથા દુર્મરણં પ્રાપ્તં સર્પદંશેન ભૂભુજા ।
અન્તરાલે તથા મૃત્યૂર્ન ભૂમૌ કુશસંસ્તરે ॥ ૭૦॥

ન સઙ્ગ્રામે ન ગઙ્ગાયાં સ્નાનદાનાદિવર્જિતમ્ ।
મરણં તે પિતુસ્તત્ર સૌધે જાતં કુરૂદ્વહ ॥ ૭૧॥

કૃપણાનિ ચ સર્વાણિ નરકસ્ય નૃપોત્તમ ।
તત્રૈકં કારણં તસ્ય ન જાતં ચાતિદુર્લભમ્ ॥ ૭૨॥

યત્ર યત્ર સ્થિતઃપ્રાણો જ્ઞાત્વા કાલં સમાગતમ્ ।
સાધનાનામભાવેઽપિ હ્યવશશ્ચાતિસઙ્કટે ॥ ૭૩॥

યદા નિર્વેદમાયાતિ મનસા નિર્મલેન વૈ ।
પઞ્ચભૂતાત્મકો દેહો મમ કિઞ્ચાત્ર દુઃખદમ્ ॥ ૭૪॥

પતત્વદ્ય યથાકામં મુક્તોઽહં નિર્ગુણોઽવ્યયઃ ।
નાશાત્મકાનિ તત્ત્વાનિ તત્ર કા પરિદેવના ॥ ૭૫॥

બ્રહ્મૈવાહં ન સંસારી સદા મુક્તઃ સનાતનઃ ।
દેહેન મમ સમ્બન્ધઃ કર્મણા પ્રતિપાદિતઃ ॥ ૭૬॥

તાનિ સર્વાણિ મુક્તાનિ શુભાનિ ચેતરાણિ ચ ।
મનુષ્યદેહયોગેન સુખદુઃખાનુસાધનાત્ ॥ ૭૭॥

વિમુક્તોઽતિભયાદ્ઘોરાદસ્માત્સંસારસઙ્કટાત્ ।
ઇત્યેવં ચિન્ત્યમાનસ્તુ સ્નાનદાનવિવર્જિતઃ ॥ ૭૮॥

મરણં ચેદવાપ્નોતિ સ મુચ્યેજ્જન્મદુઃખતઃ ।
એષા કાષ્ઠા પરા પ્રોક્તા યોગિનામપિ દુર્લભા ॥ ૭૯॥

પિતા તે નૃપશાર્દૂલ શ્રુત્વા શાપં દ્વિજોદિતમ્ ।
દેહે મમત્વં કૃતવાન્ન નિર્વેદમવાપ્તવાન્ ॥ ૮૦॥

નીરોગો મમ દેહોઽયં રાજ્યં નિહતકણ્ટકમ્ ।
કથં જીવામ્યહં કામં મન્ત્રજ્ઞાનાનયન્તુ વૈ ॥ ૮૧॥

ઔષધં મણિમન્ત્રં ચ યન્ત્રં પરમકં તથા ।
આરોહણં તથા સૌધે કૃતવાન્નૃપતિસ્તદા ॥ ૮૨॥

ન સ્નાનં ન કૃતં દાનં ન દેવ્યાઃ સ્મરણં કૃતમ્ ।
ન ભૂમૌ શયનં ચૈવ દૈવં મત્વા પરં તથા ॥ ૮૩॥

મગ્નો મોહાર્ણવે ઘોરે મૃતઃ સૌધેઽહિના હતઃ ।
કૃત્વા પાપં કલેર્યોગાત્તાપસસ્યાવમાનજમ્ ॥ ૮૪॥

અવશ્યમેવ નરકમેતૈરાચરણૈર્ભવેત્ ।
તસ્માત્તં પિતરં પાપાત્સમુદ્ધર નૃપોત્તમ ॥ ૮૫॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય વ્યાસસ્યામિતતેજસઃ ।
સાશ્રુકણ્ઠોઽતિદુઃખાર્તો બભૂવ જનમેજયઃ ॥ ૮૬॥

ધિગિદં જીવિતં મેઽદ્ય પિતા મે નરકે સ્થિતઃ ।
તત્કરોમિ યથૈવાદ્ય સ્વર્ગં યાત્યુત્તરાસુતઃ ॥ ૮૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે અમ્બાયજ્ઞવિધિવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૩.૧૨॥

## ૩.૧૩ ત્રયોદશોઽધ્યાયઃ । વિષ્ણુનાનુષ્ઠાનવર્ણનમ્ ।

રાજોવાચ ।
હરિણા તુ કથં યજ્ઞઃ કૃતઃ પૂર્વં પિતામહ ।

જગત્કારણરૂપેણ વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧॥

કે સહાયાસ્તુ તત્રાસન્બ્રાહ્મણાઃ કે મહામતે ।
ઋત્વિજો વેદતત્ત્વજ્ઞાસ્તન્મે બ્રૂહિ પરન્તપ ॥ ૨॥

પશ્ચાત્કરોમ્યહં યજ્ઞં વિધિદૃષ્ટેન કર્મણા ।
શ્રુત્વા વિષ્ણુકૃતં યાગમમ્બિકાયાઃ સમાહિતઃ ॥ ૩॥

વ્યાસ ઉવાચ ।
રાજઞ્છૃણુ મહાભાગ વિસ્તરં પરમાદ્ભુતમ્ ।
યથા ભગવતા યજ્ઞઃ કૃતશ્ચ વિધિપૂર્વકઃ ॥ ૪॥

વિસર્જિતા યદા દેવ્યા દત્ત્વા શક્તીશ્ચ તાસ્ત્રયઃ ।
કાજેશાઃ પુરુષા જાતા વિમાનવરમાસ્થિતાઃ ॥ ૫॥

પ્રાપ્તા મહાર્ણવં ઘોરં ત્રયસ્તે વિબુધોત્તમાઃ ।
ચક્રુઃ સ્થાનાનિ વાસાર્થં સમુત્પાદ્ય ધરાં સ્થિતાઃ ॥ ૬॥

આધારશક્તિરચલા મુક્તા દેવ્યા સ્વયં તતઃ ।
તદાધારા સ્થિતા જાતા ધરા મેદઃસમન્વિતા ॥ ૭॥

મધુકૈટભયોર્મેદઃ સંયોગાન્મેદિની સ્મૃતા ।
ધારણાચ્ચ ધરા પ્રોક્તા પૃથ્વી વિસ્તારયોગતઃ ॥ ૮॥

મહી ચાપિ મહીયસ્ત્વાદ્ધૃતા સા શેષમસ્તકે ।
ગિરયશ્ચ કૃતાઃ સર્વે ધારણાર્થં પ્રવિસ્તરાઃ ॥ ૯॥

લોહકીલં યથા કાષ્ટે તથા તે ગિરયઃ કૃતાઃ ।
મહીધરો મહારાજ પ્રોચ્યતે વિબુધૈર્જનૈઃ ॥ ૧૦॥

જાતરૂપમયો મેરુર્બહુયોજનવિસ્તરઃ ।
કૃતો મણિમયૈઃ શૃઙ્ગૈઃ શોભિતઃ પરમાદ્ભુતઃ ॥ ૧૧॥

મરીચિર્નારદોઽત્રિશ્ચ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ।
દક્ષો વસિષ્ઠ ઇત્યેતે બ્રહ્મણઃ પ્રથિતાઃ સુતાઃ ॥ ૧૨॥

મરીચેઃ કશ્યપો જાતો દક્ષકન્યાસ્ત્રયોદશ ।
તાભ્યો દેવાશ્ચ દૈત્યાશ્ચ સમુત્પન્ના હ્યનેકશઃ ॥ ૧૩॥

તતસ્તુ કાશ્યપી સૃષ્ટિઃ પ્રવૃત્તા ચાતિવિસ્તરા ।
મનુષ્યપશુસર્પાદિજાતિભેદૈરનેકધા ॥ ૧૪॥

બ્રહ્મણશ્ચાર્ધદેહાત્તુ મનુઃ સ્વાયમ્ભુવોઽભવત્ ।
શતરૂપા તથા નારી સઞ્જાતા વામભાગતઃ ॥ ૧૫॥

પ્રિયવ્રતોત્તાનપાદૌ સુતૌ તસ્યા બભૂવતુઃ ।
તિસ્રઃ કન્યા વરારોહા હ્યભવન્નતિસુન્દરીઃ ॥ ૧૬॥

એવં સૃષ્ટિં સમુત્પાદ્ય ભગવાન્કમલોદ્ભવઃ ।
ચકાર બ્રહ્મલોકઞ્ચ મેરુશ‍ૃઙ્ગે મનોહરમ્ ॥ ૧૭॥

વૈકુણ્ઠં ભગવાન્વિષ્ણૂ રમારમણમુત્તમમ્ ।
ક્રીડાસ્થાનં સુરમ્યઞ્ચ સર્વલોકોપરિસ્થિતમ્ ॥ ૧૮॥

શિવોઽપિ પરમં સ્થાનં કૈલાસાખ્યં ચકાર હ ।
સમાસાદ્ય ભૂતગણં વિજહાર યથારુચિ ॥ ૧૯॥

સ્વર્ગસ્ત્રિવિષ્ટપો મેરુશિખરોપરિ કલ્પિતઃ ।
તચ્ચ સ્થાનં સુરેન્દ્રસ્ય નાનારત્નવિરાજિતમ્ ॥ ૨૦॥

સમુદ્રમથનાત્પ્રાપ્તઃ પારિજાતસ્તરુત્તમઃ ।
ચતુર્દન્તસ્તથા નાગઃ કામધેનુશ્ચ કામદા ॥ ૨૧॥

ઉચ્ચૈઃશ્રવાસ્તથાશ્વો વૈ રમ્ભાદ્યપ્સરસસ્તથા ।
ઇન્દ્રેણોપાત્તમખિલં જાતં વૈ સ્વર્ગભૂષણમ્ ॥ ૨૨॥

ધન્વન્તરિશ્ચન્દ્રમાશ્ચ સાગરાચ્ચ સમુદ્ભવૌ ।
સ્વર્ગસ્થિતૌ વિરાજેતે દેવૌ બહુગણૈર્વૃતૌ ॥ ૨૩॥

એવં સૃષ્ટિઃ સમુત્પન્ના ત્રિવિધા નૃપસત્તમ ।
દેવતિર્યઙ્મનુષ્યાદિભેદૈર્વિવિધકલ્પિતા ॥ ૨૪॥

અણ્ડજાઃ સ્વેદજાશ્ચૈવ ચોદ્ભિજ્જાશ્ચ જરાયુજાઃ ।
ચતુર્ભેદૈઃ સમુત્પન્ના જીવાઃ કર્મયુતાઃ કિલ ॥ ૨૫॥

એવં સૃષ્ટિં સમાસાદ્ય બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
વિહારં સ્વેષુ સ્થાનેષુ ચક્રુઃ સર્વે યથેપ્સિતમ્ ॥ ૨૬॥

એવં પ્રવર્તિતે સર્ગે ભગવાન્પ્રભુરચ્યુતઃ ।
મહાલક્ષ્મ્યા સમં તત્ર ચિક્રીડ ભુવને સ્વકે ॥ ૨૭॥

એકસ્મિન્સમયે વિષ્ણુર્વૈકુણ્ઠે સંસ્થિતઃ પુરા ।

સુધાસિન્ધુસ્થિતં દ્વીપં સસ્માર મણિમણ્ડિતમ્ ॥ ૨૮॥

યત્ર દૃષ્ટ્વા મહામાયાં મન્ત્રશ્ચાસાદિતઃ શુભઃ ।
સ્મૃત્વા તાં પરમાં શક્તિં સ્ત્રીભાવં ગમિતો યથા ॥ ૨૯॥

યજ્ઞં કર્તું મનશ્ચક્રે અમ્બિકાયા રમાપતિઃ ।
ઉત્તીર્ય ભુવનાત્તસ્માત્સમાહૂય મહેશ્વરમ્ ॥ ૩૦॥

બ્રહ્માણં વરુણં શક્રં કુબેરં પાવકં યમમ્ ।
વસિષ્ઠં કશ્યપં દક્ષં વામદેવં બૃહસ્પતિમ્ ॥ ૩૧॥

સમ્ભારં કલ્પયામાસ યજ્ઞાર્થં ચાતિવિસ્તરમ્ ।
મહાવિભવસંયુક્તં સાત્ત્વિકઞ્ચ મનોહરમ્ ॥ ૩૨॥

મણ્ડપં વિતતં તત્ર કારયામાસ શિલ્પિભિઃ ।
ઋત્વિજો વરયામાસ સપ્તવિંશતિસુવ્રતાન્ ॥ ૩૩॥

ચિતિઞ્ચ કારયામાસ વેદીશ્ચૈવ સુવિસ્તરાઃ ।
પ્રજેપુર્બ્રાહ્મણા મન્ત્રાન્દેવ્યા બીજસમન્વિતાન્ ॥ ૩૪॥

જુહુવુસ્તે હવિઃ કામં વિધિવત્પરિકલ્પિતે ।
કૃતે તુ વિતતે હોમે વાગુવાચાશરીરિણી ॥ ૩૫॥

વિષ્ણું તદા સમાભાષ્ય સુસ્વરા મધુરાક્ષરા ।
વિષ્ણો ત્વં ભવ દેવાનાં હરે શ્રેષ્ઠતમઃ સદા ॥ ૩૬॥

માન્યશ્ચ પૂજનીયશ્ચ સમર્થશ્ચ સુરેષ્વપિ ।
સર્વે ત્વામર્ચયિષ્યન્તિ બ્રહ્માદ્યાશ્ચ સવાસવાઃ ॥ ૩૭॥

પ્રભવિષ્યન્તિ ભો ભક્ત્યા માનવા ભુવિ સર્વતઃ ।
વરદસ્ત્વં ચ સર્વેષાં ભવિતા માનવેષુ વૈ ॥ ૩૮॥

કામદઃ સર્વદેવાનાં પરમઃ પરમેશ્વરઃ ।
સર્વયજ્ઞેષુ મુખ્યસ્ત્વં પૂજ્યઃ સર્વૈશ્ચ યાજ્ઞિકૈઃ ॥ ૩૯॥

ત્વાં જનાઃ પૂજયિષ્યન્તિ વરદસ્ત્વં ભવિષ્યસિ ।
શ્રયિષ્યન્તિ ચ દેવાસ્ત્વાં દાનવૈરતિપીડિતાઃ ॥ ૪૦॥

શરણસ્ત્વઞ્ચ સર્વેષાં ભવિતા પુરુષોત્તમ ।
પુરાણેષુ ચ સર્વેષુ વેદેષુ વિતતેષુ ચ ॥ ૪૧॥

ત્વં વૈ પૂજ્યતમઃ કામં કીર્તિસ્તવ ભવિષ્યતિ ।
યદા યદા હિ ધર્મસ્ય ગ્લાનિર્ભવતિ ભૂતલે ॥ ૪૨॥

તદાંશેનાવતીર્યાશુ કર્તવ્યં ધર્મરક્ષણમ્ ।
અવતારાઃ સુવિખ્યાતાઃ પૃથિવ્યાં તવ ભાગશઃ ॥ ૪૩॥

ભવિષ્યન્તિ ધરાયાં વૈ માનનીયા મહાત્મનામ્ ।
અવતારેષુ સર્વેષુ નાનાયોનિષુ માધવ ॥ ૪૪॥

વિખ્યાતઃ સર્વલોકેષુ ભવિતા મધુસૂદન ।
અવતારેષુ સર્વેષુ શક્તિસ્તે સહચારિણી ॥ ૪૫॥

ભવિષ્યતિ મમાંશેન સર્વકાર્યપ્રસાધિની ।
વારાહી નારસિંહી ચ નાનાભેદૈરનેકધા ॥ ૪૬॥

નાનાયુધાઃ શુભાકારાઃ સર્વાભરણમણ્ડીતાઃ ।
તાભિર્યુક્તઃ સદા વિષ્ણો સુરકાર્યાણિ માધવ ॥ ૪૭॥

સાધયિષ્યસિ તત્સર્વં મદ્દત્તવરદાનતઃ ।
તાસ્ત્વયા નાવમન્તવ્યાઃ સર્વદા ગર્વલેશતઃ ॥ ૪૮॥

પૂજનીયાઃ પ્રયત્નેન માનનીયાશ્ચ સર્વથા ।
નૂનં તા ભારતે ખણ્ડે શક્તયઃ સર્વકામદાઃ ॥ ૪૯॥

ભવિષ્યન્તિ મનુષ્યાણાં પૂજિતાઃ પ્રતિમાસુ ચ ।
તાસાં તવ ચ દેવેશ કીર્તિઃ સ્યાન્દખિલેષ્વપિ ॥ ૫૦॥

દ્વીપેષુ સપ્તસ્વપિ ચ વિખ્યાતા ભુવિ મણ્ડલે ।
તાશ્ચ ત્વાં વૈ મહાભાગ માનવા ભુવિ મણ્ડલે ॥ ૫૧॥

અર્ચયિષ્યન્તિ વાઞ્છાર્થં સકામાઃ સતતં હરે ।
અર્ચાસુ ચોપહારૈશ્ચ નાનાભાવસમન્વિતાઃ ॥ ૫૨॥

પૂજયિષ્યન્તિ વેદોક્તૈર્મન્ત્રૈર્નામજપૈસ્તથા ।
મહિમા તવ ભૂર્લોકે સ્વર્ગે ચ મધુસૂદન ॥ ૫૩॥

પૂજનાદ્દેવદેવેશ વૃદ્ધિમેષ્યતિ માનવૈઃ ।
વ્યાસ ઉવાચ ।
ઇતિ દત્ત્વા વરાન્વાણી વિરરામ ખસમ્ભવા ॥ ૫૪॥

ભગવાનપિ પ્રીતાત્મા હ્યભવચ્છ્રવણાદિવ ।

સમાપ્ય વિધિવદ્યજ્ઞં ભગવાન્હરિરીશ્વરઃ ॥ ૫૫॥

વિસર્જયિત્વા તાન્દેવાન્બ્રહ્મપુત્રાન્મુનીનથ ।
જગામાનુચરૈઃ સાર્ધં વૈકુણ્ઠં ગરુડધ્વજઃ ॥ ૫૬॥

સ્વાનિ સ્વાનિ ચ ધિષ્ણ્યાનિ પુનઃ સર્વે સુરાસ્તતઃ ।
મુનયો વિસ્મિતા વાર્તાં કુર્વન્તસ્તે પરસ્પરં ।૫૭॥

યયુઃ પ્રમુદિતાઃ કામં સ્વાશ્રમાન્પાવનાનથ ॥ ૫૮॥

શ્રુત્વા વાણીં પરમવિશદાં વ્યોમજાં શ્રોત્રરમ્યાં
સર્વેષાં વૈ પ્રકૃતિવિષયે ભક્તિભાવશ્ચ જાતઃ ।
ચક્રુઃ સર્વે દ્વિજમુનિગણાઃ પૂજનં ભક્તિયુક્તા-
સ્તસ્યાઃ કામં નિખિલફલદં ચાગમોક્તં મુનીન્દ્રાઃ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
અમ્બિકામખસ્ય વિષ્ણુનાનુષ્ઠાનવર્ણનં ત્રયોદશોઽધ્યાયઃ ॥ ૩.૧૩॥

## ૩.૧૪ ચતુર્દશોઽધ્યાયઃ । યુધાજિદ્વીરસેનયોર્યુદ્ધાર્થં સજ્જીભવનમ્ ।

જનમેજય ઉવાચ ।
શ્રુતો વૈ હરિણા ક્લૃપ્તો યજ્ઞો વિસ્તરતો દ્વિજ ।
મહિમાનં તથામ્બાયા વદ વિસ્તરતો મમ ॥ ૧॥

શ્રુત્વા દેવ્યાશ્ચરિત્રં વૈ કુર્વે મખમનુત્તમમ્ ।
પ્રસાદાત્તવ વિપ્રેન્દ્ર ભવિષ્યામિ ચ પાવનઃ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ ृણુ રાજન્પ્રવક્ષ્યામિ દેવ્યાશ્ચરિતમુત્તમમ્ ।
ઇતિહાસં પુરાણઞ્ચ કથયામિ સુવિસ્તરમ્ ॥ ૩॥

કોસલેષુ નૃપશ્રેષ્ઠઃ સૂર્યવંશસમુદ્ભવઃ ।
પુષ્યપુત્રો મહાતેજા ધ્રુવસન્ધિરિતિ સ્મૃતઃ ॥ ૪॥

ધર્માત્મા સત્યસન્ધશ્ચ વર્ણાશ્રમહિતે રતઃ ।
અયોધ્યાયાં સમૃદ્ધાયાં રાજ્યં ચક્રે શુચિવ્રતઃ ॥ ૫॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાન્યે તથા દ્વિજાઃ ।
સ્વાં સ્વાં વૃત્તિં સમાસ્થાય તદ્રાજ્યે ધર્મતોઽભવન્ ॥ ૬॥

ન ચૌરાઃ પિશુના ધૂર્તાસ્તસ્ય રાજ્યે ચ કુત્રચિત્ ।
દમ્ભાઃ કૃતઘ્ના મૂર્ખાશ્ચ વસન્તિ કિલ માનવાઃ ॥ ૭॥

એવં વૈ વર્તમાનસ્ય નૃપસ્ય કુરુસત્તમ ।
દ્વે પત્ન્યૌ રૂપસમ્પન્ને હ્યાસતુઃ કામભોગદે ॥ ૮॥

મનોરમા ધર્મપત્ની સુરૂપાઽતિવિચક્ષણા ।
લીલાવતી દ્વિતીયા ચ સાઽપિ રૂપગુણાન્વિતા ॥ ૯॥

વિજહાર સપત્નીભ્યાં ગૃહેષૂપવનેષુ ચ ।
ક્રીડાગિરૌ દીર્ઘિકાસુ સૌધેષુ વિવિધેષુ ચ ॥ ૧૦॥

મનોરમા શુભે કાલે સુષુવે પુત્રમુત્તમમ્ ।
સુદર્શનાભિધં પુત્રં રાજલક્ષણસંયુતમ્ ॥ ૧૧॥

લીલાવત્યપિ તત્પત્ની માસેનૈકેન ભામિની ।
સુષુવે સુન્દરં પુત્રં શુભે પક્ષે દિને તથા ॥ ૧૨॥

ચકાર નૃપતિસ્તત્ર જાતકર્માદિકં દ્વયોઃ ।
દદૌ દાનાનિ વિપ્રેભ્યઃ પુત્રજન્મપ્રમોદિતઃ ॥ ૧૩॥

પ્રીતિં તયોઃ સમાં રાજા ચકાર સુતયોર્નૃપ ।
નૃપશ્ચકાર સૌહાર્દેષ્વન્તરં ન કદાચન ॥ ૧૪॥

ચૂડાકર્મ તયોશ્ચક્રે વિધિના નૃપસત્તમઃ ।
યથાવિભવમેવાસૌ પ્રીતિયુક્તઃ પરન્તપઃ ॥ ૧૫॥

કૃતચૂડૌ સુતૌ કામં જહ્રતુર્નૃપતેર્મનઃ ।
ક્રીડમાનાવુભૌ કાન્તૌ લોકાનામનુરઞ્જકૌ ॥ ૧૬॥

તયોઃ સુદર્શનો જ્યેષ્ઠો લીલાવત્યાઃ સુતઃ શુભઃ ।
શત્રુજિત્સંજ્ઞકઃ કામં ચાટુવાક્યો બભૂવ હ ॥ ૧૭॥

નૃપતેઃ પ્રીતિજનકો મઞ્જુવાક્યાસુદર્શનઃ ।
પ્રજાનાં વલ્લભઃ સોઽભૂત્તથા મન્ત્રિજનસ્ય વૈ ॥ ૧૮॥

તથા તસ્મિન્નૃપઃ પ્રીતિઞ્ચકાર ગુણયોગતઃ ।
મન્દભાગ્યાન્મન્દભાવો ન તથા વૈ સુદર્શને ॥ ૧૯॥

એવં ગચ્છતિ કાલે તુ ધ્રુવસન્ધિર્નૃપોત્તમઃ ।
જગામ વનમધ્યેઽસૌ મૃગયાભિરતઃ સદા ॥ ૨૦॥

નિઘ્નન્મૃગાન્ રુરૂન્કમ્બૂન્સૂકરાન્ગવયાઞ્છશાન્ ।
મહિષાઞ્છરભાન્ખડ્ગાંશ્ચિક્રીડ નૃપતિર્વને ॥ ૨૧॥

ક્રીડમાને નૃપે તત્ર વને ઘોરેઽતિદારુણે ।
ઉદતિષ્ઠન્નિકુઞ્જાત્તુ સિંહઃ પરમકોપનઃ ॥ ૨૨॥

રાજ્ઞા શિલીમુખેનાદૌ વિદ્ધઃ ક્રોધવશં ગતઃ ।
દૃષ્ટ્વાગ્રે નૃપતિં સિંહો નનાદ મેઘનિઃસ્વનઃ ॥ ૨૩॥

કૃત્વા ચોર્ધ્વં સ લાઙ્ગૂલં પ્રસારિતબૃહત્સટઃ ।
હન્તું નૃપતિમાકાશાદુત્પપાતાતિકોપનઃ ॥ ૨૪॥

નૃપતિસ્તરસા વીક્ષ્ય દધારાસિં કરે તદા ।
વામે ચર્મ સમાદાય સ્થિતઃ સિંહ ઇવાપરઃ ॥ ૨૫॥

સેવકાસ્તસ્ય યે સર્વે તેઽપિ બાણાન્પૃથક્પૃથક્ ।
અમુઞ્ચન્કુપિતાઃ કામં સિંહોપરિ રુષાન્વિતાઃ ॥ ૨૬॥

હાહાકારો મહાનાસીત્સમ્પ્રહારશ્ચ દારુણઃ ।
ઉત્પપાત તતઃ સિંહો નૃપસ્યોપરિ દારુણઃ ॥ ૨૭॥

તં પતન્તં સમાલોક્ય ખડ્ગેનાભ્યહનન્નૃપઃ ।
સોઽપિ ક્રૂરૈર્નખાગ્રૈશ્ચ તત્રાગત્ય વિદારિતઃ ॥ ૨૮॥

સ નખૈરાહતો રાજા પપાત ચ મમાર વૈ ।
ચુક્રુશુઃ સૈનિકાસ્તે તુ નિર્જઘ્નુર્વિશિખૈસ્તદા ॥ ૨૯॥

મૃતઃ સિંહોઽપિ તત્રૈવ ભૂપતિશ્ચ તથા મૃતઃ ।
સૈનિકૈર્મન્ત્રિમુખ્યાશ્ચ તત્રાગત્ય નિવેદિતાઃ ॥ ૩૦॥

પરલોકગતં ભૂપં શ્રુત્વા તે મન્ત્રિસત્તમાઃ ।
સંસ્કારં કારયામાસુર્ગત્વા તત્ર વનાન્તિકે ॥ ૩૧॥

પરલોકક્રિયાં સર્વાં વસિષ્ઠો વિધિપૂર્વકમ્ ।
કારયામાસ તત્રૈવ પરલોકસુખાવહમ્ ॥ ૩૨॥

પ્રજાઃ પ્રકૃતયશ્ચૈવ વસિષ્ઠશ્ચ મહામુનિઃ ।
સુદર્શનં નૃપં કર્તું મન્ત્રં ચક્રુઃ પરસ્પરમ્ ॥ ૩૩॥

ધર્મપત્નીસુતઃ શાન્તઃ પુરુષશ્ચ સુલક્ષણઃ ।

અયં નૃપાસનાર્હશ્ચ હ્યબ્રુવન્મન્ત્રિસત્તમાઃ ॥ ૩૪॥

વસિષ્ઠોઽપિ તથૈવાહ યોગ્યોઽયં નૃપતેઃ સુતઃ ।
બાલોઽપિ ધર્મવાન્ રાજા નૃપાસનમિહાર્હતિ ॥ ૩૫॥

કૃતે મન્ત્રે મન્ત્રિવૃદ્ધૈર્યુધાજિન્નામ પાર્થિવઃ ।
તત્રાજગામ તરસા શ્રુત્વા તૂજ્જયિનીપતિઃ ॥ ૩૬॥

મૃતં જામાતરં શ્રુત્વા લીલાવત્યાઃ પિતા તદા ।
તત્રાજગામ ત્વરિતો દૌહિત્રપ્રિયકામ્યયા ॥ ૩૭॥

વીરસેનસ્તથાઽઽયાતઃ સુદર્શનહિતેચ્છયા ।
કલિઙ્ગાધિપતિશ્ચૈવ મનોરમાપિતા નૃપઃ ॥ ૩૮॥

ઉભૌ તૌ સૈન્યસંયુક્તૌ નૃપૌ સાધ્વસસંસ્થિતૌ ।
ચક્રતુર્મન્ત્રિમુખ્યૈસ્તૈર્મન્ત્રં રાજ્યસ્ય કારણાત્ ॥ ૩૯॥

યુધાજિત્તુ તદાઽપૃચ્છજ્જ્યેષ્ઠઃ કઃ સુતતોર્દ્વયોઃ ।
રાજ્યં પ્રાપ્નોતિ જ્યેષ્ઠો વૈ ન કનીયાન્કદાચન ॥ ૪૦॥

વીરસેનોઽપિ તત્રાહ ધર્મપત્નીસુતઃ કિલ ।
રાજ્યાર્હઃ સ યથા રાજન્ શાસ્ત્રજ્ઞેભ્યો મયા શ્રુતમ્ ॥ ૪૧॥

યુધાજિત્પુનરાહેદં જ્યેષ્ઠોઽયં ચ યથા ગુણૈઃ ।
રાજલક્ષણસંયુક્તો ન તથાયં સુદર્શનઃ ॥ ૪૨॥

વિવાદોઽત્ર સુસમ્પન્નો નૃપયોસ્તત્ર લુબ્ધયોઃ ।
કઃ સન્દેહમપાકર્તું ક્ષમઃ સ્યાદતિસઙ્કટે ॥ ૪૩॥

યુધાજિન્મન્ત્રિણઃ પ્રાહ યૂયં સ્વાર્થપરાઃ કિલ ।
સુદર્શનં નૃપં કૃત્વા ધનં ભોક્તું કિલેચ્છથ ॥ ૪૪॥

યુષ્માકં તુ વિચારોઽયં મયા જ્ઞાતસ્તથેઙ્ગિતૈઃ ।
શત્રુજિત્સબલસ્તસ્માત્સમ્મતો વો નૃપાસને ॥ ૪૫॥

મયિ જીવતિ કઃ કુર્યાત્કનીયાંસં નૃપં કિલ ।
ત્યક્ત્વા જ્યેષ્ઠં ગુણાર્હઞ્ચ સેનયા ચ સમન્વિતમ્ ॥ ૪૬॥

નૂનં યુદ્ધં કરિષ્યામિ તસ્મિન્ખઙ્ગસ્ય મેદિની ।
ધારયા ચ દ્વિધા ભૂયાદ્યુષ્માકં તત્ર કા કથા ॥ ૪૭॥

વીરસેનસ્તુ તચ્છ્રુત્વા યુધાજિતમભાષત ।
બાલૌ દ્વૌ સદૃશપ્રજ્ઞૌ કો ભેદોઽત્ર વિચક્ષણ ॥ ૪૮॥

એવં વિવદમાનૌ તૌ સંસ્થિતૌ નૃપતી તદા ।
પ્રજાશ્ચ ઋષયશ્ચૈવ બભૂવુર્વ્યગ્રમાનસાઃ ॥ ૪૯॥

સમાજગ્મુશ્ચ સામન્તાઃ સસૈન્યાઃ ક્લેશતત્પરાઃ ।
વિગ્રહઞ્ચાભિકાઙ્ક્ષન્તઃ પરસ્પરમતન્દ્રિતાઃ ॥ ૫૦॥

નિષાદા હ્યાયયુસ્તત્ર શ‍ૃઙ્ગવેરપુરાશ્રયાઃ ।
રાજદ્રવ્યમપાહર્તું મૃતં શ્રુત્વા મહીપતિમ્ ॥ ૫૧॥

પુત્રૌ ચ બાલકૌ શ્રુત્વા વિગ્રહં ચ પરસ્પરમ્ ।
ચૌરાસ્તત્ર સમાજગ્મુર્દેશદેશાન્તરાદપિ ॥ ૫૨॥

સમ્મર્દસ્તત્ર સઞ્જાતઃ કલહે સમુપસ્થિતે ।
યુધાજિદ્વીરસેનશ્ચ યુદ્ધકામૌ બભૂવતુઃ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
યુધાજિદ્વીરસેનયોર્યુદ્ધાર્થં સજ્જીભવનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૩.૧૪॥

## ૩.૧૫ પઞ્ચદશોઽધ્યાયઃ । મનોરમયા ભારદ્વાજાશ્રમં પ્રતિ ગમનમ્ ।

વ્યાસ ઉવાચ ।
સંયુગે ચ સતિ તત્ર ભૂપયોરાહવાય સમુપાત્તશસ્ત્રયોઃ ।
ક્રોધલોભવશયોઃ સમં તતઃ સમ્બભૂવ તુમુલસ્તુ વિમર્દઃ ॥ ૧॥

સંસ્થિતઃ સ સમરે ધૃતચાપઃ પાર્થિવઃ પૃથુલબાહુયુધાજિત્ ।
સંયુતઃ સ્વબલવાહનાદિકૈરાહવાય કૃતનિશ્ચયો નૃપઃ ॥ ૨॥

વીરસેન ઇહ સૈન્યસંયુતઃ ક્ષાત્રધર્મમનુસૃત્ય સઙ્ગરે ।
પુત્રિકાત્મજહિતાય પાર્થિવઃ સંસ્થિતઃ સુરપતેઃ સમતેજાઃ ॥ ૩॥

સ બાણવૃષ્ટિં વિસસર્જ પાર્થિવો
યુધાજિતં વીક્ષ્ય રણે સ્થિતઞ્ચ ।
ગિરિં તડિત્વાનિવ તોયવૃષ્ટિભિઃ
ક્રોધાન્વિતઃ સત્યપરાક્રમોઽસૌ ॥ ૪॥

તં વીરસેનો વિશિખૈઃ શિલાશિતૈઃ

સમાવૃણોદાશુગમૈરજિહ્મગૈઃ ।
ચિચ્છેદ બાણૈશ્ચ શિલીમુખાનસૌ
તેનૈવ મુક્તાનતિવેગપાતિનઃ ॥ ૫॥

ગજરથતુરગાણાં સમ્બભૂવાતિયુદ્ધં
સુરનરમુનિસઙ્ઘૈર્વીક્ષિતઞ્ચાતિઘોરમ્ ।
વિતતવિહગવૃન્દૈરાવૃતં વ્યોમ સદ્યઃ
પિશિતમશિતુકામૈઃ કામગૃધ્રાદિભિશ્ચ ॥ ૬॥

તત્રાદ્ભુતા ક્ષતજસિન્ધુરુવાહ ઘોરા
વૃન્દેભ્ય એવ ગજવીરતુરઙ્ગમાણામ્ ।
ત્રાસાવહા નયનમાર્ગગતા નરાણાં
પાપાત્મનાં રવિજમાર્ગભવેવ કામમ્ ॥ ૭॥

કીર્ણાનિ ભિન્નપુલિને નરમસ્તકાનિ
કેશાવૃતાનિ ચ વિભાન્તિ યથૈવ સિન્ધૌ ।
તુમ્બીફલાનિ વિહિતાનિ વિહર્તુકામૈ-
ર્બાલૈર્યથા રવિસુતાપ્રભવૈશ્ચ નૂનમ્ ॥ ૮॥

વીરં મૃતં ભુવિ ગતં પતિતં રથાદ્વૈ
ગૃધ્રઃ પલાર્થમુપરિ ભ્રમતીતિ મન્યે ।
જીવોઽપ્યસૌ નિજશરીરમવેક્ષ્ય કાન્તં
કાઙ્ક્ષત્યહોઽતિવિવશોઽપિ પુનઃ પ્રવેષ્ટુમ્ ॥ ૯॥

આજૌ હતોઽપિ નૃવરઃ સુવિમાનરૂઢઃ
સ્વાઙ્કે સ્થિતાં સુરવધૂં પ્રવદત્યભીષ્ટમ્ ।
પશ્યાધુના મમ શરીરમિદં પૃથિવ્યાં
બાણાહતં નિપતિતં કરભોરુ કાન્તમ્ ॥ ૧૦॥

એકો હતસ્તુ રિપુણૈવ ગતોઽન્તરિક્ષં
દેવાઙ્ગનાં સમધિગમ્ય યુતો વિમાને ।
તાવત્પ્રિયા હુતવહે સુસમર્પ્ય દેહં
જગ્રાહ કાન્તમબલા સબલા સ્વકીયા ॥ ૧૧॥

યુદ્ધે મૃતૌ ચ સુભટૌ દિવિ સઙ્ગતૌ તા-
વન્યોન્યશસ્ત્રનિહતૌ સહ સમ્પ્રયાતૌ ।
તત્રૈવ જઘ્નતુરલં પરમાહિતાસ્ત્રા-

વેકાપ્સરોઽર્થવિહતૌ કલહાકુલૌ ચ ॥ ૧૨॥

કશ્ચિદ્યુવા સમધિગમ્ય સુરાઙ્ગનાં વૈ
રૂપાધિકાં ગુણવતીં કિલ ભક્તિયુક્તઃ ।
સ્વીયાન્ ગુણાન્પ્રવિતતાન્પ્રવદંસ્તદાઽસૌ
તાં પ્રેમદામનુચકાર ચ યોગયુક્તઃ ॥ ૧૩॥

ભૌમં રજોઽતિવિતતં દિવિ સંસ્થિતઞ્ચ
રાત્રિં ચકાર તરણિઞ્ચ સમાવૃણોદ્યત્ ।
મગ્નં તદેવ રુધિરામ્બુનિધાવકસ્માત્
પ્રાદુર્બભૂવ રવિરપ્યતિકાન્તિયુક્તઃ ॥ ૧૪॥

કશ્ચિદ્ગતસ્તુ ગગનં કિલ દેવકન્યાં
સમ્પ્રાપ્ય ચારુવદનાં કિલ ભક્તિયુક્તામ્ ।
નાઙ્ગીચકાર ચતુરો વ્રતનાશભીતો
યાસ્યત્યયં મમ વૃથા હ્યનુકૂલશબ્દઃ ॥ ૧૫॥

સઙ્ગ્રામે સંવૃતે તત્ર યુધાજિત્પૃથિવીપતિઃ ।
જઘાન વીરસેનં તં બાણૈસ્તીવ્રૈઃ સુદારુણૈઃ ॥ ૧૬॥

નિહતઃ સ પપાતોર્વ્યાં છિન્નમૂર્ધા મહીપતિઃ ।
પ્રભગ્નં તદ્બલં સર્વં નિર્ગતં ચ ચતુર્દિશમ્ ॥ ૧૭॥

મનોરમા હતં શ્રુત્વા પિતરં રણમૂર્ધનિ ।
ભયત્રસ્તાથ સઞ્જાતા પિતુર્વૈરમનુસ્મરન્ ॥ ૧૮॥

હનિષ્યતિ યુધાજિદ્વૈ પુત્રં મમ દુરાશયઃ ।
રાજ્યલોભેન પાપાત્મા સેતિ ચિન્તાપરાભવત્ ॥ ૧૯॥

કિં કરોમિ ક્વ ગચ્છામિ પિતા મે નિહતો રણે ।
ભર્તા ચાપિ મૃતોઽદ્યૈવ પુત્રોઽયં મમ બાલકઃ ॥ ૨૦॥

લોભોઽતીવ ચ પાપિષ્ઠસ્તેન કો ન વશીકૃતઃ ।
કિં ન કુર્યાત્તદાવિષ્ટઃ પાપં પાર્થિવસત્તમઃ ॥ ૨૧॥

પિતરં માતરં ભ્રાતૄન્ગુરૂન્સ્વજનબાન્ધવાન્ ।
હન્તિ લોભસમાવિષ્ટો જનો નાત્ર વિચારણા ॥ ૨૨॥

અભક્ષ્યભક્ષણં લોભાદગમ્યાગમનં તથા ।

કરોતિ કિલ તૃષ્ણાર્તો ધર્મત્યાગં તથા પુનઃ ॥ ૨૩॥

ન સહાયોઽસ્તિ મે કશ્ચિન્નગરેઽત્ર મહાબલઃ ।
યદાધારે સ્થિતા ચાહં પાલયામિ સુતં શુભમ્ ॥ ૨૪॥

હતે પુત્રે નૃપેણાદ્ય કિં કરિષ્યામ્યહં પુનઃ ।
ન મે ત્રાતાઽસ્તિ ભુવને યેન વૈ સુસ્થિતા હ્યહમ્ ॥ ૨૫॥

સાપિ વૈરયુતા કામં સપત્ની સર્વદા ભવેત્ ।
લીલાવતી ન મે પુત્રે ભવિષ્યતિ દયાવતી ॥ ૨૬॥

યુધાજિતિ સમાયાતે ન મે નિઃસરણં ભવેત્ ।
જ્ઞાત્વા બાલં સુતં સોઽદ્ય કારાગારં નયિષ્યતિ ॥ ૨૭॥

શ્રૂયતે હિ પુરેન્દ્રેણ માતુર્ગર્ભગતઃ શિશુઃ ।
કૃન્તિતઃ સપ્તધા પશ્ચાત્કૃતાસ્તે સપ્ત સપ્તધા ॥ ૨૮॥

પ્રવિશ્ય ચોદરં માતુઃ કરે કૃત્વાલ્પકં પવિમ્ ।
એકોનપઞ્ચાશદપિ તેઽભવન્મરુતો દિવિ ॥ ૨૯॥

સપત્ન્યૈ ગરલં દત્તં સપત્ન્યા નૃપભાર્યયા ।
ગર્ભનાશાર્થમુદ્દિશ્ય પુરૈતદ્વૈ મયા શ્રુતમ્ ॥ ૩૦॥

જાતસ્તુ બાલકઃ પશ્ચાદ્દેહે વિષયુતઃ કિલ ।
તેનાસૌ સગરો નામ વિખ્યાતો ભુવિ મણ્ડલે ॥ ૩૧॥

જીવમાનોઽથ ભર્તા વૈ કૈકેય્યા નૃપભાર્યયા ।
રામઃ પ્રવ્રાજિતો જ્યેષ્ઠો મૃતો દશરથો નૃપઃ ॥ ૩૨॥

મન્ત્રિણસ્ત્વવશાઃ કામં યે મે પુત્રં સુદર્શનમ્ ।
રાજાનં કર્તુકામા વૈ યુધાજિદ્વશગાશ્ચ તે ॥ ૩૩॥

ન મે ભ્રાતા તથા શૂરો યો માં બન્ધાત્પ્રમોચયેત્ ।
મહત્કષ્ટઞ્ચ સમ્પ્રાપ્તં મયા વૈ દૈવયોગતઃ ॥ ૩૪॥

ઉદ્યમઃ સર્વથા કાર્યઃ સિદ્ધિર્દૈવાદ્ધિ જાયતે ।
ઉપાયં પુત્રરક્ષાર્થં કરોમ્યદ્ય ત્વરાન્વિતા ॥ ૩૫॥

ઇતિ સઞ્ચિન્ત્ય સા બાલા વિદલ્લં ચાતિમાનિનમ્ ।
નિપુણં સર્વકાર્યેષુ ચિન્ત્યં મન્ત્રિવરોત્તમમ્ ॥ ૩૬॥

સમાહૂય તમેકાન્તે પ્રોવાચ બહુદુઃખિતા ।
ગૃહીત્વા બાલકં હસ્તે રુદતી દીનમાનસા ॥ ૩૭॥

પિતા મે નિહતઃ સઙ્ખ્યે પુત્રોઽયં બાલકસ્તથા ।
યુધાજિદ્બલવાન્ રાજા કિં વિધેયં વદસ્વ મે ॥ ૩૮॥

તામુવાચ વિદલ્લોઽસૌ નાત્ર સ્થાતવ્યમેવ ચ ।
ગમિષ્યામો વને કામં વારાણસ્યાઃ પુનઃ કિલ ॥ ૩૯॥

તત્ર મે માતુલઃ શ્રીમાન્વર્તતે બલવત્તરઃ ।
સુબાહુરિતિ વિખ્યાતો રક્ષિતા સ ભવિષ્યતિ ॥ ૪૦॥

યુધાજિદ્દર્શનોત્કણ્ઠમનસા નગરાદ્બહિઃ ।
નિર્ગત્ય રથમારુહ્ય ગન્તવ્યં નાત્ર સંશયઃ ॥ ૪૧॥

ઇત્યુક્તા તેન સા રાજ્ઞી ગત્વા લીલાવતીં પ્રતિ ।
ઉવાચ પિતરં દ્રષ્ટું ગચ્છામ્યદ્ય સુલોચને ॥ ૪૨॥

ઇત્યુક્ત્વા રથમારુહ્ય સૈરન્ધ્રીસંયુતા તદા ।
વિદલ્લેન ચ સંયુક્તા નિઃસૃતા નગરાદ્બહિઃ ॥ ૪૩॥

ત્રસ્તા હ્યાર્તાતિકૃપણા પિતુઃ શોકસમાકુલા ।
દૃષ્ટ્વા યુધાજિતં ભૂપં પિતરં ગતજીવિતમ્ ॥ ૪૪॥

સંસ્કાર્ય ચ ત્વરાયુક્તા વેપમાના ભયાકુલા ।
દિનદ્વયેન સમ્પ્રાપ્તા રાજ્ઞી ભાગીરથીતટમ્ ॥ ૪૫॥

નિષાદૈર્લુણ્ઠિતા તત્ર ગૃહીતં સકલં વસુ ।
રથઞ્ચાપિ ગૃહીત્વા તે નિર્ગતા દસ્યવઃ શઠાઃ ॥ ૪૬॥

રુદતી સુતમાદાય ચારુવસ્ત્રા મનોરમા ।
નિર્યયૌ જાહ્નવીતીરે સૈરન્ધ્રીકરલમ્બિતા ॥ ૪૭॥

આરુહ્ય ચ ભયાચ્છીઘ્રમુડુપં સા ભયાકુલા ।
તીર્ત્વા ભાગીરથીં પુણ્યાં યયૌ ત્રિકૂટપર્વતમ્ ॥ ૪૮॥

ભારદ્વાજાશ્રમં પ્રાપ્તા ત્વરયા ચ ભયાકુલા ।
સંવીક્ષ્ય તાપસાંસ્તત્ર સઞ્જાતા નિર્ભયા તદા ॥ ૪૯॥

મુનિના સા તતઃ પૃષ્ટા કાઽસિ કસ્ય પરિગ્રહઃ ।
કષ્ટેનાત્ર કથં પ્રાપ્તા સત્યં બ્રૂહિ શુચિસ્મિતે ॥ ૫૦॥

દેવી વા માનુષી વાસિ બાલપુત્રા વને કથમ્ ।
રાજ્યભ્રષ્ટેવ વામોરુ ભાસિ ત્વં કમલેક્ષણે ॥ ૫૧॥

એવં સા મુનિના પૃષ્ટા નોવાચ વરવર્ણિની ।
રુદતી દુઃખસન્તપ્તા વિદલ્લં ચ સમાદિશત્ ॥ ૫૨॥

વિદલ્લસ્તમુવાચેદં ધ્રુવસન્ધિર્નૃપોત્તમઃ ।
તસ્ય ભાર્યા ધર્મપત્ની નામ્ના ચેયં મનોરમા ॥ ૫૩॥

સિંહેન નિહતો રાજા સૂર્યવંશી મહાબલઃ ।
પુત્રોઽયં નૃપતેસ્તસ્ય નામ્ના ચૈવ સુદર્શનઃ ॥ ૫૪॥

અસ્યાઃ પિતાતિધર્માત્મા દૌહિત્રાર્થં મૃતો રણે ।
યુધાજિદ્ભયસન્ત્રસ્તા સમ્પ્રાપ્તા વિજને વને ॥ ૫૫॥

ત્વામેવ શરણં પ્રાપ્તા બાલપુત્રા નૃપાત્મજા ।
ત્રાતા ભવ મહાભાગ ત્વમસ્યા મુનિસત્તમ ॥ ૫૬॥

આર્તસ્ય રક્ષણે પુણ્યં યજ્ઞાધિકમુદાહૃતમ્ ।
ભયતસ્તસ્ય દીનસ્ય વિશેષફલદં સ્મૃતમ્ ॥ ૫૭॥

ઋષિરુવાચ ।
નિર્ભયા વસ કલ્યાણિ પુત્રં પાલય સુવ્રતે ।
ન તે ભયં વિશાલાક્ષિ કર્તવ્યં શત્રુસમ્ભવમ્ ॥ ૫૮॥

પાલયસ્વ સુતં કાન્તં રાજા તેઽયં ભવિષ્યતિ ।
નાત્ર દુઃખં તથા શોકઃ કદાચિત્સમ્ભવિષ્યતિ ॥ ૫૯॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તા મુનિના રાજ્ઞી સ્વસ્થા સા સમ્બભૂવ હ ।
ઉટજે મુનિના દત્તે વીતશોકા તદાવસત્ ॥ ૬૦॥

સૈરન્ધ્રીસહિતા તત્ર વિદલ્લેન ચ સંયુતા ।
સુદર્શનં પાલયાના ન્યવસત્સા મનોરમા ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
મનોરમયા ભારદ્વાજાશ્રમં પ્રતિ ગમનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૩.૧૫॥

## ૩.૧૬ ષોડશોઽધ્યાયઃ । યુધાજિદ્ભારદ્વાજયોઃ સંવાદવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
યુધાજિત્ત્વથ સઙ્ગ્રામાદ્ગત્વાઽયોધ્યાં મહાબલઃ ।
મનોરમાં ચ પપ્રચ્છ સુદર્શનજિઘાંસયા ॥ ૧॥

સેવકાન્ પ્રેષયામાસ ક્વ ગતેતિ મુહુર્વદન્ ।
શુભે દિનેઽથ દૌહિત્રં સ્થાપયામાસ ચાસને ॥ ૨॥

મન્ત્રિભિશ્ચ વસિષ્ઠેન મન્ત્રૈરાથર્વણૈઃ શુભૈઃ ।
અભિષિક્તશ્ચ સમ્પૂર્ણૈઃ કલશૈર્જલપૂરિતૈઃ ॥ ૩॥

ભેરીશઙ્ખનિનાદૈશ્ચ તૂર્યાણાં ચાથ નિઃસ્વનૈઃ ।
ઉત્સવસ્તુ નગર્યાં વૈ સમ્બભૂવ કુરૂદ્વહ ॥ ૪॥

વિપ્રાણાં વેદપાઠૈશ્ચ બન્દિનાં સ્તુતિભિસ્તથા ।
અયોધ્યા મુદિતેવાસીજ્જયશબ્દૈઃ સુમઙ્ગલૈઃ ॥ ૫॥

હૃષ્ટપુષ્ટજનાકીર્ણા સ્તુતિવાદિત્રનિઃસ્વના ।
નવે તસ્મિન્મહીપાલે પૂર્બભૌ નૂતનેવ સા ॥ ૬॥

કેચિત્સાધુજના યે વૈ ચક્રુઃ શોકં ગૃહે સ્થિતાઃ ।
સુદર્શનં વિચિન્ત્યાદ્ય ક્વ ગતોઽસૌ નૃપાત્મજઃ ॥ ૭॥

મનોરમાતિસાધ્વી સા ક્વ ગતા સુતસંયુતા ।
પિતાઽસ્યા નિહતઃ સઙ્ખ્યે રાજ્યલોભેન વૈરિણા ॥ ૮॥

ઇત્યેવં ચિન્ત્યમાનાસ્તે સાધવઃ સમબુદ્ધયઃ ।
અતિષ્ઠન્દુઃખિતાસ્તત્ર શત્રુજિદ્વશવર્તિનઃ ॥ ૯॥

યુધાજિદપિ દૌહિત્રં સ્થાપયિત્વા વિધાનતઃ ।
રાજ્યઞ્ચ મન્ત્રિસાત્કૃત્વા ચલિતઃ સ્વાં પુરીં પ્રતિ ॥ ૧૦॥

શ્રુત્વા સુદર્શનં તત્ર મુનીનામાશ્રમે સ્થિતમ્ ।
હન્તુકામો જગામાશુ ચિત્રકૂટં સ પર્વતમ્ ॥ ૧૧॥

નિષાદાધિપતિં શૂરં પુરસ્કૃત્ય બલાભિધમ્ ।
દુર્દર્શાખ્યમગાદાશુ શ‍ૃઙ્ગવેરપુરાધિપમ્ ॥ ૧૨॥

શ્રુત્વા મનોરમા તત્ર બભૂવાતિસુદુઃખિતા ।
આગચ્છન્તં બાલપુત્રા ભયાર્તા સૈન્યસંયુતમ્ ॥ ૧૩॥

તમુવાચાતિશોકાર્તા મુનિં સાશ્રુવિલોચના ।
કિં કરોમિ ક્વ ગચ્છામિ યુધાજિત્સમુપસ્થિતઃ ॥ ૧૪॥

પિતા મે નિહતોઽનેન દૌહિત્રો ભૂપતિઃ કૃતઃ ।
સુતં મે હન્તુકામોઽત્ર સમાયાતિ બલાન્વિતઃ ॥ ૧૫॥

પુરા શ્રુતં મયા સ્વામિન્પાણ્ડવા વૈ વને સ્થિતાઃ ।
મુનીનામાશ્રમે પુણ્યે પાઞ્ચાલ્યા સહિતાસ્તદા ॥ ૧૬॥

ગતાસ્તે મૃગયાં પાર્થા ભ્રાતરઃ પઞ્ચ એવ તે ।
દ્રૌપદી સંસ્થિતા તત્ર મુનીનામાશ્રમે શુભે ॥ ૧૭॥

ધૌમ્યોઽત્રિર્ગાલવઃ પૈલો જાવાલિર્ગૌતમો ભૃગુઃ ।
ચ્યવનશ્ચાત્રિગોત્રશ્ચ કણ્વશ્ચૈવ જતુઃ ક્રતુઃ ॥ ૧૮॥

વીતિહોત્રઃ સુમન્તુશ્ચ યજ્ઞદત્તોઽથ વત્સલઃ ।
રાશાસનઃ કહોડશ્ચ યવક્રીર્યજ્ઞકૃત્ક્રતુઃ ॥ ૧૯॥

એતે ચાન્યે ચ મુનયો ભારદ્વાજાદયઃ શુભાઃ ।
વેદપાઠયુતાઃ સર્વે સંસ્થિતાશ્ચાશ્રમે સ્થિતાઃ ॥ ૨૦॥

દાસીભિઃ સહિતા તત્ર યાજ્ઞસેની સ્થિતા મુને ।
આશ્રમે ચારુસર્વાઙ્ગી નિર્ભયા મુનિસંવૃતે ॥ ૨૧॥

પાર્થા મૃગાનુગાસ્તાવત્પ્રયાતાશ્ચ વનાદ્વનમ્ ।
ધનુર્બાણધરા વીરાઃ પઞ્ચ વૈ શત્રુતાપનાઃ ॥ ૨૨॥

તાવત્સિન્ધુપતિઃ શ્રીમાન્માર્ગસ્થો બલસંયુતઃ ।
આગતશ્ચાશ્રમાભ્યાશે શ્રુત્વા તુ નિગમન્ધ્વનિમ્ ॥ ૨૩॥

શ્રુત્વા વેદધ્વનિં રાજા મુનીનાં ભાવિતાત્મનામ્ ।
ઉત્તતાર રથાત્તૂર્ણં દર્શનાકાઙ્ક્ષયા નૃપઃ ॥ ૨૪॥

યદા નિરગમત્તત્ર ભૃત્યદ્વયસમન્વિતઃ ।
વેદપાઠયુતાન્વીક્ષ્ય મુનીનુદ્યમસંસ્થિતઃ ॥ ૨૫॥

કૃતાઞ્જલિપુટઃ સ્વામિન્સંસ્થિતોઽથ જયદ્રથઃ ।
આશ્રમે મુનિભિર્જુષ્ટે ભૂપતિઃ સંવિવેશ હ ॥ ૨૬॥

તત્રોપવિષ્ટં રાજાનં દ્રષ્ટુકામાઃ સ્ત્રિયસ્તદા ।

આયયુર્મુનિભાર્યાશ્ચ કોઽયમિત્યબ્રુવન્નૃપમ્ ॥ ૨૭॥

તાસાં મધ્યે વરારોહા યાજ્ઞસેની સમાગતા ।
જયદ્રથેન દૃષ્ટા સા રૂપેણ શ્રીરિવાપરા ॥ ૨૮॥

તાં વિલોક્યાસિતાપાઙ્ગીં દેવકન્યામિવાપરામ્ ।
પપ્રચ્છ નૃપતિર્ધૌમ્યં કેયં શ્યામા વરાનના ॥ ૨૯॥

ભાર્યા કસ્ય સુતા કસ્ય નામ્ના કા વરવર્ણિની ।
રૂપલાવણ્યસંયુક્તા શચીવ વસુધાઙ્ગતા ॥ ૩૦॥

બર્બૂલવનમધ્યસ્થા લવઙ્ગલતિકા યથા ।
રાક્ષસીવૃન્દગા નૂનં રમ્ભેવાભાતિ ભામિની ॥ ૩૧॥

સત્યં વદ મહાભાગ કસ્યેયં વલ્લભાબલા ।
રાજપત્નીવ ચાભાતિ નૈષા મુનિવધૂર્દ્વિજ ॥ ૩૨॥

ધૌમ્ય ઉવાચ ।
પાણ્ડવાનાં પ્રિયા ભાર્યા દ્રૌપદી શુભલક્ષણા ।
પાઞ્ચાલી સિન્ધુરાજેન્દ્ર વસત્યત્ર વરાશ્રમે ॥ ૩૩॥

જયદ્રથ ઉવાચ ।
ક્વ ગતાઃ પાણ્ડવાઃ પઞ્ચ શૂરાઃ સમ્પ્રતિ વિશ્રુતાઃ ।
વસન્ત્યત્ર વને વીરા વીતશોકા મહાબલાઃ ॥ ૩૪॥

ધૌમ્ય ઉવાચ ।
મૃગયાર્થં ગતાઃ પઞ્ચ પાણ્ડવા રથસંસ્થિતાઃ ।
આગમિષ્યન્તિ મધ્યાન્હે મૃગાનાદાય પાર્થિવાઃ ॥ ૩૫॥

તચ્છ્રુત્વા વચનં તસ્ય ઉદતિષ્ઠદસૌ નૃપઃ ।
દ્રૌપદીસન્નિધૌ ગત્વા પ્રગમ્યેદમુવાચ હ ॥ ૩૬॥

કુશલં તે વરારોહે ક્વ ગતાઃ પતયશ્ચ તે ।
એકાદશ ગતાન્યદ્ય વર્ષાણિ ચ વને કિલ ॥ ૩૭॥

દ્રૌપદી તુ તદોવાચ સ્વસ્તિ તેઽસ્તુ નૃપાત્મજ ।
વિશ્રમસ્વાશ્રમાભ્યાશે ક્ષણાદાયાન્તિ પાણ્ડવાઃ ॥ ૩૮॥

એવં બ્રુવન્ત્યાં તસ્યાં તુ લોભાવિષ્ટઃ સ ભૂપતિઃ ।
જહાર દ્રૌપદીં વીરોઽનાદૃત્ય મુનિસત્તમાન્ ॥ ૩૯॥

કસ્યચિન્નૈવ વિશ્વાસઃ કર્તવ્યઃ સર્વથા બુધૈઃ ।
કુર્વન્દુઃખમવાપ્નોતિ દૃષ્ટાન્તસ્ત્વત્ર વૈ બલિઃ ॥ ૪૦॥

વૈરોચનસુતઃ શ્રીમાન્ધર્મિષ્ઠઃ સત્યસઙ્ગરઃ ।
યજ્ઞકર્તા ચ દાતા ચ શરણ્યઃ સાધુસમ્મતઃ ॥ ૪૧॥

નાધર્મે નિરતઃ ક્વાપિ પ્રલ્હાદસ્ય ચ પૌત્રકઃ ।
એકોનશતયજ્ઞાન્વૈ સ ચકાર સદક્ષિણાન્ ॥ ૪૨॥

સત્ત્વમૂર્ત્તિઃ સદા વિષ્ણુઃ સેવ્યઃ સ યોગિનામપિ ।
નિર્વિકારોઽપિ ભગવાન્દેવકાર્યાર્થસિદ્ધયે ॥ ૪૩॥

કશ્યપાચ્ચ સમુદ્ભૂતો વિષ્ણુઃ કપટવામનઃ ।
રાજ્યં છલેન હૃતવાન્મહીં ચૈવ સસાગરામ્ ॥ ૪૪॥

સોઽભવત્સત્યવાગ્રાજા બલિર્વૈરોચનિસ્તદા ।
કપટં કૃતવાન્વિષ્ણુરિન્દ્રાર્થે તુ મયા શ્રુતમ્ ॥ ૪૫॥

અન્યઃ કિં ન કરોત્યેવં કૃતં વૈ સત્ત્વમૂર્તિના ।
વામનં રૂપમાસ્થાય યજ્ઞપાતં ચિકીર્ષતા ॥ ૪૬॥

ન ચ વિશ્વસિતવ્યં વૈ કદાચિત્કેનચિત્તથા ।
લોભશ્ચેતસિ ચેત્સ્વામિન્કીદૃક્પાપકૃતં ભયમ્ ॥ ૪૭॥

લોભાહતાઃ પ્રકુર્વન્તિ પાપાનિ પ્રાણિનઃ કિલ ।
પરલોકાદ્ભયં નાસ્તિ કસ્યચિત્કર્હિચિન્મુને ॥ ૪૮॥

મનસા કર્મણા વાચા પરસ્વાદાનહેતુતઃ ।
પ્રપતન્તિ નરાઃ સમ્યગ્લોભોપહતચેતસઃ ॥ ૪૯॥

દેવાનારાધ્ય સતતં વાઞ્છન્તિ ચ ધનં નરાઃ ।
ન દેવાસ્તત્કરે કૃત્વા સમર્થા દાતુમઞ્જસા ॥ ૫૦॥

અન્યસ્યાનીયતે વિત્તં પ્રયચ્છન્તિ મનીષિતમ્ ।
વાણિજ્યેનાથ દાનેન ચૌર્યેણાપિ બલેન વા ॥ ૫૧॥

વિક્રયાર્થં ગૃહીત્વા ચ ધાન્યવસ્ત્રાદિકં બહુ ।
દેવાનર્ચયતે વૈશ્યો મહર્દ્ધિર્મે ભવેદિતિ ॥ ૫૨॥

નાત્ર કિં પરવિત્તેચ્છા વાણિજ્યેન પરન્તપ ।
ગ્રહણકાલે તુ સમ્પ્રાપ્તે મહર્ઘ્યઞ્ચાપિ કાઙ્ક્ષતિ ॥ ૫૩॥

એવં હિ પ્રાણિનઃ સર્વે પરસ્વાદાનતત્પરાઃ ।
વર્તન્તે સતતં બ્રહ્મન્ વિશ્વાસઃ કીદૃશઃ પુનઃ ॥ ૫૪॥

વૃથા તીર્થં વૃથા દાનં વૃથાઽધ્યયનમેવ ચ ।
લોભમોહાવૃતાનાં વૈ કૃતં તદકૃતં ભવેત્ ॥ ૫૫॥

તસ્માદેનં મહાભાગ વિસર્જય ગૃહં પ્રતિ ।
સપુત્રાઽહં વસિષ્યામિ જાનકીવદ્દ્વિજોત્તમ ॥ ૫૬॥

ઇત્યુક્તોઽસૌ મુનિસ્તાવદ્ગત્વા યુધાજિતં નૃપમ્ ।
ઉવાચ વચનં રાજ્ઞે ભારદ્વાજઃ પ્રતાપવાન્ ॥ ૫૭॥

ગચ્છ રાજન્ યથાકામં સ્વપુરં નૃપસત્તમ ।
નેયં મનોરમાભ્યેતિ બાલપુત્રા સુદુઃખિતા ॥ ૫૮॥

યુધાજિદુવાચ ।
મુને મુઞ્ચ હઠં સૌમ્ય વિસર્જય મનોરમામ્ ।
ન ચ યાસ્યામ્યહં મુક્ત્વા નેષ્યામ્યદ્ય બલાત્પુનઃ ॥ ૫૯॥

ઋષિરુવાચ ।
નયસ્વ યદિ શક્તિસ્તે બલેનાદ્ય મમાશ્રમાત્ ।
વિશ્વામિત્રો યથા ધેનું વસિષ્ઠસ્ય મુનેઃ પુરા ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
યુધાજિદ્ભારદ્વાજયોઃ સંવાદવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૩.૧૬॥

## ૩.૧૭ સપ્તદશોઽધ્યાયઃ । વિશ્વામિત્રકથોત્તરં રાજપુત્રસ્ય કામબીજપ્રાપ્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય મુનેસ્તત્રાવનીપતિઃ ।
મન્ત્રિવૃદ્ધં સમાહૂય પપ્રચ્છ તમતન્દ્રિતઃ ॥ ૧॥

કિં કર્તવ્યં સુબુદ્ધેઽત્ર મયાઽદ્ય વદ સુવ્રત ।
બલાન્નયામિ તાં કામં સપુત્રાઞ્ચ સુભાષિણીમ્ ॥ ૨॥

રિપુરલ્પોઽપિ નોપેક્ષ્યઃ સર્વથા શુભમિચ્છતા ।
રાજયક્ષ્મેવ સંવૃદ્ધો મૃત્યવે પરિકલ્પયેત્ ॥ ૩॥

નાત્ર સૈન્યં ન યોદ્ધાસ્તિ યો મામત્ર નિવારયેત્ ।
ગૃહીત્વા હન્મિ તં તત્ર દૌહિત્રસ્ય રિપું કિલ ॥ ૪॥

નિષ્કણ્ટકં ભવેદ્રાજ્યં યતામ્યદ્ય બલાદહમ્ ।
હતે સુદર્શને નૂનં નિર્ભયોઽસૌ ભવેદિતિ ॥ ૫॥

પ્રધાન ઉવાચ ।
સાહસં ન હિ કર્તવ્યં શ્રુતં રાજન્ મુનેર્વચઃ ।
વિશ્વામિત્રસ્ય દૃષ્ટાન્તઃ કથિતસ્તેન મારિષ ॥ ૬॥

પુરા ગાધિસુતઃ શ્રીમાન્વિશ્વામિત્રોઽતિવિશ્રુતઃ ।
વિચરન્સ નૃપશ્રેષ્ઠો વસિષ્ઠાશ્રમમભ્યગાત્ ॥ ૭॥

નમસ્કૃત્ય ચ તં રાજા વિશ્વામિત્રઃ પ્રતાપવાન્ ।
ઉપવિષ્ટો નૃપશ્રેષ્ઠો મુનિના દત્તવિષ્ટરઃ ॥ ૮॥

નિમન્ત્રિતો વસિષ્ઠેન ભોજનાય મહાત્મના ।
સસૈન્યશ્ચ સ્થિતો રાજા ગાધિપુત્રો મહાયશાઃ ॥ ૯॥

નન્દિન્યાઽઽસાદિતં સર્વં ભક્ષ્યભોજ્યાદિકં ચ યત્ ।
ભુક્ત્વા રાજા સસૈન્યશ્ચ વાઞ્છિતં તત્ર ભોજનમ્ ॥ ૧૦॥

પ્રતાપં તઞ્ચ નન્દિન્યાઃ પરિજ્ઞાય સ પાર્થિવઃ ।
યયાચે નન્દિનીં રાજા વસિષ્ઠં મુનિસત્તમમ્ ॥ ૧૧॥

વિશ્વામિત્ર ઉવાચ ।
મુને ધેનુસહસ્રં તે ઘટોધ્નીનાં દદામ્યહમ્ ।
નન્દિનીં દેહિ મે ધેનું પ્રાર્થયામિ પરન્તપ ॥ ૧૨॥

વસિષ્ઠ ઉવાચ ।
હોમધેનુરિયં રાજન્ન દદામિ કથઞ્ચન ।
સહસ્રઞ્ચાપિ ધેનૂનાં તવેદં તવ તિષ્ઠતુ ॥ ૧૩॥

વિશ્વામિત્ર ઉવાચ ।
અયુતં વાથ લક્ષ્યં વા દદામિ મનસેપ્સિતમ્ ।
દેહિ મે નન્દિનીં સાધો ગ્રહીષ્યામિ બલાદથ ॥ ૧૪॥

વસિષ્ઠ ઉવાચ ।
કામં ગૃહાણ નૃપતે બલાદદ્ય યથારુચિ ।

નાહં દદામિ તે રાજન્સ્વેચ્છયા નન્દિનીં ગૃહાત્ ॥ ૧૫॥

તચ્છ્રુત્વા નૃપતિર્ભૃત્યાનાદિદેશ મહાબલાન્ ।
નયધ્વં નન્દિનીં ધેનું બલદર્પસુસંસ્થિતાઃ ॥ ૧૬॥

તે ભૃત્યા જગૃહુસ્તાં તુ હઠાદાક્રમ્ય યન્ત્રિતામ્ ।
વેપમાના મુનિં પ્રાહ સુરભિઃ સાશ્રુલોચના ॥ ૧૭॥

મુને ત્યજસિ માં કસ્માત્કર્ષયન્તિ સુયન્ત્રિતામ્ ।
મુનિસ્તાં પ્રત્યુવાચેદં ત્યજે નાહં સુદુગ્ધદે ॥ ૧૮॥

બલાન્નયતિ રાજાઽસૌ પૂજિતોઽદ્ય મયા શુભે ।
કિં કરોમિ ન ચેચ્છામિ ત્યક્તું ત્વાં મનસા કિલ ॥ ૧૯॥

ઇત્યુક્તા મુનિના ધેનુઃ ક્રોધયુક્તા બભૂવ હ ।
હમ્ભારવં ચકારાશુ ક્રૂરશબ્દં સુદારુણમ્ ॥ ૨૦॥

ઉદ્ભતાસ્તત્ર દેહાત્તુ દૈત્યા ઘોરતરાસ્તદા ।
સાયુધાસ્તિષ્ઠ તિષ્ઠેતિ બ્રુવન્તઃ કવચાવૃતાઃ ॥ ૨૧॥

સૈન્યં સર્વં હતં તૈસ્તુ નન્દિની પ્રતિમોચિતા ।
એકાકી નિર્ગતો રાજા વિશ્વામિત્રોઽતિદુઃખિતઃ ॥ ૨૨॥

હન્ત પાપોઽતિદીનાત્મા નિન્દન્ ક્ષાત્રબલં મહત્ ।
બ્રાહ્મં બલં દુરારાધ્યં મત્વા તપસિ સંસ્થિતઃ ॥ ૨૩॥

તપ્ત્વા બહૂનિ વર્ષાણિ તપો ઘોરં મહાવને ।
ઋષિત્વં પ્રાપ ગાધેયસ્ત્યક્ત્વા ક્ષાત્રં વિધિં પુનઃ ॥ ૨૪॥

તસ્માત્ત્વમપિ રાજેન્દ્ર મા કૃથા વૈરમદ્ભુતમ્ ।
કુલનાશકરં નૂનં તાપસૈઃ સહ સંયુગમ્ ॥ ૨૫॥

મુનિવર્યં વ્રજાદ્ય ત્વં સમાશ્વાસ્ય તપોનિધિમ્ ।
સુદર્શનોઽપિ રાજેન્દ્ર તિષ્ઠત્વત્ર યથાસુખમ્ ॥ ૨૬॥

બાલોઽયં નિર્ધનઃ કિં તે કરિષ્યતિ નૃપાહિતમ્ ।
વૃથા તે વૈરભાવોઽયમનાથે દુર્બલે શિશૌ ॥ ૨૭॥

દયા સર્વત્ર કર્તવ્યા દૈવાધીનમિદં જગત્ ।
ઈર્ષ્યયા કિં નૃપશ્રેષ્ઠ યદ્ભાવ્યં તદ્ભવિષ્યતિ ॥ ૨૮॥

વજ્રં તૃણાયતે રાજન્ દૈવયોગાન્ન સંશયઃ ।
તૃણં વજ્રાયતે ક્વાપિ સમયે દૈવયોગતઃ ॥ ૨૯॥

શશકો હન્તિ શાર્દૂલં મશકો વૈ તથા ગજમ્ ।
સાહસં મુઞ્ચ મેધાવિન્ કુરુ મે વચનં હિતમ્ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય યુધાજિન્નૃપસત્તમઃ ।
પ્રણમ્ય તં મુનિં મૂર્ધ્ના જગામ સ્વપુરં નૃપઃ ॥ ૩૧॥

મનોરમાઽપિ સ્વસ્થાઽભૂદાશ્રમે તત્ર સંસ્થિતા ।
પાલયામાસ પુત્રં તં સુદર્શનમૃતવ્રતમ્ ॥ ૩૨॥

દિને દિને કુમારોઽસૌ જગામોપચયં તતઃ ।
મુનિબાલગતઃ ક્રીડન્નિર્ભયઃ સર્વતઃ શુભઃ ॥ ૩૩॥

એકસ્મિન્સમયે તત્ર વિદલ્લં સમુપાગતમ્ ।
ક્લીબેતિ મુનિપુત્રસ્તમામન્ત્રયત્તદન્તિકે ॥ ૩૪॥

સુદર્શનસ્તુ તચ્છ્રુત્વા દધારૈકાક્ષરં સ્ફુટમ્ ।
અનુસ્વારયુતં તચ્ચ પ્રોવાચાપિ પુનઃ પુનઃ ॥ ૩૫॥

બીજં વૈ કામરાજાખ્યં ગૃહીતં મનસા તદા ।
જજાપ બાલકોઽત્યર્થં ધૃત્વા ચેતસિ સાદરમ્ ॥ ૩૬॥

ભાવિયોગાન્મહારાજ કામરાજાખ્યમદ્ભુતમ્ ।
સ્વભાવેનૈવ તેનેત્થં ગૃહીતં બાલકેન વૈ ॥ ૩૭॥

તદાઽસૌ પઞ્ચમે વર્ષે પ્રાપ્ય મન્ત્રમનુત્તમમ્ ।
ઋષિચ્છન્દોવિહીનઞ્ચ ધ્યાનન્યાસવિવર્જિતમ્ ॥ ૩૮॥

પ્રજપન્મનસા નિત્યં ક્રીડત્યપિ સ્વપિત્યપિ ।
વિસસ્માર ન તં મન્ત્રં જ્ઞાત્વા સારમિતિ સ્વયમ્ ॥ ૩૯॥

વર્ષે ચૈકાદશે પ્રાપ્તે કુમારોઽસૌ નૃપાત્મજઃ ।
મુનિના ચોપનીતોઽથ વેદમધ્યાપિતસ્તથા ॥ ૪૦॥

ધનુર્વેદં તથા સાઙ્ગં નીતિશાસ્ત્રં વિધાનતઃ ।
અભ્યસ્તાઃ સકલા વિદ્યાસ્તેન મન્ત્રબલાદિના ॥ ૪૧॥

કદાચિત્સોઽપિ પ્રત્યક્ષં દેવીરૂપં દદર્શ હ ।

રક્તામ્બરં રક્તવર્ણં રક્તસર્વાઙ્ગભૂષણમ્ ॥ ૪૨॥

ગરુડે વાહને સંસ્થાં વૈષ્ણવીં શક્તિમદ્ભુતામ્ ।
દૃષ્ટ્વા પ્રસન્નવદનઃ સ બભૂવ નૃપાત્મજઃ ॥ ૪૩॥

વને તસ્મિંસ્થિતઃ સોઽથ સર્વવિદ્યાર્થતત્ત્વવિત્ ।
માતરં સેવમાનસ્તુ વિજહાર નદીતટે ॥ ૪૪॥

શરાસનઞ્ચ સમ્પ્રાપ્તં વિશિખાશ્ચ શિલાશિતાઃ ।
તૂણીરકવચં તસ્મૈ દત્તં ચામ્બિકયા વને ॥ ૪૫॥

એતસ્મિન્સમયે પુત્રી કાશિરાજસ્ય સુપ્રિયા ।
નામ્ના શશિકલા દિવ્યા સર્વલક્ષણસંયુતા ॥ ૪૬॥

શુશ્રાવ નૃપપુત્રં તં વનસ્થઞ્ચ સુદર્શનમ્ ।
સર્વલક્ષણસમ્પન્નં શૂરં કામમિવાપરમ્ ॥ ૪૭॥

બન્દીજનમુખાચ્છ્રુત્વા રાજપુત્રં સુસઙ્ગતમ્ ।
ચકમે મનસા તં વૈ વરં વરયિતું ધિયા ॥ ૪૮॥

સ્વપ્ને તસ્યાઃ સમાગમ્ય જગદમ્બા નિશાન્તરે ।
ઉવાચ વચનં ચેદં સમાશ્વાસ્ય સુસંસ્થિતા ॥ ૪૯॥

વરં વરય સુશ્રોણિ મમ ભક્તઃ સુદર્શનઃ ।
સર્વકામપ્રદસ્તેઽસ્તુ વચનાન્મમ ભામિનિ ॥ ૫૦॥

એવં શશિકલા દૃષ્ટા સ્વપ્ને રૂપં મનોહરમ્ ।
અમ્બાયા વચનં સ્મૃત્વા જહર્ષ ભૃશભામિની ॥ ૫૧॥

ઉત્થિતા સા મુદા યુક્તા પૃષ્ટા માત્રા પુનઃ પુનઃ ।
પ્રમોદે કારણં બાલા નોવાચાતિત્રપાન્વિતા ॥ ૫૨॥

જહાસ મુદમાપન્ના સ્મૃત્વા સ્વપ્નં મુહુર્મુહુઃ ।
સખીં પ્રાહ તદાન્યાં વૈ સ્વપ્નવૃત્તં સવિસ્તરમ્ ॥ ૫૩॥

કદાચિત્સા વિહારાર્થમવાપોપવનં શુભમ્ ।
સખીયુક્તા વિશાલાક્ષી ચમ્પકૈરુપશોભિતમ્ ॥ ૫૪॥

પુષ્પાણિ ચિન્વતી બાલા ચમ્પકાધઃસ્થિતાબલા ।
અપશ્યદ્બ્રાહ્મણં માર્ગે આગચ્છન્તં ત્વરાન્વિતમ્ ॥ ૫૫॥

તં પ્રણમ્ય દ્વિજં શ્યામા બભાષે મધુરં વચઃ ।
કુતો દેશાન્મહાભાગ કૃતમાગમનં ત્વયા ॥ ૫૬॥

દ્વિજ ઉવાચ ।
ભારદ્વાજાશ્રમાદ્બાલે નૂનમાગમનં મમ ।
જાતં વૈ કાર્યયોગેન કિં પૃચ્છસિ વદસ્વ મે ॥ ૫૭॥

શશિકલોવાચ ।
તત્રાશ્રમે મહાભાગ વર્ણનીયં કિમસ્તિ વૈ ।
લોકાતિગં વિશેષેણ પ્રેક્ષણીયતમં કિલ ॥ ૫૮॥

બ્રાહ્મણ ઉવાચ ।
ધ્રુવસન્ધિસુતઃ શ્રીમાનાસ્તે સુદર્શનો નૃપઃ ।
યથાર્થનામા સુશ્રોણિ વર્તતે પુરુષોત્તમઃ ॥ ૫૯॥

તસ્ય લોચનમત્યન્તં નિષ્ફલં પ્રતિભાતિ મે ।
યેન દૃષ્ટો ન વામોરુ કુમારસ્તુ સુદર્શનઃ ॥ ૬૦॥

એકત્ર નિહિતા ધાત્રા ગુણાઃ સર્વે સિસૃક્ષુણા ।
ગુણાનામાકરં દ્રષ્ટું મન્યે તેનૈવ કૌતુકાત્ ॥ ૬૧॥

તવ યોગ્યઃ કુમારોઽસૌ ભર્તા ભવિતુમર્હતિ ।
યોગોઽયં વિહિતોઽપ્યાસીન્મણિકાઞ્ચનયોરિવ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
વિશ્વામિત્રકથોત્તરં રાજપુત્રસ્ય કામબીજપ્રાપ્તિવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૩.૧૭॥

## ૩.૧૮ અષ્ટાદશોઽધ્યાયઃ । શશિકલયા માતરં પ્રતિ સન્દેશપ્રેષણમ્ ।

વ્યાસ ઉવાચ ।
શ્રુત્વા તદ્વચનં શ્યામા પ્રેમયુક્તા બભૂવ હ ।
પ્રતસ્થે બ્રાહ્મણસ્તસ્માત્સ્થાનાદુક્ત્વા સમાહિતઃ ॥ ૧॥

સા તુ પૂર્વાનુરાગાદ્વૈ મગ્ના પ્રેમ્ણાઽતિચઞ્ચલા ।
કામબાણહતેવાસ ગતે તસ્મિન્દ્વિજોત્તમે ॥ ૨॥

અથ કામાર્દિતા પ્રાહ સખીં છન્દોઽનુવર્તિનીમ્ ।
વિકારશ્ચ સમુત્પન્નો દેહે યચ્છ્રવણાદનુ ॥ ૩॥

અજ્ઞાતરસવિજ્ઞાનં કુમારં કુલસમ્ભવમ્ ।
દુનોતિ મદનઃ પાપઃ કિં કરોમિ ક્વ યામિ ચ ॥ ૪॥

સ્વપ્નેષુ વા મયા દૃષ્ટઃ પઞ્ચબાણ ઇવાપરઃ ।
તપતે મે મનોઽત્યર્થં વિરહાકુલિતં મૃદુ ॥ ૫॥

ચન્દનં દેહલગ્નં મે વિષવદ્ભાતિ ભામિનિ ।
સ્રગિયં સર્પવચ્ચૈવ ચન્દ્રપાદાશ્ચ વહ્નિવત્ ॥ ૬॥

ન ચ હર્મ્યે વને શં મે દીર્ઘિકાયાં ન પર્વતે ।
ન દિવા ન નિશાયાં વા ન સુખં સુખસાધનૈઃ ॥ ૭॥

ન શય્યા ન ચ તામ્બૂલં ન ગીતં ન ચ વાદનમ્ ।
પ્રીણયન્તિ મનો મેઽદ્ય ન તૃપ્તે મમ લોચને ॥ ૮॥

પ્રયામ્યદ્ય વને તત્ર યત્રાસૌ વર્તતે શઠઃ ।
ભીતાસ્મિ કુલલજ્જાયાઃ પરતન્ત્રા પિતુસ્તથા ॥ ૯॥

સ્વયંવરં પિતા મેઽદ્ય ન કરોતિ કરોમિ કિમ્ ।
દાસ્યામિ રાજપુત્રાય કામં સુદર્શનાય વૈ ॥ ૧૦॥

સન્ત્યન્યે પૃથિવીપાલાઃ શતશઃ સમ્ભૃતર્દ્ધયઃ ।
રમણીયા ન મે તેઽદ્ય રાજ્યહીનોઽપ્યસૌ મતઃ ॥ ૧૧॥

વ્યાસ ઉવાચ ।
એકાકી નિર્ધનશ્ચૈવ બલહીનઃ સુદર્શનઃ ।
વનવાસી ફલાહારસ્તસ્યાશ્ચિત્તે સુસંસ્થિતા ॥ ૧૨॥

વાગ્બીજસ્ય જપાત્સિદ્ધિસ્તસ્યા એષાપ્યુપસ્થિતા ।
સોપિ ધ્યાનપરોઽત્યન્તં જજાપ મન્ત્રમુત્તમમ્ ॥ ૧૩॥

સ્વપ્ને પશ્યત્યસૌ દેવીં વિષ્ણુમાયામખણ્ડિતામ્ ।
વિશ્વમાતરમવ્યક્તાં સર્વસમ્પત્કરામ્બિકામ્ ॥ ૧૪॥

શ‍ૃઙ્ગવેરપુરાધ્યક્ષો નિષાદઃ સમુપેત્ય તમ્ ।
દદૌ રથવરં તસ્મૈ સર્વોપસ્કરસંયુતમ્ ॥ ૧૫॥

ચતુર્ભિસ્તુરગૈર્યુક્તં પતાકાવરમણ્ડિતમ્ ।
જૈત્રં રાજસુતં જ્ઞાત્વા દદૌ ચોપાયનં તદા ॥ ૧૬॥

સોઽપિ જગ્રાહ તં પ્રીત્યા મિત્રત્વેન સુસંસ્થિતમ્ ।

વન્યૈર્મૂલફલૈઃ સમ્યગર્ચયામાસ શમ્બરમ્ ॥ ૧૭॥

કૃતાતિથ્યે ગતે તસ્મિન્નિષાદાધિપતૌ તદા ।
મુનયઃ પ્રીતિયુક્તાસ્તે તમૂચુસ્તાપસા મિથઃ ॥ ૧૮॥

રાજપુત્ર ધ્રુવં રાજ્યં પ્રાપ્સ્યસિ ત્વં ચ સર્વથા ।
સ્વલ્પૈરહોભિરવ્યગ્રઃ પ્રતાપાન્નાત્ર સંશયઃ ॥ ૧૯॥

પ્રસન્ના તેઽમ્બિકા દેવી વરદા વિશ્વમોહિની ।
સહાયસ્તુ સુસમ્પન્નો ન ચિન્તાં કુરુ સુવ્રત ॥ ૨૦॥

મનોરમાં તથોચુસ્તે મુનયઃ સંશિતવ્રતાઃ ।
પુત્રસ્તેઽદ્ય ધરાધીશો ભવિષ્યતિ શુચિસ્મિતે ॥ ૨૧॥

સા તાનુવાચ તન્વઙ્ગી વચનં વોઽસ્તુ સત્ફલમ્ ।
દાસોઽયં ભવતાં વિપ્રાઃ કિં ચિત્રં સદુપાસનાત્ ॥ ૨૨॥

ન સૈન્યં સચિવાઃ કોશો ન સહાયશ્ચ કશ્ચન ।
કેન યોગેન પુત્રો મે રાજ્યં પ્રાપ્નુમિહાર્હતિ ॥ ૨૩॥

આશીર્વાદૈશ્ચ વો નૂનં પુત્રોઽયં મે મહીપતિઃ ।
ભવિષ્યતિ ન સન્દેહો ભવન્તો મન્ત્રવિત્તમાઃ ॥ ૨૪॥

વ્યાસ ઉવાચ ।
રથારૂઢઃ સ મેધાવી યત્ર યાતિ સુદર્શનઃ ।
અક્ષૌહિણીસમાવૃત્ત ઇવાભાતિ સ તેજસા ॥ ૨૫॥

પ્રતાપો મન્ત્રબીજસ્ય નાન્યઃ કશ્ચન ભૂપતે ।
એવં વૈ જપતસ્તસ્ય પ્રીતિયુક્તસ્ય સર્વથા ॥ ૨૬॥

સમ્પ્રાપ્ય સદ્ગુરોર્બીજં કામરાજાખ્યમદ્ભુતમ્ ।
જપેદ્યસ્તુ શુચિઃ શાન્તઃ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૭॥

ન તદસ્તિ પૃથિવ્યાં વા દિવિ વાપિ સુદુર્લભમ્ ।
પ્રસન્નાયાઃ શિવાયાશ્ચ યદપ્રાપ્યં નૃપોત્તમ ॥ ૨૮॥

તે મન્દાસ્તેઽતિદુર્ભાગ્યા રોગૈસ્તે સમભિદ્રુતાઃ ।
યેષાં ચિત્તે ન વિશ્વાસો ભવેદમ્બાર્ચનાદિષુ ॥ ૨૯॥

યા માતા સર્વદેવાનાં યુગાદૌ પરિકીર્તિતા ।
આદિમાતેતિ વિખ્યાતા નામ્ના તેન કુરૂદ્વહ ॥ ૩૦॥

બુદ્ધિઃ કીર્તિર્ધૃતિર્લક્ષ્મીઃ શક્તિઃ શ્રદ્ધા મતિઃ સ્મૃતિઃ ।
સર્વેષાં પ્રાણિનાં સા વૈ પ્રત્યક્ષં વૈ વિભાસતે ॥ ૩૧॥

ન જાનન્તિ નરા યે વૈ મોહિતા માયયા કિલ ।
ન ભજન્તિ કુતર્કજ્ઞા દેવીં વિશ્વેશ્વરીં શિવામ્ ॥ ૩૨॥

બ્રહ્મા વિષ્ણુસ્તથા શમ્ભુર્વાસવો વરુણો યમઃ ।
વાયુરગ્નિઃ કુબેરશ્ચ ત્વષ્ટા પૂષાશ્વિનૌ ભગઃ ॥ ૩૩॥

આદિત્યા વસવો રુદ્રા વિશ્વેદેવા મરુદ્ગણાઃ ।
સર્વે ધ્યાયન્તિ તાં દેવીં સૃષ્ટિસ્થિત્યન્તકારિણીમ્ ॥ ૩૪॥

કો ન સેવેત વિદ્વાન્વૈ તાં શક્તિં પરમાત્મિકામ્ ।
સુદર્શનેન સા જ્ઞાતા દેવી સર્વાર્થદા શિવા ॥ ૩૫॥

બ્રહ્મૈવ સાઽતિદુષ્પ્રાપ્યા વિદ્યાવિદ્યાસ્વરૂપિણી ।
યોગગમ્યા પરા શક્તિર્મુમુક્ષૂણાં ચ વલ્લભા ॥ ૩૬॥

પરમાત્મસ્વરૂપં કો વેત્તુમર્હતિ તાં વિના ।
યા સૃષ્ટિં ત્રિવિધાં કૃત્વા દર્શયત્યખિલાત્મને ॥ ૩૭॥

સુદર્શનસ્તુ તાં દેવીં મનસા પરિચિન્તયન્ ।
રાજ્યલાભાત્પરં પ્રાપ્ય સુખં વૈ કાનને સ્થિતઃ ॥ ૩૮॥

સાપિ ચન્દ્રકલાત્યર્થં કામબાણપ્રપીડિતા ।
નાનોપચારૈરનિશં દધાર દુઃખિતં વપુઃ ॥ ૩૯॥

તાવત્તસ્યાઃ પિતા જ્ઞાત્વા કન્યાં પુત્રવરાર્થિનીમ્ ।
સુબાહુઃ કારયામાસ સ્વયંવરમતન્દ્રિતઃ ॥ ૪૦॥

સ્વયંવરસ્તુ ત્રિવિધો વિદ્વદ્ભિઃ પરિકીર્તિતઃ ।
રાજ્ઞાં વિવાહયોગ્યૌ વૈ નાન્યેષાં કથિતઃ કિલ ॥ ૪૧॥

ઇચ્છાસ્વયંવરશ્ચૈકો દ્વિતીયશ્ચ પણાભિધઃ ।
યથા રામેણ ભગ્નં વૈ ત્ર્યમ્બકસ્ય શરાસનમ્ ॥ ૪૨॥

તૃતીયઃ શૌર્યશુલ્કશ્ચ શૂરાણાં પરિકીર્તિતઃ ।
ઇચ્છાસ્વયંવરં તત્ર ચકાર નૃપસત્તમઃ ॥ ૪૩॥

શિલ્પિભિઃ કારિતા મઞ્ચાઃ શુભૈરાસ્તરણૈર્યુતાઃ ।

તતશ્ચ વિવિધાકારાઃ સુક્લૃપ્તાઃ સભ્યમણ્ડપાઃ ॥ ૪૪॥

એવં કૃતેઽતિસમ્ભારે વિવાહાર્થં સુવિસ્તરે ।
સખીં શશિકલા પ્રાહ દુઃખિતા ચારુલોચના ॥ ૪૫॥

ઇદં મે માતરં બ્રૂહિ ત્વમેકાન્તે વચો મમ ।
મયા વૃતઃ પતિશ્ચિત્તે ધ્રુવસન્ધિસુતઃ શુભઃ ॥ ૪૬॥

નાન્યં વરં વરિષ્યામિ તમૃતે વૈ સુદર્શનમ્ ।
સ મે ભર્તા નૃપસુતો ભગવત્યા પ્રતિષ્ઠિતઃ ॥ ૪૭॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તા સા સખી ગત્વા માતરં પ્રાહ સત્વરા ।
વૈદર્ભીં વિજને વાક્યં મધુરં મઞ્જુભાષિણી ॥ ૪૮॥

પુત્રી તે દુઃખિતા પ્રાહ સાધ્વી ત્વાં મન્મુખેન યત્ ।
શ‍ૃણુ ત્વં કુરુ કલ્યાણિ તદ્ધિતં ત્વરિતાઽધુના ॥ ૪૯॥

ભારદ્વાજાશ્રમે પુણ્યે ધ્રુવસન્ધિસુતોઽસ્તિ યઃ ।
સ મે ભર્તા વૃતશ્ચિત્તે નાન્યં ભૂપં વૃણોમ્યહમ્ ॥ ૫૦॥

વ્યાસ ઉવાચ ।
રાજ્ઞી તદ્વચનં શ્રુત્વા સ્વપતૌ ગૃહમાગતે ।
નિવેદયામાસ તદા પુત્રીવાક્યં યથાતથમ્ ॥ ૫૧॥

તચ્છ્રુત્વા વચનં રાજા વિસ્મિતઃ પ્રહસન્મુહુઃ ।
ભાર્યામુવાચ વૈદર્ભીં સુબાહુસ્તુ ઋતં વચઃ ॥ ૫૨॥

સુભ્રુ જાનાસિ બાલોઽસૌ રાજ્યાન્નિષ્કાસિતો વને ।
એકાકી સહ માત્રા વૈ વસતે નિર્જને વને ॥ ૫૩॥

તત્કૃતે નિહતો રાજા વીરસેનો યુધાજિતા ।
સ કથં નિર્ધનો ભર્તા યોગ્યઃ સ્યાચ્ચારુલોચને ॥ ૫૪॥

બ્રૂહિ પુત્રીં તતો વાક્યં કદાચિદપિ વિપ્રિયમ્ ।
આગમિષ્યન્તિ રાજાનઃ સ્થિતિમન્તઃ સ્વયંવરે ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
શશિકલયા માતરં પ્રતિ સન્દેશપ્રેષણં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૩.૧૮॥

## ૩.૧૯ એકોનવિંશોઽધ્યાયઃ । રાજસંવાદવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ભર્ત્રા સાઽભિહિતા બાલાં પુત્રીં કૃત્વાઙ્કસંસ્થિતામ્ ।
ઉવાચ વચનં શ્લક્ષ્ણં સમાશ્વાસ્ય શુચિસ્મિતામ્ ॥ ૧॥

કિં વૃથા સુદતિ ત્વં હિ વિપ્રિયં મમ ભાષસે ।
પિતા તે દુઃખમાપ્નોતિ વાક્યેનાનેન સુવ્રતે ॥ ૨॥

સુદર્શનોઽતિદુર્ભાગ્યો રાજ્યભ્રષ્ટો નિરાશ્રયઃ ।
બલકોશવિહીનશ્ચ પરિત્યક્તસ્તુ બાન્ધવૈઃ ॥ ૩॥

માત્રા સહ વનં પ્રાપ્તઃ ફલમૂલાશનઃ કૃશઃ ।
ન તે યોગ્યો વરોઽયં વૈ વનવાસી ચ દુર્ભગઃ ॥ ૪॥

રાજપુત્રાઃ કૃતપ્રજ્ઞા રૂપવન્તઃ સુસમ્મતાઃ ।
તવાર્હાઃ પુત્રિ સન્ત્યન્યે રાજચિહ્નૈરલઙ્કૃતાઃ ॥ ૫॥

ભ્રાતાઽસ્ય વર્તતે કાન્તઃ સ રાજ્યં કોસલેષુ વૈ ।
કરોતિ રૂપસમ્પન્નઃ સર્વલક્ષણસંયુતઃ ॥ ૬॥

અન્યચ્ચ કારણં સુભ્રુ શ‍ૃણુ યચ્ચ યથા શ્રુતમ્ ।
યુધાજિત્સતતં તસ્ય વધકામોઽસ્તિ ભૂમિપઃ ॥ ૭॥

દૌહિત્રઃ સ્થાપિતસ્તેન રાજ્યે કૃત્વાઽતિસઙ્ગરમ્ ।
વીરસેનં નૃપં હત્વા સમ્મન્ત્ર્ય સચિવૈઃ સહ ॥ ૮॥

ભારદ્વાજાશ્રમં પ્રાપ્તં હન્તુકામઃ સુદર્શનમ્ ।
મુનિના વારિતઃ પશ્ચાજ્જગામ નિજમન્દિરમ્ ॥ ૯॥

શશિકલોવાચ ।
માતર્મમેપ્સિતઃ કામં વનસ્થોઽપિ નૃપાત્મજઃ ।
શર્યાતિવચનેનૈવ સુકન્યા ચ પતિવ્રતા ॥ ૧૦॥

ચ્યવનઞ્ચ યથા પ્રાપ્ય પતિશુશ્રૂષણે રતા ।
ભર્તૃશુશ્રૂષણં સ્ત્રીણાં સ્વર્ગદં મોક્ષદં તથા ॥ ૧૧॥

અકૈતવકૃતં નૂનં સુખદં ભવતિ સ્ત્રિયાઃ ।
ભગવત્યા સમાદિષ્ટં સ્વપ્ને વરમનુત્તમમ્ ॥ ૧૨॥

તમૃતેઽહં કથં ચાન્યં સંશ્રયામિ નૃપાત્મજમ્ ।

મચ્ચિત્તભિત્તૌ લિખિતો ભગવત્યા સુદર્શનઃ ॥ ૧૩॥

તં વિહાય પ્રિયં કાન્તં કરિષ્યેઽહં ન ચાપરમ્ ।
વ્યાસ ઉવાચ ।
પ્રત્યાદિષ્ટાઽથ વૈદર્ભી તયા બહુનિદર્શનૈઃ ॥ ૧૪॥

ભર્તારં સર્વમાચષ્ટ પુત્ર્યોક્તં વચનં ભૃશમ્ ।
વિવાહસ્ય દિનાદર્વાગાપ્તં શ્રુતસમન્વિતમ્ ॥ ૧૫॥

દ્વિજં શશિકલા તત્ર પ્રેષયામાસ સત્વરમ્ ।
યથા ન વેદ મે તાતસ્તથા ગચ્છ સુદર્શનમ્ ॥ ૧૬॥

ભારદ્વાજાશ્રમે બ્રૂહિ મદ્વાક્યાત્તરસા વિભો ।
પિત્રા મે સમ્ભૃતઃ કામં મદર્થેન સ્વયંવરઃ ॥ ૧૭॥

આગમિષ્યન્તિ રાજાનો બલયુક્તા હ્યનેકશઃ ।
મયા ત્વં વૈ વૃતશ્ચિત્તે સર્વથા પ્રીતિપૂર્વકમ્ ॥ ૧૮॥

ભગવત્યા સમાદિષ્ટઃ સ્વપ્ને મમ સુરોપમ ।
વિષમગ્નિ હુતાશે વા પ્રપતામિ પ્રદીપિતે ॥ ૧૯॥

વરયે ત્વદૃતે નાન્યં પિતૃભ્યાં પ્રેરિતાઽપિ વા ।
મનસા કર્મણા વાચા સંવૃતસ્ત્વં મયા વરઃ ॥ ૨૦॥

ભગવત્યાઃ પ્રસાદેન શર્માવાભ્યાં ભવિષ્યતિ ।
આગન્તવ્યં ત્વયાત્રૈવ દૈવં કૃત્વા પરં બલમ્ ॥ ૨૧॥

યદધીનં જગત્સર્વં વર્તતે સચરાચરમ્ ।
ભગવત્યા યદાદિષ્ટં ન તન્મિથ્યા ભવિષ્યતિ ॥ ૨૨॥

યદ્વશે દેવતાઃ સર્વા વર્તન્તે શઙ્કરાદયઃ ।
વક્તવ્યોઽસૌ ત્વયા બ્રહ્મન્નેકાન્તે વૈ નૃપાત્મજઃ ॥ ૨૩॥

યથા ભવતિ મે કાર્યં તત્કર્તવ્યં ત્વયાનઘ ।
ઇત્યુક્ત્વા દક્ષિણાં દત્ત્વા મુનિર્વ્યાપારિતસ્તયા ॥ ૨૪॥

ગત્વા સર્વં નિવેદ્યાશુ તત્ર પ્રત્યાગતો દ્વિજઃ ।
સુદર્શનસ્તુ તજ્જ્ઞાત્વા નિશ્ચયં ગમને તદા ॥ ૨૫॥

ચકાર મુનિના તેન પ્રેરિતઃ પરમાદરાત્ ।
વ્યાસ ઉવાચ ।

ગમનાયોદ્યતં પુત્રં તમુવાચ મનોરમા ॥ ૨૬॥

વેપમાનાઽતિદુઃખાર્તા જાતત્રાસાઽશ્રુલોચના ।
કુત્ર ગચ્છસિ પુત્રાદ્ય સમાજે ભૂભૃતાં કિલ ॥ ૨૭॥

એકાકી કૃતવૈરશ્ચ કિં વિચિન્ત્ય સ્વયંવરે ।
યુધાજિદ્ધન્તુકામસ્ત્વાં સમેષ્યતિ મહીપતિઃ ॥ ૨૮॥

ન તેઽન્યોઽસ્તિ સહાયશ્ચ તસ્માન્મા વ્રજ પુત્રક ।
એકપુત્રાતિદીનાસ્મિ તવાધારા નિરાશ્રયા ॥ ૨૯॥

નાર્હસિ ત્વં મહાભાગ નિરાશાં કર્તુમ્મદ્ય મામ્ ।
પિતા તે નિહતો યેન સોઽપિ તત્રાગતો નૃપઃ ॥ ૩૦॥

એકાકિનં ગતં તત્ર યુધાજિત્ત્વાં હનિષ્યતિ ।
સુદર્શન ઉવાચ ।
ભવિતવ્યં ભવત્યેવ નાત્ર કાર્યા વિચારણા ॥ ૩૧॥

આદેશાચ્ચ જગન્માતુર્ગચ્છામ્યદ્ય સ્વયંવરે ।
મા શોકં કુરુ કલ્યાણિ ક્ષત્રિયાઽસિ વરાનને ॥ ૩૨॥

ન બિભેમિ પ્રસાદેન ભગવત્યા નિરન્તરમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા રથમારુહ્ય ગન્તુકામં સુદર્શનમ્ ॥ ૩૩॥

દૃષ્ટ્વા મનોરમા પુત્રમાશીર્ભિશ્ચાન્વમોદયત્ ।
અગ્રતસ્તેઽમ્બિકા પાતુ પાર્વતી પાતુ પૃષ્ઠતઃ ॥ ૩૪॥

પાર્વતી પાર્શ્વયોઃ પાતુ શિવા સર્વત્ર સામ્પ્રતમ્ ।
વારાહી વિષમે માર્ગે દુર્ગા દુર્ગેષુ કર્હિચિત્ ।
કાલિકા કલહે ઘોરે પાતુ ત્વાં પરમેશ્વરી ॥ ૩૫॥

મણ્ડપે તત્ર માતઙ્ગી તથા સૌમ્યા સ્વયંવરે ।
ભવાની ભૂપમધ્યે તુ પાતુ ત્વાં ભવમોચની ॥ ૩૬॥

ગિરિજા ગિરિદુર્ગેષુ ચામુણ્ડા ચત્વરેષુ ચ ।
કામગા કાનનેષ્વેવં રક્ષતુ ત્વાં સનાતની ॥ ૩૭॥

વિવાદે વૈષ્ણવી શક્તિરવતાત્ત્વાં રઘૂદ્વહ ।
ભૈરવી ચરણે સૌમ્ય શત્રૂણાં વૈ સમાગમે ॥ ૩૮॥

સર્વદા સર્વદેશેષુ પાતુ ત્વાં ભુવનેશ્વરી ।
મહામાયા જગદ્ધાત્રી સચ્ચિદાનન્દરૂપિણી ॥ ૩૯॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા તં તદા માતા વેપમાના ભયાકુલા ।
ઉવાચાહં ત્વયા સાર્ધમાગમિષ્યામિ સર્વથા ॥ ૪૦॥

નિમિષાર્ધં વિના ત્વાં વૈ નાહં સ્થાતુમિહોત્સહે ।
સહૈવ નય માં વત્સ યત્ર તે ગમને મતિઃ ॥ ૪૧॥

ઇત્યુક્ત્વા નિઃસૃતા માતા ધાત્રેયીસંયુતા તદા ।
વિપ્રૈર્દત્તાશિષઃ સર્વે નિર્યયુર્હર્ષસંયુતાઃ ॥ ૪૨॥

વારાણસ્યાં તતઃ પ્રાપ્તો રથેનૈકેન રાઘવઃ ।
જ્ઞાતઃ સુબાહુના તત્ર પૂજિતશ્ચાર્હણાદિભિઃ ॥ ૪૩॥

નિવેશાર્થં ગૃહં દત્તમન્નપાનાદિકં તથા ।
સેવકં સમનુજ્ઞાપ્ય પરિચર્યાર્થમેવ ચ ॥ ૪૪॥

મિલિતાસ્ત્વથ રાજાનો નાનાદેશાધિપાઃ કિલ ।
યુધાજિદપિ સમ્પ્રાપ્તો દૌહિત્રેણ સમન્વિતઃ ॥ ૪૫॥

કરૂષાધિપતિશ્ચૈવ તથા મદ્રેશ્વરો નૃપઃ ।
સિન્ધુરાજસ્તથા વીરો યોદ્ધા માહિષ્મતીપતિઃ ॥ ૪૬॥

પાઞ્ચાલઃ પર્વતીયશ્ચ કામરૂપોઽતિવીર્યવાન્ ।
કાર્ણાટશ્ચોલદેશીયો વૈદર્ભશ્ચ મહાબલઃ ॥ ૪૭॥

અક્ષૌહિણી ત્રિષષ્ટિશ્ચ મિલિતા સઙ્ખ્યયા તદા ।
વેષ્ટિતા નગરી સા તુ સૈન્યૈઃ સર્વત્ર સંસ્થિતૈઃ ॥ ૪૮॥

એતે ચાન્યે ચ બહવઃ સ્વયંવરદિદૃક્ષયા ।
મિલિતાસ્તત્ર રાજાનો વરવારણસંયુતાઃ ॥ ૪૯॥

અન્યોન્યં નૃપપુત્રાસ્ત ઇત્યૂચુર્મિલિતાસ્તદા ।
સુદર્શનો નૃપસુતો હ્યાગતોઽસ્તિ નિરાકુલઃ ॥ ૫૦॥

એકાકી રથમારુહ્ય માત્રા સહ મહામતિઃ ।
વિવાહાર્થમિહાયાતઃ કાકુત્સ્થઃ કિં નુ સામ્પ્રતમ્ ॥ ૫૧॥

એતાન્ રાજસુતાંસ્ત્યક્ત્વા સસૈન્યાન્સાયુધાનથ ।

કિમેનં રાજપુત્રી સા વરિષ્યતિ મહાભુજમ્ ॥ ૫૨॥

યુધાજિદથ રાજેશસ્તાનુવાચ મહીપતીન્ ।
અહમેનં હનિષ્યામિ કન્યાર્થે નાત્ર સંશયઃ ॥ ૫૩॥

કેરલાધિપતિઃ પ્રાહ તં તદા નીતિસત્તમઃ ।
નાત્ર યુદ્ધં પ્રકર્તવ્યં રાજન્નિચ્છાસ્વયંવરે ॥ ૫૪॥

બલેન હરણં નાસ્તિ નાત્ર શુલ્કસ્વયંવરઃ ।
કન્યેચ્છયાઽત્ર વરણં વિવાદઃ કીદૃશસ્ત્વિહ ॥ ૫૫॥

અન્યાયેન ત્વયા પૂર્વમસૌ રાજ્યાત્પ્રવાસિતઃ ।
દૌહિત્રાયાર્પિતં રાજ્યં બલવન્નૃપસત્તમ ॥ ૫૬॥

કાકુત્સ્થોઽયં મહાભાગ કોસલાધિપતેઃ સુતઃ ।
કથમેનં રાજપુત્રં હનિષ્યસિ નિરાગસમ્ ॥ ૫૭॥

લપ્સ્યસે તત્ફલં નૂનમનયસ્ય નૃપોત્તમ ।
શાસ્તાસ્તિ કશ્ચિદાયુષ્મઞ્જગતોઽસ્ય જગત્પતિઃ ॥ ૫૮॥

ધર્મો જયતિ નાધર્મઃ સત્યં જયતિ નાનૃતમ્ ।
માનયં કુરુ રાજેન્દ્ર ત્યજ પાપમતિં કિલ ॥ ૫૯॥

દૌહિત્રસ્તવ સમ્પ્રાપ્તઃ સોઽપિ રૂપસમન્વિતઃ ।
રાજ્યયુક્તસ્તથા શ્રીમાન્કથં તં ન વરિષ્યતિ ॥ ૬૦॥

અન્યે રાજસુતાઃ કામં વર્તન્તે બલવત્તરાઃ ।
કન્યાસ્વયંવરે કન્યા સ્વીકરિષ્યતિ સામ્પ્રતમ્ ॥ ૬૧॥

વૃતે તથા વિવાદઃ કઃ પ્રવદન્તુ મહીભુજઃ ।
પરસ્પરં વિરોધોઽત્ર ન કર્તવ્યો વિજાનતા ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે રાજસંવાદવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૩.૧૯॥

## ૩.૨૦ વિંશોઽધ્યાયઃ । સ્વપિતરં પ્રતિ શશિકલાવાક્યમ્ ।

વ્યાસ ઉવાચ ।
ઇતિવાદિનિ ભૂપાલે કેરલાધિપતૌ તદા ।
પ્રત્યુવાચ મહાભાગ યુધાજિદપિ પાર્થિવઃ ॥ ૧॥

નીતિરેષા મહીપાલ યદ્બ્રવીતિ ભવાનિહ ।
સમાજે પાર્થિવાનાં વૈ સત્યવાગ્વિજિતેન્દ્રિયઃ ॥ ૨॥

યોગ્યેષુ વર્તમાનેષુ કન્યારત્નં કુલોદ્વહ ।
અયોગ્યોઽર્હતિ ભૂપાલ ન્યાયોઽયં તવ રોચતે ॥ ૩॥

ભાગં સિંહસ્ય ગોમાયુર્ભોક્તુમર્હતિ વા કથમ્ ।
તથા સુદર્શનોઽયં વૈ કન્યારત્નં કિમર્હતિ ॥ ૪॥

બલં વેદો હિ વિપ્રાણાં ભૂભુજાં ચાપજં બલમ્ ।
કિમન્યાય્યં મહારાજ બ્રવીમ્યહમિહાધુના ॥ ૫॥

બલં શુલ્કં યથા રાજ્ઞાં વિવાહે પરિકીર્તિતમ્ ।
બલવાનેવ ગૃહ્ણાતુ નાબલસ્તુ કદાચન ॥ ૬॥

તસ્માત્કન્યાપણં કૃત્વા નીતિરત્ર વિધીયતામ્ ।
અન્યથા કલહઃ કામં ભવિષ્યતિ મહીભુજામ્ ॥ ૭॥

એવં વિવાદે સંવૃત્તે રાજ્ઞાં તત્ર પરસ્પરમ્ ।
આહૂતસ્તુ સભામધ્યે સુબાહુર્નૃપસત્તમઃ ॥ ૮॥

સમાહૂય નૃપાઃ સર્વે તમૂચુસ્તત્ત્વદર્શિનઃ ।
રાજન્નીતિસ્ત્વયા કાર્યા વિવાહેઽત્ર સમાહિતા ॥ ૯॥

કિં તે ચિકીર્ષિતં રાજંસ્તદ્વદસ્વ સમાહિતઃ ।
પુત્ર્યાઃ પ્રદાનં કસ્મૈ તે રોચતે નૃપ ચેતસિ ॥ ૧૦॥

સુબાહુરુવાચ ।
પુત્ર્યા મે મનસા કામં વૃતઃ કિલ સુદર્શનઃ ।
મયા નિવારિતોઽત્યર્થં ન સા પ્રત્યેતિ મે વચઃ ॥ ૧૧॥

કિં કરોમિ સુતાયા મે ન વશે વર્તતે મનઃ ।
સુદર્શનસ્તથૈકાકી સમ્પ્રાપ્તોઽસ્તિ નિરાકુલઃ ॥ ૧૨॥

વ્યાસ ઉવાચ ।
સમ્પન્ના ભૂભુજઃ સર્વે સમાહૂય સુદર્શનમ્ ।
ઊચુઃ સમાગતં શાન્તમેકાકિનમતન્દ્રિતાઃ ॥ ૧૩॥

રાજપુત્ર મહાભાગ કેનાહૂતોઽસિ સુવ્રત ।

એકાકી યઃ સમાયાતઃ સમાજે ભૂભૃતામિહ ॥ ૧૪॥

ન વૈ સૈન્યં ન સચિવા ન કોશો ન બૃહદ્બલમ્ ।
કિમર્થઞ્ચ સમાયાતસ્તત્ત્વં બ્રૂહિ મહામતે ॥ ૧૫॥

યુદ્ધકામા નૃપતયો વર્તન્તેઽત્ર સમાગમે ।
કન્યાર્થં સૈન્યસમ્પન્નાઃ કિં ત્વં કર્તુમિહેચ્છસિ ॥ ૧૬॥

ભ્રાતા તે સુબલઃ શૂરઃ સમ્પ્રાપ્તોઽસ્તિ જિઘૃક્ષયા ।
યુધાજિચ્ચ મહાબાહુઃ સાહાય્યં કર્તુમાગતઃ ॥ ૧૭॥

ગચ્છ વા તિષ્ઠ રાજેન્દ્ર યાથાતથ્યમુદાહૃતમ્ ।
ત્વયિ સૈન્યવિહીને ચ યથેષ્ટં કુરુ સુવ્રત ॥ ૧૮॥

સુદર્શન ઉવાચ ।
ન બલં ન સહાયો મે ન કોશો દુર્ગસંશ્રયઃ ।
ન મિત્રાણિ ન સૌહાર્દી ન નૃપા રક્ષકા મમ ॥ ૧૯॥

અત્ર સ્વયંવરં શ્રુત્વા દ્રષ્ટુકામ ઇહાગતઃ ।
સ્વપ્ને દેવ્યા પ્રેરિતોઽસ્મિ ભગવત્યા ન સંશયઃ ॥ ૨૦॥

નાન્યચ્ચિકીર્ષિતં મેઽદ્ય મામાહ જગદીશ્વરી ।
તયા યદ્વિહિતં તચ્ચ ભવિતાઽદ્ય ન સંશયઃ ॥ ૨૧॥

ન શત્રુરસ્તિ સંસારે કોઽપ્યત્ર જગતીશ્વરાઃ ।
સર્વત્ર પશ્યતો મેઽદ્ય ભવાનીં જગદમ્બિકામ્ ॥ ૨૨॥

યઃ કરિષ્યતિ શત્રુત્વં મયા સહ નૃપાત્મજાઃ ।
શાસ્તા તસ્ય મહાવિદ્યા નાહં જાનામિ શત્રુતામ્ ॥ ૨૩॥

યદ્ભાવિ તદ્ભૈ ભવિતા નાન્યથા નૃપસત્તમાઃ ।
કા ચિન્તા હ્યત્ર કર્તવ્યા દૈવાધીનોઽસ્મિ સર્વથા ॥ ૨૪॥

દેવભૂતમનુષ્યેષુ સર્વભૂતેષુ સર્વદા ।
સર્વેષાં તત્કૃતા ભક્તિર્નાન્યથા નૃપસત્તમાઃ ॥ ૨૫॥

સા યં ચિકીર્ષતે ભૂપં તં કરોતિ નૃપાધિપાઃ ।
નિર્ધનં વા નરં કામં કા ચિન્તા વૈ તદા મમ ॥ ૨૬॥

તામૃતે પરમાં શક્તિં બ્રહ્મવિષ્ણુહરાદયઃ ।
ન શક્તાઃ સ્પન્દિતું દેવાઃ કા ચિન્તા મે તદા નૃપાઃ ॥ ૨૭॥

અશક્તો વા સશક્તો વા યાદૃશસ્તાદૃશસ્ત્વહમ્ ।
તદાજ્ઞયા નૃપાદ્યૈવ સમ્પ્રાપ્તોઽસ્મિ સ્વયંવરે ॥ ૨૮॥

સા યદિચ્છતિ તત્કુર્યાન્મમ કિં ચિન્તનેન વૈ ।
નાત્ર શઙ્કા પ્રકર્તવ્યા સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૨૯॥

જયે પરાજયે લજ્જા ન મેઽત્રાણ્વપિ પાર્થિવાઃ ।
ભગવત્યાસ્તુ લજ્જાસ્તિ તદધીનોઽસ્મિ સર્વથા ॥ ૩૦॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય તદાકર્ણ્ય વચનં રાજસત્તમાઃ ।
ઊચુઃ પરસ્પરં પ્રેક્ષ્ય નિશ્ચયજ્ઞા નરાધિપાઃ ॥ ૩૧॥

સત્યમુક્તં ત્વયા સાધો ન મિથ્યા કર્હિચિદ્ભવેત્ ।
તથાપ્યુજ્જયનીનાથસ્ત્વાં હન્તું પરિકાઙ્ક્ષતિ ॥ ૩૨॥

ત્વત્કૃતે ન દયાદિષ્ટા ત્વાં બ્રવીમો મહામતે ।
યદ્યુક્તં તત્ત્વયા કાર્યં વિચાર્ય મનસાઽનઘ ॥ ૩૩॥

સુદર્શન ઉવાચ ।
સત્યમુક્તં ભવદ્ભિશ્ચ કૃપાવદ્ભિઃ સુહૃજ્જનૈઃ ।
કિં બ્રવીમિ પુનર્વાક્યમુક્ત્વા નૃપતિસત્તમાઃ ॥ ૩૪॥

ન મૃત્યુઃ કેનચિદ્ભાવ્યઃ કસ્યચિદ્વા કદાચન ।
દૈવાધીનમિદં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૩૫॥

સ્વવશોઽયં ન જીવોઽસ્તિ સ્વકર્મવશગઃ સદા ।
તત્કર્મ ત્રિવિધં પ્રોક્તં વિદ્વદ્ભિસ્તત્ત્વદર્શિભિઃ ॥ ૩૬॥

સઞ્ચિતં વર્તમાનઞ્ચ પ્રારબ્ધઞ્ચ તૃતીયકમ્ ।
કાલકર્મસ્વભાવૈશ્ચ તતં સર્વમિદં જગત્ ॥ ૩૭॥

ન દેવો માનુષં હન્તું શક્તઃ કાલાગમં વિના ।
હતં નિમિત્તમાત્રેણ હન્તિ કાલઃ સનાતનઃ ॥ ૩૮॥

યથા પિતા મે નિહતઃ સિંહેનામિત્રકર્ષણઃ ।
તથા માતામહોઽપ્યેવં યુદ્ધે યુધાજિતા હતઃ ॥ ૩૯॥

યત્નકોટિં પ્રકુર્વાણો હન્યતે દૈવયોગતઃ ।

જીવેદ્વર્ષસહસ્રાણિ રક્ષણેન વિના નરઃ ॥ ૪૦॥

નાહં બિભેમિ ધર્મિષ્ઠાઃ કદાચિચ્ચ યુધાજિતઃ ।
દૈવમેવ પરં મત્વા સુસ્થિતોઽસ્મિ સદા નૃપાઃ ॥ ૪૧॥

સ્મરણં સતતં નિત્યં ભગવત્યાઃ કરોમ્યહમ્ ।
વિશ્વસ્ય જનની દેવી કલ્યાણં સા કરિષ્યતિ ॥ ૪૨॥

પૂર્વાર્જિતં હિ ભોક્તવ્યં શુભં વાપ્યશુભં તથા ।
સ્વકૃતસ્ય ચ ભોગેન કીદૃક્શોકો વિજાનતામ્ ॥ ૪૩॥

સ્વકર્મફલયોગેન પ્રાપ્ય દુઃખમચેતનઃ ।
નિમિત્તકારણે વૈરં કરોત્યલ્પમતિઃ કિલ ॥ ૪૪॥

ન તથાઽહં વિજાનામિ વૈરં શોકં ભયં તથા ।
નિઃશઙ્કમિહ સમ્પ્રાપ્તઃ સમાજે ભૂભૃતામિહ ॥ ૪૫॥

એકાકી દ્રષ્ટુકામોઽહં સ્વયંવરમનુત્તમમ્ ।
ભવિષ્યતિ ચ યદ્ભાવ્યં પ્રાપ્તોઽસ્મિ ચણ્ડિકાજ્ઞયા ॥ ૪૬॥

ભગવત્યાઃ પ્રમાણં મે નાન્યં જાનામિ સંયતઃ ।
તત્કૃતઞ્ચ સુખં દુઃખં ભવિષ્યતિ ચ નાન્યથા ॥ ૪૭॥

યુધાજિત્સુખમાપ્નોતુ ન મે વૈરં નૃપોત્તમાઃ ।
યઃ કરિષ્યતિ મે વૈરં સ પ્રાપ્સ્યતિ ફલં તથા ॥ ૪૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તાસ્તે તથા તેન સન્તુષ્ટા ભૂભુજઃ સ્થિતાઃ ।
સોઽપિ સ્વમાશ્રમં પ્રાપ્ય સુસ્થિતઃ સમ્બભૂવ હ ॥ ૪૯॥

અપરેઽહ્નિ શુભે કાલે નૃપાઃ સમ્મન્ત્રિતાઃ કિલ ।
સુબાહુના નૃપેણાથ રુચિરે વૈ સ્વમણ્ડપે ॥ ૫૦॥

દિવ્યાસ્તરણયુક્તેષુ મઞ્ચેષુ રચિતેષુ ચ ।
ઉપવિષ્ટાશ્ચ રાજાનઃ શુભાલઙ્કરણૈર્યુતાઃ ॥ ૫૧॥

દિવ્યવેષધરાઃ કામં વિમાનેષ્વમરા ઇવ ।
દીપ્યમાનાઃ સ્થિતાસ્તત્ર સ્વયંવરદિદૃક્ષયા ॥ ૫૨॥

ઇતિ ચિન્તાપરાઃ સર્વે કદા સાપ્યાગમિષ્યતિ ।
ભાગ્યવન્તં નૃપશ્રેષ્ઠં શ્રુતપુણ્યં વરિષ્યતિ ॥ ૫૩॥

યદા સુદર્શનં દૈવાત્સ્રજા સમ્ભૂષયેદિહ ।
વિવાદો વૈ નૃપાણાં ચ ભવિતા નાત્ર સંશયઃ ॥ ૫૪॥

ઇત્યેવં ચિન્ત્યમાનાસ્તે ભૂપા મઞ્ચેષુ સંસ્થિતાઃ ।
વાદિત્રઘોષઃ સુમહાનુત્થિતો નૃપમણ્ડપે ॥ ૫૫॥

અથ કાશીપતિઃ પ્રાહ સુતાં સ્નાતાં સ્વલઙ્કૃતામ્ ।
મધૂકમાલાસંયુક્તાં ક્ષૌમવાસોવિભૂષિતામ્ ॥ ૫૬॥

વિવાહોપસ્કરૈર્યુક્તાં દિવ્યાં સિન્ધુસુતોપમામ્ ।
ચિન્તાપરાં સુવસનાં સ્મિતપૂર્વમિદં વચઃ ॥ ૫૭॥

ઉત્તિષ્ઠ પુત્રિ સુનસે કરે ધૃત્વા શુભાં સ્રજમ્ ।
વ્રજ મણ્ડપમધ્યેઽદ્ય સમાજં પશ્ય ભૂભુજામ્ ॥ ૫૮॥

ગુણવાન્ રૂપસમ્પન્નઃ કુલીનશ્ચ નૃપોત્તમઃ ।
તવ ચિત્તે વસેદ્યસ્તુ તં વૃણુષ્વ સુમધ્યમે ॥ ૫૯॥

દેશદેશાધિપાઃ સર્વે મઞ્ચેષુ રચિતેષુ ચ ।
સંવિષ્ટાઃ પશ્ય તન્વઙ્ગિ વરયસ્વ યથારુચિ ॥ ૬૦॥

વ્યાસ ઉવાચ ।
તં તથા ભાષમાણં વૈ પિતરં મિતભાષિણી ।
ઉવાચ વચનં બાલા લલિતં ધર્મસંયુતમ્ ॥ ૬૧॥

શશિકલોવાચ ।
નાહં દૃષ્ટિપથે રાજ્ઞાં ગમિષ્યામિ પિતઃ કિલ ।
કામુકાનાં નરેશાનાં ગચ્છન્ત્યન્યાશ્ચ યોષિતઃ ॥ ૬૨॥

ધર્મશાસ્ત્રે શ્રુતં તાત મયેદં વચનં કિલ ।
એક એવ વરો નાર્યા નિરીક્ષ્યઃ સ્યાન્ન ચાપરઃ ॥ ૬૩॥

સતીત્વં નિર્ગતં તસ્યા યા પ્રયાતિ બહૂનથ ।
સઙ્કલ્પયન્તિ તે સર્વે દૃષ્ટ્વા મે ભવતાત્ત્વિતિ ॥ ૬૪॥

સ્વયંવરે સ્રજં ધૃત્વા યદાગચ્છતિ મણ્ડપે ।
સામાન્યા સા તદા જાતા કુલટેવાપરા વધૂઃ ॥ ૬૫॥

વારસ્ત્રી વિપણે ગત્વા યથા વીક્ષ્ય નરાંસ્થિતાન્ ।

ગુણાગુણપરિજ્ઞાનં કરોતિ નિજમાનસે ॥ ૬૬॥

નૈકભાવા યથા વેશ્યા વૃથા પશ્યતિ કામુકમ્ ।
તથાઽહં મણ્ડપે ગત્વા કુર્વે વારસ્ત્રિયા કૃતમ્ ॥ ૬૭॥

વૃદ્ધૈરેતૈઃ કૃતં ધર્મં ન કરિષ્યામિ સામ્પ્રતમ્ ।
પત્નીવ્રતં તથા કામં ચરિષ્યેઽહં ધૃતવ્રતા ॥ ૬૮॥

સામાન્યા પ્રથમં ગત્વા કૃત્વા સઙ્કલ્પિતં બહુ ।
વૃણોતિ ચૈકં તદ્વદ્વૈ વૃણોમિ કથમદ્ય વૈ ॥ ૬૯॥

સુદર્શનો મયા પૂર્વં વૃતઃ સર્વાત્મના પિતઃ ।
તમૃતે નાન્યથા કર્તુમિચ્છામિ નૃપસત્તમ ॥ ૭૦॥

વિવાહવિધિના દેહિ કન્યાદાનં શુભે દિને ।
સુદર્શનાય નૃપતે યદીચ્છસિ શુભં મમ ॥ ૭૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
સ્વપિતરં પ્રતિ શશિકલાવાક્યં નામવિંશોઽધ્યાયઃ ॥ ૩.૨૦॥

## ૩.૨૧ એકવિંશોઽધ્યાયઃ । કન્યયા સ્વપિતરં પ્રતિ સુદર્શનેન સહ વિવાહાર્થકથનમ્ ।

વ્યાસ ઉવાચ ।
સુબાહુરપિ તચ્છ્રુત્વા યુક્તમુક્તં તયા તદા ।
ચિન્તાવિષ્ટો બભૂવાશુ કિં કર્તવ્યમતઃ પરમ્ ॥ ૧॥

સઙ્ગતાઃ પૃથિવીપાલાઃ સસૈન્યાઃ સપરિગ્રહાઃ ।
ઉપવિષ્ટાશ્ચ મઞ્ચેષુ યોદ્ધુકામા મહાબલાઃ ॥ ૨॥

યદિ બ્રવીમિ તાન્સર્વાન્સુતા નાયાતિ સામ્પ્રતમ્ ।
તથાપિ કોપસંયુક્તા હન્યુર્મા દુષ્ટબુદ્ધયઃ ॥ ૩॥

ન મે સૈન્યબલં તાદૃઙ્ન દુર્ગબલમદ્ભુતમ્ ।
યેનાહં નૃપતીન્સર્વાન્ પ્રત્યાદેષ્ટુમિહોત્સહે ॥ ૪॥

સુદર્શનસ્તથૈકાકી હ્યસહાયોઽધનઃ શિશુઃ ।
કિં કર્તવ્યં નિમગ્નોઽહં સર્વથા દુઃખસાગરે ॥ ૫॥

ઇતિ ચિન્તાપરો રાજા જગામ નૃપસન્નિધૌ ।
પ્રણમ્ય તાનુવાચાથ પ્રશ્રયાવનતો નૃપઃ ॥ ૬॥

કિં કર્તવ્યં નૃપાઃ કામં નૈતિ મે મણ્ડપે સુતા ।
બહુશઃ પ્રેર્યમાણાઽપિ સા માત્રાઽપિ મયાઽપિ ચ ॥ ૭॥

મૂર્ધ્ના પતામિ પાદેષુ રાજ્ઞાં દાસોઽસ્મિ સામ્પ્રતમ્ ।
પૂજાદિકં ગૃહીત્વાઽદ્ય વ્રજન્તુ સદનાનિ વઃ ॥ ૮॥

દદામિ બહુરત્નાનિ વસ્ત્રાણિ ચ ગજાન્ રથાન્ ।
ગૃહીત્વાઽદ્ય કૃપાં કૃત્વા વ્રજન્તુ ભવનાન્યુત ॥ ૯॥

ન વશે મે સુતા બાલા મ્રિયતે યદિ ખેદિતા ।
તદા મે સ્યાન્મહદ્દુઃખં તેન ચિન્તાતુરોઽસ્મ્યહમ્ ॥ ૧૦॥

ભવન્તઃ કરુણાવન્તો મહાભાગ્યા મહૌજસઃ ।
કિં મે તયા દુહિત્રા તુ મન્દયા દુર્વિનીતયા ॥ ૧૧॥

અનુગ્રાહ્યોઽસ્મિ વઃ કામં દાસોઽહમિતિ સર્વથા ।
સુતા સુતેવ મન્તવ્યા ભવદ્ભિઃ સર્વથા મમ ॥ ૧૨॥

વ્યાસ ઉવાચ ।
શ્રુત્વા સુબાહુવચનં નોચુઃ કેચન ભૂમિપાઃ ।
યુધાજિત્ક્રોધતામ્રાક્ષસ્તમુવાચ રુષાન્વિતઃ ॥ ૧૩॥

રાજન્મૂર્ખોઽસિ કિં બ્રૂષે કૃત્વા કાર્યં સુનિન્દિતમ્ ।
સ્વયંવરઃ કથં મોહાદ્રચિતઃ સંશયે સતિ ॥ ૧૪॥

મિલિતા ભૂભુજઃ સર્વે ત્વયાહૂતાઃ સ્વયંવરે ।
કથમદ્ય નૃપા ગન્તું યોગ્યાસ્તે સ્વગૃહાન્પ્રતિ ॥ ૧૫॥

અવમાન્ય નૃપાન્સર્વાંસ્ત્વં કિં સુદર્શનાય વૈ ।
દાતુમિચ્છસિ પુત્રીઞ્ચ કિમનાર્યમતઃ પરમ્ ॥ ૧૬॥

વિચાર્ય પુરુષેણાદૌ કાર્યં વૈ શુભમિચ્છતા ।
આરબ્ધવ્યં ત્વયા તત્તુ કૃતં રાજન્નજાનતા ॥ ૧૭॥

એતાન્વિહાય નૃપતીન્બલવાહનસંયુતાન્ ।
વરં સુદર્શનં કર્તું કથમિચ્છસિ સામ્પ્રતમ્ ॥ ૧૮॥

અહં ત્વાં હન્મિ પાપિષ્ઠં તથા પશ્ચાત્સુદર્શનમ્ ।
દૌહિત્રાયાદ્ય તે કન્યાં દાસ્યામીતિ વિનિશ્ચયઃ ॥ ૧૯॥

મયિ તિષ્ઠતિ કોઽન્યોસ્તિ યઃ કન્યાં હર્તુમિચ્છતિ ।
સુદર્શનઃ કિયાનદ્ય નિર્ધનો નિર્બલઃ શિશુઃ ॥ ૨૦॥

ભારદ્વાજાશ્રમે પૂર્વં મુક્તો મુનિકૃતે મયા ।
નાદ્યાહં મોચયિષ્યામિ સર્વથા જીવિતં શિશોઃ ॥ ૨૧॥

તસ્માદ્વિચાર્ય સમ્યક્ત્વં પુત્ર્યા ચ ભાર્યયા સહ ।
દૌહિત્રાય પ્રિયાં કન્યાં દેહિ મે સુભ્રુવં કિલ ॥ ૨૨॥

સમ્બન્ધી ભવ દત્ત્વા ત્વં પુત્રીમેતાં મનોરમામ્ ।
ઉચ્ચાશ્રયઃ પ્રકર્તવ્યઃ સર્વદા શુભમિચ્છતા ॥ ૨૩॥

સુદર્શનાય દત્ત્વા ત્વં પુત્રીં પ્રાણપ્રિયાં શુભામ્ ।
એકાકિનેઽપ્યરાજ્યાય કિં સુખં પ્રાપ્તુમિચ્છસિ ॥ ૨૪॥

(કુલં વિત્તં બલં રૂપં રાજ્યં દુર્ગં સુહૃજ્જનમ્ ।
દૃષ્ટ્વા કન્યા પ્રદાતવ્યા નાન્યથા સુખમૃચ્છતિ)॥

પરિચિન્તય ધર્મં ત્વં રાજનીતિઞ્ચ શાશ્વતીમ્ ।
કુરુ કાર્યં યથાયોગ્યં મા કૃથા મતિમન્યથા ॥ ૨૫॥

સુહૃદસિ મમાત્યર્થં હિતં તે પ્રબ્રવીમ્યહમ્ ।
સમાનય સુતાં રાજન્ મણ્ડપે તાં સખીવૃતામ્ ॥ ૨૬॥

સુદર્શનમૃતે ચેયં વરિષ્યતિ યદાઽપ્યસૌ ।
વિગ્રહો મે તદા ન સ્યાદ્વિવાહોઽસ્તુ તવેપ્સિતઃ ॥ ૨૭॥

અન્યે નૃપતયઃ સર્વે કુલીનાઃ સબલાઃ સમાઃ ।
વિરોધઃ કીદૃશસ્ત્વેનં વૃણોદ્યદિ નૃપોત્તમ ॥ ૨૮॥

અન્યથાઽહં હરિષ્યેઽદ્ય બલાત્કન્યામિમાં શુભામ્ ।
મા વિરોધં સુદુઃસાધ્યં ગચ્છ પાર્થિવસત્તમ ॥ ૨૯॥

વ્યાસ ઉવાચ ।
યુધાજિતા સમાદિષ્ટઃ સુબાહુઃ શોકસંયુતઃ ।
નિઃશ્વસન્ભવનં ગત્વા ભાર્યાં પ્રાહ શુચાવૃતઃ ॥ ૩૦॥

પુત્રીં બ્રૂહિ સુધર્મજ્ઞે કલહે સમુપસ્થિતે ।
કિં કર્ત્તવ્યં મયા શક્યં ત્વદ્વશોઽસ્મિ સુલોચને ॥ ૩૧॥

વ્યાસ ઉવાચ ।

સા શ્રુત્વા પતિવાક્યં તુ ગત્વા પ્રાહ સુતાન્તિકમ્ ।
વત્સે રાજાતિદુઃખાર્તઃ પિતા તેઽદ્યાપિ વર્તતે ॥ ૩૨॥

ત્વદર્થે વિગ્રહઃ કામં સમુત્પન્નોઽદ્ય ભૂભૃતામ્ ।
અન્યં વરય સુશ્રોણિ સુદર્શનમૃતે નૃપમ્ ॥ ૩૩॥

યદિ સુદર્શનં વત્સે હઠાત્ત્વં વૈ વરિષ્યસિ ।
યુધાજિત્ત્વાં ચ માં ચૈવ હનિષ્યતિ બલાન્વિતઃ ॥ ૩૪॥

સુદર્શનં ચ રાજાઽસૌ બલમત્તઃ પ્રતાપવાન્ ।
દ્વિતીયસ્તે પતિઃ પશ્ચાદ્ભવિતા કલહે સતિ ॥ ૩૫॥

તસ્માત્સુદર્શનં ત્યક્ત્વા વરયાન્યં નૃપોત્તમમ્ ।
સુખમિચ્છસિ ચેન્મહ્યં તુભ્યં વા મૃગલોચને ।
ઇતિ માત્રા બોધિતાં તાં પશ્ચાદ્રાજાપ્યબોધયત્ ॥ ૩૬॥

ઉભયોર્વચનં શ્રુત્વા નિર્ભયોવાચ કન્યકા
કન્યોવાચ ।
સત્યમુક્તં નૃપશ્રેષ્ઠ જાનાસિ ચ વ્રતં મમ ॥ ૩૭॥

નાન્યં વૃણોમિ ભૂપાલ સુદર્શનમૃતે ક્વચિત્ ।
બિભેષિ યદિ રાજેન્દ્ર નૃપેભ્યઃ કિલ કાતરઃ ॥ ૩૮॥

સુદર્શનાય દત્ત્વા માં વિસર્જય પુરાદ્બહિઃ ।
સ માં રથે સામારોપ્ય નિર્ગમિષ્યતિ તે પુરાત્ ॥ ૩૯॥

ભવિતવ્યં તુ પશ્ચાદ્વૈ ભવિષ્યતિ ન ચાન્યથા ।
નાત્ર ચિન્તા ત્વયા કાર્યા ભવિતવ્યે નૃપોત્તમ ॥ ૪૦॥

યદ્ભાવિ તદ્ભવત્યેવ સર્વથાત્ર ન સંશયઃ ।
રાજોવાચ ।
ન પુત્રિ સાહસં કાર્યં મતિમદ્ભિઃ કદાચન ॥ ૪૧॥

બહુભિર્ન વિરોદ્ધવ્યમિતિ વેદવિદો વિદુઃ ।
વિસ્રક્ષ્યામિ કથં કન્યાં દત્ત્વા રાજસુતાય ચ ॥ ૪૨॥

રાજાનો વરસંયુક્તાઃ કિં ન કુર્યુરસામ્પ્રતમ્ ।
યદિ તે રોચતે વત્સે પણં સંવિદધામ્યહમ્ ॥ ૪૩॥

જનકેન યથા પૂર્વં કૃતઃ સીતાસ્વયંવરે ।

શૈવં ધનુર્યથા તેન ધૃતં કૃત્વા પણં તથા ॥ ૪૪॥

તથાહમપિ તન્વઙ્ગિ કરોમ્યદ્ય દુરાસદમ્ ।
વિવાદો યેન રાજ્ઞાં વૈ કૃતે સતિ શમં વ્રજેત્ ॥ ૪૫॥

પાલયિષ્યતિ યઃ કામં સ તે ભર્તા ભવિષ્યતિ ।
સુદર્શનસ્તથાઽન્યો વા યઃ કશ્ચિદ્બલવત્તરઃ ॥ ૪૬॥

પાલયિત્વા પણં ત્વાં વૈ વરયિષ્યતિ સર્વથા ।
એવં કૃતે નૃપાણાં તુ વિવાદઃ શમિતો ભવેત્ ॥ ૪૭॥

સુખેનાહં વિવાહં તે કરિષ્યામિ તતઃ પરમ્ ।
કન્યોવાચ ।
સન્દેહે નૈવ મજ્જામિ મૂર્ખકૃત્યમિદં યતઃ ॥ ૪૮॥

મયા સુદર્શનઃ પૂર્વં ધૃતશ્ચેતસિ નાન્યથા ।
કારણં પુણ્યપાપાનાં મન એવ મહીપતે ॥ ૪૯॥

મનસા વિધૃતં ત્યક્ત્વા કથમન્યં વૃણે પિતઃ ।
કૃતે પણે મહારાજ સર્વેષાં વશગા હ્યહમ્ ॥ ૫૦॥

એકઃ પાલયિતા દ્વૌ વા બહવો વા ભવન્તિ ચેત્ ।
કિં કર્તવ્યં તદા તાત વિવાદે સમુપસ્થિતે ॥ ૫૧॥

સંશયાધિષ્ઠિતે કાર્યે મતિં નાહં કરોમ્યતઃ ।
મા ચિન્તાં કુરુ રાજેન્દ્ર દેહિ સુદર્શનાય મામ્ ॥ ૫૨॥

વિવાહં વિધિના કૃત્વા શં વિધાસ્યતિ ચણ્ડિકા ।
યન્નામકીર્તનાદેવ દુઃખૌઘો વિલયં વ્રજેત્ ॥ ૫૩॥

તાં સ્મૃત્વા પરમાં શક્તિં કુરુ કાર્યમતન્દ્રિતઃ ।
ગત્વા વદ નૃપેભ્યસ્ત્વં કૃતાઞ્જલિપુટોઽદ્ય વૈ ॥ ૫૪॥

આગન્તવ્યઞ્ચ શ્વઃ સર્વૈરિહ ભૂપૈઃ સ્વયંવરે ।
ઇત્યુક્ત્વા ત્વં વિસૃજ્યાશુ સર્વં નૃપતિમણ્ડલમ્ ॥ ૫૫॥

વિવાહં કુરુ રાત્રૌ મે વેદોક્તવિધિના નૃપ ।
પારિબર્હં યથાયોગ્યં દત્ત્વા તસ્મૈ વિસર્જય ॥ ૫૬॥

ગમિષ્યતિ ગૃહીત્વા માં ધ્રુવસન્ધિસુતઃ કિલ ।
કદાચિત્તે નૃપાઃ ક્રુદ્ધાઃ સઙ્ગ્રામં કર્તુમુદ્યતાઃ ॥ ૫૭॥

ભવિષ્યતિ તદા દેવી સાહાય્યં નઃ કરિષ્યતિ ।
સોઽપિ રાજસુતસ્તૈસ્તુ સઙ્ગ્રામં સંવિધાસ્યતિ ॥ ૫૮॥

દૈવાન્મૃધે મૃતે તસ્મિન્મરિષ્યામ્યહમપ્યુત ।
સ્વસ્તિ તેસ્તુ ગૃહે તિષ્ઠ દત્ત્વા માં સહસૈન્યકઃ ॥ ૫૯॥

એકૈવાહં ગમિષ્યામિ તેન સાર્ધં રિરંસયા ।
વ્યાસ ઉવાચ ।
ઇતિ તસ્યા વચઃ શ્રુત્વા રાજાઽસૌ કૃતનિશ્ચયઃ ।
મતિં ચક્રે તથા કર્તું વિશ્વાસં પ્રતિપદ્ય ચ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
કન્યયા સ્વપિતરં પ્રતિ સુદર્શનેન સહ વિવાહાર્થકથનં નામૈકવિંશોઽધ્યાયઃ ॥ ૩.૨૧॥

## ૩.૨૨ દ્વાવિંશોઽધ્યાયઃ । સુદર્શનશશિકલયોર્વિવાહવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
શ્રુત્વા સુતાવાક્યમનિન્દિતાત્મા
નૃપાંશ્ચ ગત્વા નૃપતિર્જગાદ ।
વ્રજન્તુ કામં શિવિરાણિ ભૂપાઃ
શ્વો વા વિવાહં કિલ સંવિધાસ્યે ॥ ૧॥

ભક્ષ્યાણિ પેયાનિ મયાઽર્પિતાનિ
ગૃહ્ણન્તુ સર્વે મયિ સુપ્રસન્નાઃ ।
શ્વો ભાવિ કાર્યં કિલ મણ્ડપેઽત્ર
સમેત્ય સર્વૈરિહ સંવિધેયમ્ ॥ ૨॥

નાયાતિ પુત્રી કિલ મણ્ડપેઽદ્ય
કરોમિ કિં ભૂપતયોઽત્ર કામમ્ ।
પ્રાતઃ સમાશ્વાસ્ય સુતાં નયિષ્યે
ગચ્છન્તુ તસ્માચ્છિવિરાણિ ભૂપાઃ ॥ ૩॥

ન વિગ્રહો બુદ્ધિમતાં નિજાશ્રિતે
કૃપા વિધેયા સતતં હ્યપત્યે ।
વિધાય તાં પ્રાતારિહાનયિષ્યે

સુતાં તુ ગચ્છન્તુ નૃપા યથેષ્ટમ્ ॥ ૪॥

ઇચ્છાપણં વા પરિચિન્ત્ય ચિત્તે
પ્રાતઃ કરિષ્યામ્યથ સંવિવાહમ્ ।
સર્વૈઃ સમેત્યાત્ર નૃપૈઃ સમેતૈઃ
સ્વયંવરઃ સર્વમતેન કાર્યઃ ॥ ૫॥

શ્રુત્વા નૃપાસ્તેઽવિતથં વિદિત્વા
વચો યયુઃ સ્વાનિ નિકેતનાનિ ।
વિધાય પાર્શ્વે નગરસ્ય રક્ષાં
ચક્રુઃ ક્રિયા મધ્યદિનોદિતાશ્ચ ॥ ૬॥

સુબાહુરપ્યાર્યજનૈઃ સમેત-
શ્ચકાર કાર્યાણિ વિવાહકાલે ।
પુત્રીં સમાહૂય ગૃહે સુગુપ્તે
પુરોહિતૈર્વેદવિદાં વરિષ્ઠૈઃ ॥ ૭॥

સ્નાનાદિકં કર્મ વરસ્ય કૃત્વા
વિવાહભૂષાકરણં તથૈવ ।
આનાય્ય વેદીરચિતે ગૃહે વૈ
તસ્યાર્હણાં ભૂમિપતિશ્ચકાર ॥ ૮॥

સવિષ્ટરં ચાચમનીયમર્ઘ્યં
વસ્ત્રદ્વયં ગામથ કુણ્ડલે દ્વે ।
સમર્પ્ય તસ્મૈ વિધિવન્નરેન્દ્ર
ઐચ્છત્સુતાદાનમહીનસત્ત્વઃ ॥ ૯॥

સોઽપ્યગ્રહીત્સર્વમદીનચેતાઃ
શશામ ચિન્તાઽથ મનોરમાયાઃ ।
કન્યાં સુકેશીં નિધિકન્યકાસમાં
મેને તદાઽઽત્માનમનુત્તમઞ્ચ ॥ ૧૦॥

સુપૂજિતં ભૂષણવસ્ત્રદાનૈ-
ર્વરોત્તમં તં સચિવાસ્તદાનીમ્ ।
નિન્યુશ્ચ તે કૌતુકમણ્ડપાન્ત-
ર્મુદાન્વિતા વીતભયાશ્ચ સર્વે ॥ ૧૧॥

સમાપ્તભૂષાં વિધિવદ્વિધિજ્ઞાઃ
સ્ત્રિયશ્ચ તાં રાજસુતાં સુયાને ।
આરોપ્ય નિન્યુર્વરસન્નિધાનણ્
ચતુષ્કયુક્તે કિલ મણ્ડપે વૈ ॥ ૧૨॥

અગ્નિં સમાધાય પુરોહિતઃ સ
હુત્વા યથાવચ્ચ તદન્તરાલે ।
આહ્વાયયત્તૌ કૃતકૌતુકૌ તુ
વધૂવરૌ પ્રેમયુતૌ નિકામમ્ ॥ ૧૩॥

લાજાવિસર્ગં વિધિવદ્વિધાય
કૃત્વા હુતાશસ્ય પ્રદક્ષિણાઞ્ચ ।
તૌ ચક્રતુસ્તત્ર યથોચિત્તં તત્
સર્વં વિધાનં કુલગોત્રજાતમ્ ॥ ૧૪॥

શતદ્વયં ચાશ્વયુજાં રથાનાં
સુભૂષિતં ચાપિ શરૌઘસંયુતમ્ ।
દદૌ નૃપેન્દ્રસ્તુ સુદર્શનાય
સુપૂજિતં પારિબર્હં વિવાહે ॥ ૧૫॥

મદોત્કટાન્હેમવિભૂષિતાંશ્ચ
ગજાન્ગિરેઃ શૃઙ્ગસમાનદેહાન્ ।
શતં સપાદં નૃપસૂનવેઽસૌ
દદાવથ પ્રેમયુતો નૃપેન્દ્રઃ ॥ ૧૬॥

દાસીશતં કાઞ્ચનભૂષિતં ચ
કરેણુકાનાં ચ શતં સુચારુ ।
સમર્પયામાસ વરાય રાજા
વિવાહકાલે મુદિતોઽનુવેલમ્ ॥ ૧૭॥

અદાત્પુનર્દાસસહસ્રમેકં
સર્વાયુધૈઃ સમ્ભૃતભૂષિતઞ્ચ ।
રત્નાનિ વાસાંસિ યથોચિતાનિ
દિવ્યાનિ ચિત્રાણિ તથાવિકાનિ ॥ ૧૮॥

દદૌ પુનર્વાસગૃહાણિ તસ્મૈ
રમ્યાણિ દીર્ઘાણિ વિચિત્રિતાનિ ।

સિન્ધૂદ્ભવાનાં તુરગોત્તમાના-
મદાત્સહસ્રદ્વિતયં સુરમ્યમ્ ॥ ૧૯॥

ક્રમેલકાનાઞ્ચ શતત્રયં વૈ
પ્રત્યાદિશદ્ભારભૃતાં સુચારુ ।
શતદ્વયં વૈ શકટોત્તમાનાં
તસ્મૈ દદૌ ધાન્યરસૈઃ પ્રપૂરિતમ્ ॥ ૨૦॥

મનોરમાં રાજસુતાં પ્રણમ્ય
જગાદ વાક્યં વિહિતાઞ્જલિઃ પુરઃ ।
દાસોઽસ્મિ તે રાજસુતે વરિષ્ઠે
તદ્બ્રૂહિ યત્સ્યાત્તુ મનોગતં તે ॥ ૨૧॥

તં ચારુવાક્યં નિજગાદ સાપિ
સ્વસ્ત્યસ્તુ તે ભૂપ કુલસ્ય વૃદ્ધિઃ ।
સમ્માનિતાઽહં મમ સૂનવે ત્વયા
દત્તા યતો રત્નવરા સ્વકન્યા ॥ ૨૨॥

ન બન્દિપુત્રી નૃપ માગધી વા
સ્તૌમીહ કિં ત્વાં સ્વજનં મહત્તરમ્ ।
સુમેરુતુલ્યસ્તુ કૃતઃ સુતોઽદ્ય મે
સમ્બન્ધિના ભૂપતિનોત્તમેન ॥ ૨૩॥

અહોઽતિચિત્રં નૃપતેશ્ચરિત્રં
પરં પવિત્રં તવ કિં વદામિ ।
યદ્ભ્રષ્ટરાજ્યાય સુતાય મેઽદ્ય
દત્તા ત્વયા પૂજ્યસુતા વરિષ્ઠા ॥ ૨૪॥

વનાધિવાસાય કિલાધનાય
પિત્રા વિહીનાય વિસૈન્યકાય ।
સર્વાનિમાન્ભૂમિપતીન્વિહાય
ફલાશનાયાર્થવિવર્જિતાય ॥ ૨૫॥

સમાનવિત્તેઽથ કુલે બલે ચ
દદાતિ પુત્રીં નૃપતિશ્ચ ભૂયઃ ।
ન કોઽપિ મે ભૂપસુતેઽર્થહીને
ગુણાન્વિતાં રૂપવતીઞ્ચ દદ્યાત્ ॥ ૨૬॥

વૈરં તુ સર્વૈઃ સહ સંવિધાય
નૃપૈર્વરિષ્ઠૈર્બલસંયુતૈશ્ચ ।
સુદર્શનાયાથ સુતાऽર્પિતા મે
કિં વર્ણયે ધૈર્યમિદં ત્વદીયમ્ ॥ ૨૭॥

નિશમ્ય વાક્યાનિ નૃપઃ પ્રહૃષ્ટઃ
કૃતાઞ્જલિર્વાક્યમુવાચ ભૂયઃ ।
ગૃહાણ રાજ્યં મમ સુપ્રસિદ્ધં
ભવામિ સેનાપતિરદ્ય ચાહમ્ ॥ ૨૮॥

નોચેત્તદર્ધં પ્રતિગૃહ્ય ચાત્ર
સુતાન્વિતો રાજ્યફલાનિ ભુઙ્ક્ષ્વ ।
વિહાય વારાણસિકાનિવાસં
વને પુરે વાસમતો ન મેऽસ્તિ ॥ ૨૯॥

નૃપાસ્તુ સન્ત્યેવ રુષાન્વિતા વૈ
ગત્વા કરિષ્યે પ્રથમં તુ સાન્ત્વનમ્ ।
તતઃ પરં દ્વાવપરાવુપાયૌ
નોચેત્તતો યુદ્ધમહં કરિષ્યે ॥ ૩૦॥

જયાજયો દૈવવશો તથાપિ
ધર્મે જયો નૈવ કૃતેऽપ્યધર્મે ।
તેષાં કિલાધર્મવતાં નૃપાણાં
કથં ભવિષ્યત્યનુચિન્તિતં વૈ ॥ ૩૧॥

આકર્ણ્ય તદ્ભાષિતમર્થવચ્ચ
જગાદ વાક્યં હિતકારકં તમ્ ।
મનોરમા માનમવાપ્ય તસ્માત્
સર્વાત્મના મોદયુતા પ્રસન્ના ॥ ૩૨॥

રાજઞ્છિવં તેऽસ્તુ કુરુષ્વ રાજ્યં
ત્યક્ત્વા ભયં ત્વં સ્વસુતૈઃ સમેતઃ ।
સુતોऽપિ મે નૂનમવાપ્ય રાજ્યં
સાકેતપુર્યાં પ્રચરિષ્યતીહ ॥ ૩૩॥

વિસર્જયાસ્માન્નિજસદ્મ ગન્તું

શિવં ભવાની તવ સંવિધાસ્યતિ ।
ન કાઽપિ ચિન્તા મમ ભૂપ વર્તતે
સઞ્ચિન્તયન્ત્યા પરમામ્બિકાં વૈ ॥ ૩૪॥

દોષા ગતા વિવિધવાક્યપદૈ રસાલૈ-
રન્યોન્યભાષણપદૈરમૃતોપમૈશ્ચ ।
પ્રાતર્નૃપાઃ સમધિગમ્ય કૃતં વિવાહં
રોષાન્વિતા નગરબાહ્યગતાસ્તથોચુઃ ॥ ૩૫॥

અદ્યૈવ તં નૃપકલઙ્કધરઞ્ચ હત્વા
બાલં તથૈવ કિલ તં ન વિવાહયોગ્યમ્ ।
ગૃહ્ણીમ તાં શશિકલાં નૃપતેશ્ચ લક્ષ્મીં
લજ્જામવાપ્ય નિજસદ્મ કથં વ્રજેમ ॥ ૩૬॥

શ ૃણ્વન્તુ તૂર્યનિનદાન્કિલ વાદ્યમાના-
ઞ્છઙ્ખસ્વનાનભિભવન્તિ મૃદઙ્ગશબ્દાઃ ।
ગીતધ્વનિં ચ વિવિધં નિગમસ્વનઞ્ચ
મન્યામહે નૃપતિનાઽત્ર કૃતો વિવાહઃ ॥ ૩૭॥

અસ્માન્પ્રતાર્ય વચનૈર્વિધિવચ્ચકાર
વૈવાહિકેન વિધિના કરપીડનં વૈ ।
કર્તવ્યમદ્ય કિમહો પ્રવિચિન્તયન્તુ
ભૂપાઃ પરસ્પરમતિં ચ સમર્થયન્તુ ॥ ૩૮॥

એવં વદત્સુ નૃપતિષ્વથ કન્યાકાયાઃ
કૃત્વા વિવાહવિધિમપ્રતિમપ્રભાવઃ ।
ભૂપાન્નિમન્ત્રયિતુમાશુ જગામ રાજા
કાશીપતિઃ સ્વસુહૃદૈઃ પ્રથિતપ્રભાવૈઃ ॥ ૩૯॥

આગચ્છન્તં ચ તં દૃષ્ટ્વા નૃપાઃ કાશીપતિં તદા ।
નોચુઃ કિઞ્ચિદપિ ક્રોધાન્મૌનમાધાય સંસ્થિતાઃ ॥ ૪૦॥

સ ગત્વા પ્રણિપત્યાહ કૃતાઞ્જલિરભાષત ।
આગન્તવ્યં નૃપૈઃ સર્વૈર્ભોજનાર્થં ગૃહે મમ ॥ ૪૧॥

કન્યયાઽસૌ વૃતો ભૂપઃ કિં કરોમિ હિતાહિતમ્ ।
ભવદ્ભિસ્તુ શુભઃ કાર્યો મહાન્તો હિ દયાલવઃ ॥ ૪૨॥

તન્નિશમ્ય વચસ્તસ્ય નૃપાઃ ક્રોધપરિપ્લુતાઃ ।
પ્રત્યૂચુર્ભુક્તમસ્માભિઃ સ્વગૃહં નૃપતે વ્રજ ॥ ૪૩॥

કુરુ કાર્યાણ્યશેષાણિ યથેષ્ટં સુકૃતં કૃતમ્ ।
નૃપાઃ સર્વે પ્રયાન્ત્વદ્ય સ્વાનિ સ્વાનિ ગૃહાણિ વૈ ॥ ૪૪॥

સુબાહુરપિ તચ્છ્રુત્વા જગામ શઙ્કિતો ગૃહમ્ ।
કિં કરિષ્યન્તિ સંવિગ્નાઃ ક્રોધયુક્તા નૃપોત્તમાઃ ॥ ૪૫॥

ગતે તસ્મિન્મહીપાલાશ્ચક્રુશ્ચ સમયં પુનઃ ।
રુદ્ધ્વા માર્ગં ગ્રહીષ્યામઃ કન્યાં હત્વા સુદર્શનમ્ ॥ ૪૬॥

કેચનોચુઃ કિમસ્માકં હન્ત તેન નૃપેણ વૈ ।
દૃષ્ટ્વા તુ કૌતુકં સર્વં ગમિષ્યામો યથાગતમ્ ॥ ૪૭॥

ઇત્યુક્ત્વા તે નૃપાઃ સર્વે માર્ગમાક્રમ્ય સંસ્થિતાઃ ।
ચકારોત્તરકાર્યાણિ સુબાહુઃ સ્વગૃહં ગતઃ ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
સુદર્શનશશિકલયોર્વિવાહવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૩.૨૨॥

## ૩.૨૩ ત્રયોવિંશોઽધ્યાયઃ । સુબાહુકૃતદેવીસ્તુતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્મૈ ગૌરવભોજ્યાનિ વિધાય વિધિવત્તદા ।
વાસરાણિ ચ ષડ્રાજા ભોજયામાસ ભક્તિતઃ ॥ ૧॥

એવં વિવાહકાર્યાણિ કૃત્વા સર્વાણિ પાર્થિવઃ ।
પારિબર્હં પ્રદત્વાઽથ મન્ત્રયન્સચિવૈઃ સહ ॥ ૨॥

દૂતૈસ્તુ કથિતં શ્રુત્વા માર્ગસંરોધનં કૃતમ્ ।
બભૂવ વિમના રાજા સુબાહુરમિતદ્યુતિઃ ॥ ૩॥

સુદર્શનસ્તદોવાચ શ્વશુરં સંશિતવ્રતઃ ।
અસ્માન્વિસર્જયાશુ ત્વં ગમિષ્યામો હ્યશઙ્કિતાઃ ॥ ૪॥

ભારદ્વાજાશ્રમં પુણ્યં ગત્વા તત્ર સમાહિતાઃ ।
નિવાસાય વિચારો વૈ કર્તવ્યઃ સર્વથા નૃપ ॥ ૫॥

નૃપેભ્યશ્ચ ન કર્તવ્યં ભયં કિઞ્ચિત્ત્વયાઽનઘ ।

જગન્માતા ભવાની મે સાહાય્યં વૈ કરિષ્યતિ ॥ ૬॥

વ્યાસ ઉવાચ ।
તસ્યેતિ મતમાજ્ઞાય જામાતુર્નૃપસત્તમઃ ।
વિસસર્જ ધનં દત્વા પ્રતસ્થે સોઽપિ સત્વરઃ ॥ ૭॥

બલેન મહતાઽઽવિષ્ટો યયાવનુ નૃપોત્તમઃ ।
સુદર્શનો વૃતસ્તત્ર ચચાલ પથિ નિર્ભયઃ ॥ ૮॥

રથૈઃ પરિવૃતઃ શૂરઃ સદારો રથસંસ્થિતઃ ।
ગચ્છન્દદર્શ સૈન્યાનિ નૃપાણાં રઘુનન્દનઃ ॥ ૯॥

સુબાહુરપિ તાન્વીક્ષ્ય ચિન્તાવિષ્ટો બભૂવ હ ।
વિધિવત્સ શિવાં ચિત્તે જગામ શરણં મુદા ॥ ૧૦॥

જજાપૈકાક્ષરં મન્ત્રં કામરાજમનુત્તમમ્ ।
નિર્ભયો વીતશોકશ્ચ પત્ન્યા સહ નવોઢયા ॥ ૧૧॥

તતઃ સર્વે મહીપાલાઃ કૃત્વા કોલાહલં તદા ।
ઉત્થિતાઃ સૈન્યસંયુક્તા હન્તુકામાસ્તુ કન્યકામ્ ॥ ૧૨॥

કાશિરાજસ્તુ તાન્દૃષ્ટ્વા હન્તુકામો બભૂવ હ ।
નિવારિતસ્તદાઽત્યર્થં રાઘવેણ જિગીષતા ॥ ૧૩॥

તત્રાપિ નેદુઃ શઙ્ખાશ્ચ ભેર્યશ્ચાનકદુન્દુભિઃ ।
સુબાહોશ્ચ નૃપાણાઞ્ચ પરસ્પરજિઘાંસતામ્ ॥ ૧૪॥

શત્રુજિત્તુ સુસંવૃત્તઃ સ્થિતસ્તત્ર જિઘાંસયા ।
યુધાજિત્તત્સહાયાર્થં સન્નદ્ધઃ પ્રબભૂવ હ ॥ ૧૫॥

કેચિચ્ચ પ્રેક્ષકાસ્તસ્ય સહાનીકૈઃ સ્થિતાસ્તદા ।
યુધાજિદગ્રતો ગત્વા સુદર્શનમુપસ્થિતઃ ॥ ૧૬॥

શત્રુજિત્તેન સહિતો હન્તું ભ્રાતરમાનુજઃ ।
પરસ્પરં તે બાણૌઘૈસ્તતક્ષુઃ ક્રોધમૂર્છિતાઃ ॥ ૧૭॥

સમ્મર્દઃ સુમહાંસ્તત્ર સમ્પ્રવૃત્તઃ સુમાર્ગણૈઃ ।
કાશીપતિસ્તદા તૂર્ણં સૈન્યેન બહુના વૃતઃ ॥ ૧૮॥

સાહાય્યાર્થં જગામાશુ જામાતરમનિન્દિતમ્ ।
એવં પ્રવૃત્તે સઙ્ગ્રામે દારુણે લોમહર્ષણે ॥ ૧૯॥

પ્રાદુર્બભૂવ સહસા દેવી સિંહોપરિ સ્થિતા ।
નાનાયુધધરા રમ્યા વરાભૂષણભૂષિતા ॥ ૨૦॥

દિવ્યામ્બરપરીધાના મન્દારસ્રક્સુસંયુતા ।
તાં દૃષ્ટ્વા તેઽથ ભૂપાલા વિસ્મયં પરમં ગતાઃ ॥ ૨૧॥

કેયં સિંહસમારૂઢા કુતો વેતિ સમુત્થિતા ।
સુદર્શનસ્તુ તાં વીક્ષ્ય સુબાહુમિતિ ચાબ્રવીત્ ॥ ૨૨॥

પશ્ય રાજન્મહાદેવીમાગતાં દિવ્યદર્શનામ્ ।
અનુગ્રહાય મે નૂનં પ્રાદુર્ભૂતા દયાન્વિતા ॥ ૨૩॥

નિર્ભયોઽહં મહારાજ જાતોઽસ્મિ નિર્ભયાદપિ ।
સુદર્શનઃ સુબાહુશ્ચ તામાલોક્ય વરાનનામ્ ॥ ૨૪॥

પ્રણામં ચક્રતુસ્તસ્યા મુદિતૌ દર્શનેન ચ ।
નનાદ ચ તદા સિંહો ગજાસ્ત્રસ્તાશ્ચકમ્પિરે ॥ ૨૫॥

વવુર્વાતા મહાઘોરા દિશશ્ચાસન્સુદારુણાઃ ।
સુદર્શનસ્તદા પ્રાહ નિજં સેનાપતિં પ્રતિ ॥ ૨૬॥

માર્ગે વ્રજ ત્વં તરસા ભૂપાલા યત્ર સંસ્થિતાઃ ।
કિં કરિષ્યન્તિ રાજાનઃ કુપિતા દુષ્ટચેતસઃ ॥ ૨૭॥

શરણાર્થઞ્ચ સમ્પ્રાપ્તા દેવી ભગવતી હિ નઃ ।
નિરાતઙ્કૈશ્ચ ગન્તવ્યં માર્ગેઽસ્મિન્ભૂપસઙ્કુલે ॥ ૨૮॥

સ્મૃતા મયા મહાદેવી રક્ષણાર્થમુપાગતા ।
તચ્છ્રુત્વા વચનં સેનાપતિસ્તેન પથાઽવ્રજત્ ॥ ૨૯॥

યુધાજિત્તુ સુસઙ્ક્રુદ્ધસ્તાનુવાચ મહીપતીન્ ।
કિં સ્થિતા ભયસન્ત્રસ્તા નિઘ્નન્તુ કન્યકાન્વિતમ્ ॥ ૩૦॥

અવમન્ય ચ નઃ સર્વાન્બલહીનો બલાધિકાન્ ।
કન્યાં ગૃહીત્વા સંયાતિ નિર્ભયસ્તરસા શિશુઃ ॥ ૩૧॥

કિં ભીતાઃ કામિનીં વીક્ષ્ય સિંહોપરિ સુસંસ્થિતામ્ ।
નોપેક્ષ્યો હિ મહાભાગા હન્તવ્યોઽત્ર સમાહિતૈઃ ॥ ૩૨॥

હત્વૈનં સઙ્ગ્રહીષ્યામઃ કન્યાં ચારુવિભૂષણામ્ ।

નાયં કેસરિણાદત્તાં છેત્તુમર્હતિ જમ્બુકઃ ॥ ૩૩॥

ઇત્યુક્ત્વા સૈન્યસંયુક્તઃ શત્રુજિત્સહિતસ્તદા ।
યોદ્ધુકામઃ સુસમ્પ્રાપ્તો યુધાજિત્ક્રોધસંવૃતઃ ॥ ૩૪॥

મુમોચ વિશિખાંસ્તૂર્ણં સમપુઙ્ખાઞ્છિલાશિતાન્ ।
ધનુરાકૃષ્ય કર્ણાન્તં કર્માારપરિમાર્જિતાન્ ॥ ૩૫॥

હન્તુકામઃ સુદુર્મેધાઃ સુદર્શનમથોપરિ ।
સુદર્શનસ્તુ તાન્બાણૈશ્ચિચ્છેદાપતતઃ ક્ષણાત્ ॥ ૩૬॥

એવં યુદ્ધે પ્રવૃત્તેઽથ ચુકોપ ચણ્ડિકા ભૃશમ્ ।
દુર્ગાદેવી મુમોચાથ બાણાન્ યુધાજિતં પ્રતિ ॥ ૩૭॥

નાનારૂપા તદા જાતા નાનાશસ્ત્રધરા શિવા ।
સમ્પ્રાપ્તા તુમુલં તત્ર ચકાર જગદમ્બિકા ॥ ૩૮॥

શત્રુજિન્નિહતસ્તત્ર યુધાજિદપિ પાર્થિવઃ ।
પતિતૌ તૌ રથાભ્યાં તુ જયશબ્દસ્તદાઽભવત્ ॥ ૩૯॥

વિસ્મયં પરમં પ્રાપ્તા ભૂપાઃ સર્વે વિલોક્ય તામ્ ।
નિધનં માતુલસ્યાપિ ભાગિનેયસ્ય સંયુગે ॥ ૪૦॥

સુબાહુરપિ તદ્દૃષ્ટ્વા નિધનં સંયુગે તયોઃ ।
તુષ્ટાવ પરમપ્રીતો દુર્ગાં દુર્ગાર્તિનાશિનીમ્ ॥ ૪૧॥

સુબાહુરુવાચ ।
નમો દેવ્યૈ જગદ્ધાત્ર્યૈ શિવાયૈ સતતં નમઃ ।
દુર્ગાયૈ ભગવત્યૈ તે કામદાયૈ નમો નમઃ ॥ ૪૨॥

નમઃ શિવાયૈ શાન્ત્યૈ તે વિદ્યાયૈ મોક્ષદે નમઃ ।
વિશ્વવ્યાપ્ત્યૈ જગન્માતર્જગદ્ધાત્ર્યૈ નમઃ શિવે ॥ ૪૩॥

નાહં ગતિં તવ ધિયા પરિચિન્તયન્ વૈ
જાનામિ દેવિ સગુણઃ કિલ નિર્ગુણાયાઃ ।
કિં સ્તૌમિ વિશ્વજનનીં પ્રકટપ્રભાવાં
ભક્તાર્તિનાશનપરાં પરમાઞ્ચ શક્તિમ્ ॥ ૪૪॥

વાગ્દેવતા ત્વમસિ સર્વગતૈવ બુદ્ધિ-
ર્વિદ્યા મતિશ્ચ ગતિરપ્યસિ સર્વજન્તોઃ ।

ત્વાં સ્તૌમિ કિં ત્વમસિ સર્વમનોનિયન્ત્રી
કિં સ્તૂયતે હિ સતતં ખલુ ચાત્મરૂપમ્ ॥ ૪૫॥

બ્રહ્મા હરશ્ચ હરિરપ્યનિશં સ્તુવન્તો
નાન્તં ગતાઃ સુરવરાઃ કિલ તે ગુણાનામ્ ।
ક્વાહં વિભેદમતિરમ્બ ગુણૈર્વૃતો વૈ
વક્તું ક્ષમસ્તવ ચરિત્રમહોઽપ્રસિદ્ધઃ ॥ ૪૬॥

સત્સઙ્ગતિઃ કથમહો ન કરોતિ કામં
પ્રાસઙ્ગિકાપિ વિહિતા ખલુ ચિત્તશુદ્ધિઃ ।
જામાતુરસ્ય વિહિતેન સમાગમેન
પ્રાપ્તં મયાઽદ્ભુતમિદં તવ દર્શનં વૈ ॥ ૪૭॥

બ્રહ્માઽપિ વાઞ્છતિ સદૈવ હરો હરિશ્ચ
સેન્દ્રાઃ સુરાશ્ચ મુનયો વિદિતાર્થતત્ત્વાઃ ।
યદ્દર્શનં જનનિ તેઽદ્ય મયા દુરાપં
પ્રાપ્તં વિના દમશમાદિસમાધિભિશ્ચ ॥ ૪૮॥

ક્વાહં સુમન્દમતિરાશુ તવાવલોકં
ક્વેદં ભવાનિ ભવભેષજમદ્વિતીયમ્ ।
જ્ઞાતાઽસિ દેવિ સતતં કિલ ભાવયુક્તા
ભક્તાનુકમ્પનપરામરવર્ગપૂજ્યા ॥ ૪૯॥

કિં વર્ણયામિ તવ દેવિ ચરિત્રમેતદ્
યદ્રક્ષિતોઽસ્તિ વિષમેઽત્ર સુદર્શનોઽયમ્ ।
શત્રૂ હતૌ સુબલિનૌ તરસા ત્વયાદ્ય
ભક્તાનુકમ્પિ ચરિતં પરમં પવિત્રમ્ ॥ ૫૦॥

નાશ્ચર્યમેતદિતિ દેવિ વિચારિતેઽર્થે
ત્વં પાસિ સર્વમખિલં સ્થિરજઙ્ગમં વૈ ।
ત્રાતસ્ત્વયા ચ વિનિહત્ય રિપુર્દયાતઃ
સંરક્ષિતોઽયમધુના ધ્રુવસન્ધિસૂનુઃ ॥ ૫૧॥

ભક્તસ્ય સેવનપરસ્ય સ્વયશોઽતિદીપ્તં
કર્તું ભવાનિ રચિતં ચરિતં ત્વયૈતત્ ।
નોચેત્કથં સુપરિગૃહ્ય સુતાં મદીયાં
યુદ્ધે ભવેત્કુશલવાનનવદ્યશીલઃ ॥ ૫૨॥

શક્તાઽસિ જન્મમરણાદિભયાન્વિહન્તું
કિં ચિત્રમત્ર કિલ ભક્તજનસ્ય કામમ્ ।
ત્વં ગીયસે જનનિ ભક્તજનૈરપારા
ત્વં પાપપુણ્યરહિતા સગુણાઽગુણા ચ ॥ ૫૩॥

ત્વદ્દર્શનાદહમહો સુકૃતી કૃતાર્થો
જાતોઽસ્મિ દેવિ ભુવનેશ્વરિ ધન્યજન્મા ।
બીજં ન તે ન ભજનં કિલ વેદ્મિ માત-
ર્જ્ઞાતસ્તવાદ્ય મહિમા પ્રકટપ્રભાવઃ ॥ ૫૪॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા તદા દેવી પ્રસન્નવદના શિવા ।
ઉવાચ ચ નૃપં દેવી વરં વરય સુવ્રત ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
સુબાહુકૃતદેવીસ્તુતિવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૩.૨૩॥

## ૩.૨૪ ચતુર્વિંશોઽધ્યાયઃ । દેવીમહિમવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્યાસ્તદ્વચનં શ્રુત્વા ભવાન્યાઃ સ નૃપોત્તમઃ ।
પ્રોવાચ વચનં તત્ર સુબાહુર્ભક્તિસંયુતઃ ॥ ૧॥

સુબાહુરુવાચ ।
એકતો દેવલોકસ્ય રાજ્યં ભૂમણ્ડલસ્ય ચ ।
એકતો દર્શનં તે વૈ ન ચ તુલ્યં કદાચન ॥ ૨॥

દર્શનાત્સદૃશં કિઞ્ચિત્ત્રિષુ લોકેષુ નાસ્તિ મે ।
કં વરં દેવિ યાચેઽહં કૃતાર્થોઽસ્મિ ધરાતલે ॥ ૩॥

એતદિચ્છામ્યહં માતર્યાચિતું વાઞ્છિતં વરમ્ ।
તવ ભક્તિઃ સદા મેઽસ્તુ નિશ્ચલા હ્યનપાયિની ॥ ૪॥

નગરેઽત્ર ત્વયા માતઃ સ્થાતવ્યં મમ સર્વદા ।
દુર્ગાદેવીતિ નામ્ના વૈ ત્વં શક્તિરિહ સંસ્થિતા ॥ ૫॥

રક્ષા ત્વયા ચ કર્તવ્યા સર્વદા નગરસ્ય હ ।
યથા સુદર્શનસ્ત્રાતો રિપુસઙ્ઘાદનામયઃ ॥ ૬॥

તથાઽત્ર રક્ષા કર્તવ્યા વારાણસ્યાસ્ત્વયામ્બિકે ।
યાવત્પુરી ભવેદ્ભૂમૌ સુપ્રતિષ્ઠા સુસંસ્થિતા ॥ ૭॥

તાવત્ત્વયાઽત્ર સ્થાતવ્યં દુર્ગે દેવિ કૃપાનિધે ।
વરોઽયં મમ તે દેયઃ કિમન્યત્પ્રાર્થયામ્યહમ્ ॥ ૮॥

વિવિધાન્સકલાન્કામાન્દેહિ મે વિદ્વિષો જહિ ।
અભદ્રાણાં વિનાશઞ્ચ કુરુ લોકસ્ય સર્વદા ॥ ૯॥

વ્યાસ ઉવાચ ।
ઇતિ સમ્પ્રાર્થિતા દેવી દુર્ગા દુર્ગાર્તિનાશિની ।
તમુવાચ નૃપં તત્ર સ્તુત્વા વૈ સંસ્થિતં પુરઃ ॥ ૧૦॥

દુર્ગોવાચ ।
રાજન્સદા નિવાસો મે મુક્તિપુર્યાં ભવિષ્યતિ ।
રક્ષાર્થં સર્વલોકાનાં યાવત્તિષ્ઠતિ મેદિની ॥ ૧૧॥

અથો સુદર્શનસ્તત્ર સમાગત્ય મુદાન્વિતઃ ।
પ્રણમ્ય પરયા ભક્ત્યા તુષ્ટાવ જગદમ્બિકામ્ ॥ ૧૨॥

અહો કૃપા યે કથયામ્યહં કિં
ત્રાતસ્ત્વયા યત્કિલ ભક્તિહીનઃ ।
ભક્તાનુકમ્પી સકલો જનોઽસ્તિ
વિમુક્તભક્તેરવનં વ્રતં તે ॥ ૧૩॥

ત્વં દેવિ સર્વં સૃજસિ પ્રપઞ્ચં
શ્રુતં મયા પાલયસિ સ્વસૃષ્ટમ્ ।
ત્વમત્સિ સંહારપરે ચ કાલે
ન તેઽત્ર ચિત્રં મમ રક્ષણં વૈ ॥ ૧૪॥

કરોમિ કિં તે વદ દેવિ કાર્યં
ક્વ વા વ્રજામીત્યનુમોદયાશુ ।
કાર્યે વિમૂઢોઽસ્મિ તવાજ્ઞયાઽહં
ગચ્છામિ તિષ્ઠે વિહરામિ માતઃ ॥ ૧૫॥

વ્યાસ ઉવાચ ।

તં તથા ભાષમાણં તુ દેવી પ્રાહ દયાન્વિતા ।
ગચ્છાયોધ્યાં મહાભાગ કુરુ રાજ્યં કુલોચિતમ્ ॥ ૧૬॥

સ્મરણીયા સદાઽહં તે પૂજનીયા પ્રયત્નતઃ ।
શં વિધાસ્યામ્યહં નિત્યં રાજ્યં તે નૃપસત્તમ ॥ ૧૭॥

અષ્ટમ્યાઞ્ચ ચતુર્દશ્યાં નવમ્યાઞ્ચ વિશેષતઃ ।
મમ પૂજા પ્રકર્તવ્યા બલિદાનવિધાનતઃ ॥ ૧૮॥

અર્ચા મદીયા નગરે સ્થાપનીયા ત્વયાઽનઘ ।
પૂજનીયા પ્રયત્નેન ત્રિકાલં ભક્તિપૂર્વકમ્ ॥ ૧૯॥

શરત્કાલે મહાપૂજા કર્તવ્યા મમ સર્વદા ।
નવરાત્રવિધાનેન ભક્તિભાવયુતેન ચ ॥ ૨૦॥

ચૈત્રેઽશ્વિને તથાઽઽષાઢે માઘે કાર્યો મહોત્સવઃ ।
નવરાત્રે મહારાજ પૂજા કાર્યા વિશેષતઃ ॥ ૨૧॥

કૃષ્ણપક્ષે ચતુર્દશ્યાં મમ ભક્તિસમન્વિતૈઃ ।
કર્તવ્યા નૃપશાર્દૂલ તથાઽષ્ટમ્યાં સદા બુધૈઃ ॥ ૨૨॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્હિતા દેવી દુર્ગા દુર્ગાર્તિનાશિની ।
નતા સુદર્શનેનાથ સ્તુતા ચ બહુવિસ્તરમ્ ॥ ૨૩॥

અન્તર્હિતાં તુ તાં દૃષ્ટ્વા રાજાનઃ સર્વ એવ તે ।
પ્રણેમુસ્તં સમાગમ્ય યથા શક્રં સુરાસ્તથા ॥ ૨૪॥

સુબાહુરપિ તં નત્વા સ્થિતશ્ચાગ્રે મુદાન્વિતઃ ।
ઊચુઃ સર્વે મહીપાલા અયોધ્યાધિપતિં તદા ॥ ૨૫॥

ત્વમસ્માકં પ્રભુઃ શાસ્તા સેવકાસ્તે વયં સદા ।
કુરુ રાજ્યમયોધ્યાયાં પાલયાસ્માન્નૃપોત્તમ ॥ ૨૬॥

ત્વત્પ્રસાદાન્મહારાજ દૃષ્ટા વિશ્વેશ્વરી શિવા ।
આદિશક્તિર્ભવાની સા ચતુર્વર્ગફલપ્રદા ॥ ૨૭॥

ધન્યસ્ત્વં કૃતકૃત્યોઽસિ બહુપુણ્યો ધરાતલે ।
યસ્માચ્ચ ત્વત્કૃતે દેવી પ્રાદુર્ભૂતા સનાતની ॥ ૨૮॥

ન જાનીમો વયં સર્વે પ્રભાવં નૃપસત્તમ ।

ચણ્ડિકાયાસ્તમોયુક્તા માયયા મોહિતાઃ સદા ॥ ૨૯॥

ધનદારસુતાનાં ચ ચિન્તનેઽભિરતાઃ સદા ।
મગ્ના મહાર્ણવે ઘોરે કામક્રોધઝષાકુલે ॥ ૩૦॥

પૃચ્છામસ્ત્વાં મહાભાગ સર્વજ્ઞોઽસિ મહામતે ।
કેયં શક્તિઃ કુતો જાતા કિં પ્રભાવા વદસ્વ તત્ ॥ ૩૧॥

ભવ ત્વં નૌશ્ચ સંસારે સાધવોઽતિ દયાપરાઃ ।
તસ્માન્નો વદ કાકુત્સ્થ દેવીમાહાત્મ્યમુત્તમમ્ ॥ ૩૨॥

યત્પ્રભાવા ચ સા દેવી યત્સ્વરુપા યદુદ્ભવા ।
સત્સર્વં શ્રોતુમિચ્છામસ્ત્વં બ્રૂહિ નૃવરોત્તમ ॥ ૩૩॥

વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તૈસ્તુ ધ્રુવસન્ધિસુતો નૃપઃ ।
વિચિન્ત્ય મનસા દેવીં તાનુવાચ મુદાન્વિતઃ ॥ ૩૪॥

સુદર્શન ઉવાચ ।
કિં બ્રવીમિ મહીપાલાસ્તસ્યાશ્ચરિતમુત્તમમ્ ।
બ્રહ્માદયો ન જાનન્તિ સેશાઃ સુરગણાસ્તથા ॥ ૩૫॥

સર્વસ્યાદ્યા મહાલક્ષ્મીર્વરેણ્યા શક્તિરુત્તમા ।
સાત્ત્વિકીયં મહીપાલા જગત્પાલનતત્પરા ॥ ૩૬॥

સૃજતે યા રજોરૂપા સત્ત્વરૂપા ચ પાલને ।
સંહારે ચ તમોરૂપા ત્રિગુણા સા સદા મતા ॥ ૩૭॥

નિર્ગુણા પરમા શક્તિઃ સર્વકામફલપ્રદા ।
સર્વેષાં કારણં સા હિ બ્રહ્માદીનાં નૃપોત્તમાઃ ॥ ૩૮॥

નિર્ગુણા સર્વથા જ્ઞાતુમશક્યા યોગિભિર્નૃપાઃ ।
સગુણા સુખસેવ્યા સા ચિન્તનીયા સદા બુધૈઃ ॥ ૩૯॥

રાજાન ઊચુઃ ।
બાલ એવ વનં પ્રાપ્તસ્ત્વં તુ નૂનં ભયાતુરઃ ।
કથં જ્ઞાતા ત્વયા દેવી પરમા શક્તિરુત્તમા ॥ ૪૦॥

ઉપાસિતા કથં ચૈવ પૂજિતા ચ કથં નૃપ ।
યા પ્રસન્ના તુ સાહાય્યં ચકાર ત્વરયાન્વિતા ॥ ૪૧॥

સુદર્શન ઉવાચ ।
બાલભાવાન્મયા પ્રાપ્તં બીજં તસ્યાઃ સુસમ્મતમ્ ।
સ્મરામિ પ્રજપન્નિત્યં કામબીજાભિધં નૃપાઃ ॥ ૪૨॥

ઋષિભિઃ કથ્યમાના સા મયા જ્ઞાતામ્બિકા શિવા ।
સ્મરામિ તાં દિવારાત્રં ભક્ત્યા પરમયા પરામ્ ॥ ૪૩॥

વ્યાસ ઉવાચ ।
તન્નિશમ્ય વચસ્તસ્ય રાજાનો ભક્તિતત્પરાઃ ।
તાં મત્વા પરમાં શક્તિં નિર્યયુઃ સ્વગૃહાન્પ્રતિ ॥ ૪૪॥

સુબાહુરગમત્કાશ્યાં તમાપૃચ્છ્ય સુદર્શનમ્ ।
સુદર્શનોઽપિ ધર્માત્મા નિર્જગામ સુકોસલાન્ ॥ ૪૫॥

મન્ત્રિણસ્તુ નૃપં શ્રુત્વા હતં શત્રુજિતં મૃધે ।
જિતં સુદર્શનઞ્ચૈવ બભૂવુઃ પ્રેમસંયુતાઃ ॥ ૪૬॥

આગચ્છન્તં નૃપં શ્રુત્વા તં સાકેતનિવાસિનઃ ।
ઉપાયનાન્યુપાદાય પ્રયયુઃ સમ્મુખે જનાઃ ॥ ૪૭॥

તથા પ્રકૃતયઃ સર્વે નાનોપાયનપાણયઃ ।
ધ્રુવસન્ધિસુતં દત્ત્વા મુદિતાઃ પ્રયયુઃ પ્રજાઃ ॥ ૪૮॥

સ્ત્રિયોપસંયુતઃ સોઽથ પ્રાપ્યાયોધ્યાં સુદર્શનઃ ।
સમ્માન્ય સર્વલોકાંશ્ચ યયૌ રાજા નિવેશનમ્ ॥ ૪૯॥

વન્દિભિઃ સ્તૂયમાનસ્તુ વન્દ્યમાનશ્ચ મન્ત્રિભિઃ ।
કન્યાભિઃ કીર્યમાણશ્ચ લાજૈઃ સુમનસૈસ્તથા ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સુદર્શનેન
દેવીમહિમવર્ણનં નામ તૃતીયસ્કન્ધે ચતુર્વિંશોઽધ્યાયઃ ॥ ૩.૨૪॥

## ૩.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । દેવીસ્થાપનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ગત્વાઽયોધ્યાં નૃપશ્રેષ્ઠો ગૃહં રાજ્ઞઃ સુહૃદ્વૃતઃ ।
શત્રુજિન્માતરં પ્રાહ પ્રણમ્ય શોકસઙ્કુલામ્ ॥ ૧॥

માતર્ન તે મયા પુત્રઃ સઙ્ગ્રામે નિહતઃ કિલ ।

ન પિતા તે યુધાજિચ્ચ શપે તે ચરણૌ તથા ॥ ૨॥

દુર્ગયા તૌ હતૌ સઙ્ખ્યે નાપરાધો મમાત્ર વૈ ।
અવશ્યમ્ભાવિભાવેષુ પ્રતીકારો ન વિદ્યતે ॥ ૩॥

ન શોકોઽત્ર ત્વયા કાર્યો મૃતપુત્રસ્ય માનિનિ ।
સ્વકર્મવશગો જીવો ભુઙ્ક્તે ભોગાન્સુખાસુખાન્ ॥ ૪॥

દાસોઽસ્મિ તવ ભો માતર્યથા મમ મનોરમા ।
તથા ત્વમપિ ધર્મજ્ઞે ન ભેદોઽસ્તિ મનાગપિ ॥ ૫॥

અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ।
તસ્માન્ન શોચિતવ્યં તે સુખે દુઃખે કદાચન ॥ ૬॥

દુઃખે દુઃખાધિકાન્પશ્યેત્સુખે પશ્યેત્સુખાધિકમ્ ।
આત્માનં શોકહર્ષાભ્યાં શત્રુભ્યામિવ નાર્પયેત્ ॥ ૭॥

દૈવાધીનમિદં સર્વં નાત્માધીનં કદાચન ।
ન શોકેન તદાઽઽત્માનં શોષયેન્મતિમાન્નરઃ ॥ ૮॥

યથા દારુમયી યોષા નટાદીનાં પ્રચેષ્ટતે ।
તથા સ્વકર્મવશગો દેહી સર્વત્ર વર્તતે ॥ ૯॥

અહં વનગતો માતર્નાભવં દુઃખમાનસઃ ।
ચિન્તયન્સ્વકૃતં કર્મ ભોક્તવ્યમિતિ વેદ્મિ ચ ॥ ૧૦॥

મૃતો માતામહોઽત્રૈવ વિધુરા જનની મમ ।
ભયાતુરા ગૃહીત્વા માં નિર્યયૌ ગહનં વનમ્ ॥ ૧૧॥

લુણ્ઠિતા તસ્કરૈર્માર્ગે વસ્ત્રહીના તથા કૃતા ।
પાથેયઞ્ચ હૃતં સર્વં બાલપુત્રા નિરાશ્રયા ॥ ૧૨॥

માતા ગૃહીત્વા માં પ્રાપ્તા ભારદ્વાજાશ્રમં પ્રતિ ।
વિદલ્લોઽયં સમાયાતસ્તથા ધાત્રેયિકાઽબલા ॥ ૧૩॥

મુનિભિર્મુનિપત્નીભિર્દયાયુક્તૈઃ સમન્તતઃ ।
પોષિતાઃ ફલનીવારૈર્વયં તત્ર સ્થિતાસ્ત્રયઃ ॥ ૧૪॥

દુઃખં નમે તદા હ્યાસીત્સુખં નાદ્ય ધનાગમે ।
ન વૈરં ન ચ માત્સર્યં મમ ચિત્તે તુ કર્હિચિત્ ॥ ૧૫॥

નીવારભક્ષણં શ્રેષ્ઠં રાજભોગાત્પરન્તપે ।
તદાશી નરકં યાતિ ન નીવારાશનઃ ક્વચિત્ ॥ ૧૬॥

ધર્મસ્યાચરણં કાર્યં પુરુષેણ વિજાનતા ।
સઞ્જિત્યેન્દ્રિયવર્ગં વૈ યથા ન નરકં વ્રજેત્ ॥ ૧૭॥

માનુષ્યં દુર્લભં માતઃ ખણ્ડેઽસ્મિન્ભારતે શુભે ।
આહારાદિ સુખં નૂનં ભવેત્સર્વાસુ યોનિષુ ॥ ૧૮॥

પ્રાપ્ય તં માનુષં દેહં કર્તવ્યં ધર્મસાધનમ્ ।
સ્વર્ગમોક્ષપ્રદં નૃણાં દુર્લભં ચાન્યયોનિષુ ॥ ૧૯॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તા સા તદા તેન લીલાવત્યતિલજ્જિતા ।
પુત્રશોકં પરિત્યજ્ય તમાહાશ્રુવિલોચના ॥ ૨૦॥

સાપરાધાઽસ્મિ પુત્રાહં કૃતા પિત્રા યુધાજિતા ।
હત્યા માતામહં તેઽત્ર હૃતં રાજ્યં તુ યેન વૈ ॥ ૨૧॥

ન તં વારયિતું શક્તા તદાઽહં ન સુતં મમ ।
યત્કૃતં કર્મ તેનૈવ નાપરાધોઽસ્તિ મે સુત ॥ ૨૨॥

તૌ મૃતૌ સ્વકૃતેનૈવ કારણં ત્વં તયોર્ન ચ ।
નાહં શોચામિ તં પુત્રં સદા શોચામિ તત્કૃતમ્ ॥ ૨૩॥

પુત્ર ત્વમસિ કલ્યાણ ભગિની મે મનોરમા ।
ન ક્રોધો ન ચ શોકો મે ત્વયિ પુત્ર મનાગપિ ॥ ૨૪॥

કુરુ રાજ્યં મહાભાગ પ્રજાઃ પાલય સુવ્રત ।
ભગવત્યાઃ પ્રસાદેન પ્રાપ્તમેતદકણ્ટકમ્ ॥ ૨૫॥

તદાકર્ણ્ય વચો માતુર્નત્વા તાં નૃપનન્દનઃ ।
જગામ ભવનં રમ્યં યત્ર પૂર્વં મનોરમા ॥ ૨૬॥

ન્યવસત્તત્ર ગત્વા તુ સર્વાનાહૂય મન્ત્રિણઃ ।
દૈવજ્ઞાનથ પપ્રચ્છ મુહૂર્તં દિવસં શુભમ્ ॥ ૨૭॥

સિંહાસનં તથા હૈમં કારયિત્વા મનોહરમ્ ।
સિંહાસને સ્થિતાં દેવીં પૂજયિષ્યે સદાઽપ્યહમ્ ॥ ૨૮॥

સ્થાપયિત્વાઽઽસને દેવીં ધર્માર્થકામમોક્ષદામ્ ।

રાજ્યં પશ્ચાત્કરિષ્યામિ યથા રામાદિભિઃ કૃતમ્ ॥ ૨૯॥

પૂજનીયા સદા દેવી સર્વૈર્નાગરિકૈર્જનૈઃ ।
માનનીયા શિવા શક્તિઃ સર્વકામાર્થસિદ્ધિદા ॥ ૩૦॥

ઇત્યુક્ત્વા મન્ત્રિણસ્તે તુ ચક્રુર્વૈ રાજશાસનમ્ ।
પ્રાસાદં કારયામાસુઃ શિલ્પિભિઃ સુમનોરમમ્ ॥ ૩૧॥

પ્રતિમાં કારયિત્વાઽથ મુહૂર્તેઽથ શુભે દિને ।
દ્વિજાનાહૂય વેદજ્ઞાન્સ્થાપયામાસ ભૂપતિઃ ॥ ૩૨॥

હવનં વિધિવત્કૃત્વા પૂજયિત્વાઽથ દેવતામ્ ।
પ્રાસાદે મતિમાન્ દેવ્યાઃ સ્થાપયામાસ ભૂમિપઃ ॥ ૩૩॥

ઉત્સવસ્તત્ર સંવૃત્તો વાદિત્રાણાઞ્ચ નિઃસ્વનૈઃ ।
બ્રાહ્મણાનાં વેદઘોષૈર્ગાનૈસ્તુ વિવિધૈર્નૃપ ॥ ૩૪॥

વ્યાસ ઉવાચ ।
પ્રતિષ્ઠાપ્ય શિવાં દેવીં વિધિવદ્વેદવાદિભિઃ ।
પૂજાં નાનાવિધાં રાજા ચકારાતિવિધાનતઃ ॥ ૩૫॥

કૃત્વા પૂજાવિધિં રાજા રાજ્યં પ્રાપ્ય સ્વપૈતૃકમ્ ।
વિખ્યાતશ્ચામ્બિકા દેવી કોસલેષુ બભૂવ હ ॥ ૩૬॥

રાજ્યં પ્રાપ્ય નૃપઃ સર્વં સામન્તકનૃપાનથ ।
વશે ચક્રેઽતિધર્મિષ્ઠાન્સદ્ધર્મવિજયી નૃપઃ ॥ ૩૭॥

યથા રામઃ સ્વરાજ્યેઽભૂદ્દિલીપસ્ય રઘુર્યથા ।
પ્રજાનાં વૈ સુખં તદ્વન્મર્યાદાઽપિ તથાઽભવત્ ॥ ૩૮॥

ધર્મો વર્ણાશ્રમાણાં ચ ચતુષ્પાદભવત્તથા ।
નાધર્મે રમતે ચિત્તં કેષામપિ મહીતલે ॥ ૩૯॥

ગ્રામે ગ્રામે ચ પ્રાસાદાંશ્ચક્રુઃ સર્વે જનાધિપાઃ ।
દેવ્યાઃ પૂજા તદા પ્રીત્યા કોસલેષુ પ્રવર્તિતા ॥ ૪૦॥

સુબાહુરપિ કાશ્યાં તુ દુર્ગાયાઃ પ્રતિમાં શુભામ્ ।
કારયિત્વા ચ પ્રાસાદં સ્થાપયામાસ ભક્તિતઃ ॥ ૪૧॥

તત્ર તસ્યા જનાઃ સર્વે પ્રેમભક્તિપરાયણાઃ ।
પૂજાં ચક્રુર્વિધાનેન યથા વિશ્વેશ્વરસ્ય હ ॥ ૪૨॥

વિખ્યાતા સા બભૂવાથ દુર્ગાદેવી ધરાતલે ।
દેશે દેશે મહારાજ તસ્યા ભક્તિર્વ્યવર્ધત ॥ ૪૩॥

સર્વત્ર ભારતે લોકે સર્વવર્ણેષુ સર્વથા ।
ભજનીયા ભવાની તુ સર્વેષામભવત્તદા ॥ ૪૪॥

શક્તિભક્તિરતાઃ સર્વે માનિનશ્ચાભવન્નૃપ ।
આગમોક્તૈરથ સ્તોત્રૈર્જપધ્યાનપરાયણાઃ ॥ ૪૫॥

નવરાત્રેષુ સર્વેષુ ચક્રુઃ સર્વે વિધાનતઃ ।
અર્ચનં હવનં યાગં દેવ્યા ભક્તિપરા જનાઃ ॥ ૪૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે દેવીસ્થાપનવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૩.૨૫॥

## ૩.૨૬ ષડ્વિંશોઽધ્યાયઃ । કુમારીપૂજાવર્ણનમ્ ।

જનમેજય ઉવાચ ।
નવરાત્રે તુ સમ્પ્રાપ્તે કિં કર્તવ્યં દ્વિજોત્તમ ।
વિધાનં વિધિવદ્બ્રૂહિ શરત્કાલે વિશેષતઃ ॥ ૧॥

કિં ફલં ખલુ કસ્તત્ર વિધિઃ કાર્યો મહામતે ।
એતદ્વિસ્તરતો બ્રૂહિ કૃપયા દ્વિજસત્તમ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ ૃણુ રાજન્પ્રવક્ષ્યામિ નવરાત્રવ્રતં શુભમ્ ।
શરત્કાલે વિશેષેણ કર્તવ્યં વિધિપૂર્વકમ્ ॥ ૩॥

વસન્તે ચ પ્રકર્તવ્યં તથૈવ પ્રેમપૂર્વકમ્ ।
દ્વાવૃતૂ યમદંષ્ટ્રાખ્યૌ નૂનં સર્વજનેષુ વૈ ॥ ૪॥

શરદ્વસન્તનામાનૌ દુર્ગમૌ પ્રાણિનામિહ ।
તસ્માદ્યત્નાદિદં કાર્યં સર્વત્ર શુભમિચ્છતા ॥ ૫॥

દ્વાવેવ સુમહાઘોરાવૃતૂ રોગકરૌ નૃણામ્ ।
વસન્તશરદાવેવ સર્વનાશકરાવુભૌ ॥ ૬॥

તસ્માત્તત્ર પ્રકર્તવ્યં ચણ્ડિકાપૂજનં બુધૈઃ ।

ચૈત્રાશ્વિને શુભે માસે ભક્તિપૂર્વં નરાધિપ ॥ ૭॥

અમાવાસ્યાં ચ સમ્પ્રાપ્ય સમ્ભારં કલ્પયેચ્છુભમ્ ।
હવિષ્યં ચાશનં કાર્યમેકભુક્તં તુ તદ્દિને ॥ ૮॥

મણ્ડપસ્તુ પ્રકર્તવ્યઃ સમે દેશે શુભે સ્થલે ।
હસ્તષોડશમાનેન સ્તમ્ભધ્વજસમન્વિતઃ ॥ ૯॥

ગૌરમૃદ્ગોમયાભ્યાં ચ લેપનં કારયેત્તતઃ ।
તન્મધ્યે વેદિકા શુભ્રા કર્તવ્યા ચ સમા સ્થિરા ॥ ૧૦॥

ચતુર્હસ્તા ચ હસ્તોચ્છ્રા પીઠાર્થં સ્થાનમુત્તમમ્ ।
તોરણાનિ વિચિત્રાણિ વિતાનઞ્ચ પ્રકલ્પયેત્ ॥ ૧૧॥

રાત્રૌ દ્વિજાનથામન્ત્ર્ય દેવીતત્ત્વવિશારદાન્ ।
આચારનિરતાન્દાન્તાન્વેદવેદાઙ્ગપારગાન્ ॥ ૧૨॥

પ્રતિપદ્દિવસે કાર્યં પ્રાતઃસ્નાનં વિધાનતઃ ।
નદ્યાં નદે તડાગે વા વાપ્યાં કૂપે ગૃહેઽથવા ॥ ૧૩॥

પ્રાતર્નિત્યં પુરઃ કૃત્વા દ્વિજાનાં વરણં તતઃ ।
અર્ઘ્યપાદ્યાદિકં સર્વં કર્તવ્યં મધુપૂર્વકમ્ ॥ ૧૪॥

વસ્ત્રાલઙ્કરણાદીનિ દેયાનિ ચ સ્વશક્તિતઃ ।
વિત્તશાઠ્યં ન કર્તવ્યં વિભવે સતિ કર્હિચિત્ ॥ ૧૫॥

વિપ્રૈઃ સન્તોષિતૈઃ કાર્યં સમ્પૂર્ણં સર્વથા ભવેત્ ।
નવ પઞ્ચ ત્રયશ્ચૈકો દેવ્યાઃ પાઠે દ્વિજાઃ સ્મૃતાઃ ॥ ૧૬॥

વરયેદ્બ્રાહ્મણં શાન્તં પારાયણકૃતે તદા ।
સ્વસ્તિવાચનકં કાર્યં વેદમન્ત્રવિધાનતઃ ॥ ૧૭॥

વેદ્યાં સિંહાસનં સ્થાપ્ય ક્ષૌમવસ્ત્રસમન્વિતમ્ ।
તત્ર સ્થાપ્યાઽમ્બિકા દેવી ચતુર્હસ્તાયુધાન્વિતા ॥ ૧૮॥

રત્નભૂષણસંયુક્તા મુક્તાહારવિરાજિતા ।
દિવ્યામ્બરધરા સૌમ્યા સર્વલક્ષણસંયુતા ॥ ૧૯॥

શઙ્ખચક્રગદાપદ્મધરા સિંહે સ્થિતા શિવા ।
અષ્ટાદશભુજા વાઽપિ પ્રતિષ્ઠાપ્યા સનાતની ॥ ૨૦॥

અર્ચાભાવે તથા યન્ત્રં નવાર્ણમન્ત્રસંયુતમ્ ।
સ્થાપયેત્પીઠપૂજાર્થં કલશં તત્ર પાર્શ્વતઃ ॥ ૨૧॥

પઞ્ચપલ્લવસંયુક્તં વેદમન્ત્રૈઃ સુસંસ્કૃતમ્ ।
સુતીર્થજલસમ્પૂર્ણં હેમરત્નૈઃ સમન્વિતમ્ ॥ ૨૨॥

પાર્શ્વે પૂજાર્થસમ્ભારાન્પરિકલ્પ્ય સમન્તતઃ ।
ગીતવાદિત્રનિર્ઘોષાન્કારયેન્મઙ્ગલાય વૈ ॥ ૨૩॥

તિથૌ હસ્તાન્વિતાયાં ચ નન્દાયાં પૂજનં વરમ્ ।
પ્રથમે દિવસે રાજન્ વિધિવત્કામદં નૃણામ્ ॥ ૨૪॥

નિયમં પ્રથમં કૃત્વા પશ્ચાત્પૂજાં સમાચરેત્ ।
ઉપવાસેન નક્તેન ચૈકભુક્તેન વા પુનઃ ॥ ૨૫॥

કરિષ્યામિ વ્રતં માતર્નવરાત્રમનુત્તમમ્ ।
સાહાય્યં કુરુ મે દેવિ જગદમ્બ મમાખિલમ્ ॥ ૨૬॥

યથાશક્તિ પ્રકર્તવ્યો નિયમો વ્રતહેતવે ।
પશ્ચાત્પૂજા પ્રકર્તવ્યા વિધિવન્મન્ત્રપૂર્વકમ્ ॥ ૨૭॥

ચન્દનાગુરુકર્પૂરૈઃ કુસુમૈશ્ચ સુગન્ધિભિઃ ।
મન્દારકરજાશોકચમ્પકૈઃ કરવીરકૈઃ ॥ ૨૮॥

માલતીબ્રહ્મકાપુષ્પૈસ્તથા બિલ્વદલૈઃ શુભૈઃ ।
પૂજયેજ્જગતાં ધાત્રીં ધૂપૈર્દીપૈર્વિધાનતઃ ॥ ૨૯॥

ફલૈર્નાનાવિધૈરર્ઘ્યં પ્રદાતવ્યં ચ તત્ર વૈ ।
નારિકેલૈર્માતુલુઙ્ગૈર્દાડિમીકદલીફલૈઃ ॥ ૩૦॥

નારઙ્ગૈઃ પનસૈશ્ચૈવ તથા પૂર્ણફલૈઃ શુભૈઃ ।
અન્નદાનં પ્રકર્તવ્યં ભક્તિપૂર્વં નરાધિપ ॥ ૩૧॥

માંસાશનં યે કુર્વન્તિ તૈઃ કાર્યં પશુહિંસનમ્ ।
મહિષાજવરાહાણાં બલિદાનં વિશિષ્યતે ॥ ૩૨॥

દેવ્યગ્રે નિહતા યાન્તિ પશવઃ સ્વર્ગમવ્યયમ્ ।
ન હિંસા પશુજા તત્ર નિઘ્નતાં તત્કૃતેઽનઘ ॥ ૩૩॥

અહિંસા યાજ્ઞિકી પ્રોક્તા સર્વશાસ્ત્રવિનિર્ણયે ।
દેવતાર્થે વિસૃષ્ટાનાં પશૂનાં સ્વર્ગતિર્ધ્રુવા ॥ ૩૪॥

હોમાર્થં ચૈવ કર્તવ્યં કુણ્ડં ચૈવ ત્રિકોણકમ્ ।
સ્થણ્ડિલં વા પ્રકર્તવ્યં ત્રિકોણં માનતઃ શુભમ્ ॥ ૩૫॥

ત્રિકાલં પૂજનં નિત્યં નાનાદ્રવ્યૈર્મનોહરૈઃ ।
ગીતવાદિત્રનૃત્યૈશ્ચ કર્તવ્યશ્ચ મહોત્સવઃ ॥ ૩૬॥

નિત્યં ભૂમૌ ચ શયનં કુમારીણાં ચ પૂજનમ્ ।
વસ્ત્રાલઙ્કરણૈર્દિવ્યૈર્ભોજનૈશ્ચ સુધામયૈઃ ॥ ૩૭॥

એકૈકાં પૂજયેન્નિત્યમેકવૃદ્ધ્યા તથા પુનઃ ।
દ્વિગુણં ત્રિગુણં વાઽપિ પ્રત્યેકં નવકં ચ વા ॥ ૩૮॥

વિભવસ્યાનુસારેણ કર્તવ્યં પૂજનં કિલ ।
વિત્તશાઠ્યં ન કર્તવ્યં રાજઞ્છક્તિમખે સદા ॥ ૩૯॥

એકવર્ષા ન કર્તવ્યા કન્યા પૂજાવિધૌ નૃપ ।
પરમજ્ઞા તુ ભોગાનાં ગન્ધાદીનાં ચ બાલિકા ॥ ૪૦॥

કુમારિકા તુ સા પ્રોક્તા દ્વિવર્ષા યા ભવેદિહ ।
ત્રિમૂર્તિશ્ચ ત્રિવર્ષા ચ કલ્યાણી ચતુરબ્દિકા ॥ ૪૧॥

રોહિણી પઞ્ચવર્ષા ચ ષડ્વર્ષા કાલિકા સ્મૃતા ।
ચણ્ડિકા સપ્તવર્ષા સ્યાદષ્ટવર્ષા ચ શામ્ભવી ॥ ૪૨॥

નવવર્ષા ભવેદ્દુર્ગા સુભદ્રા દશવાર્ષિકી ।
અત ઊર્ધ્વં ન કર્તવ્યા સર્વકાર્યવિગર્હિતા ॥ ૪૩॥

એભિશ્ચ નામભિઃ પૂજા કર્તવ્યા વિધિસંયુતા ।
તાસાં ફલાનિ વક્ષ્યામિ નવાનાં પૂજને સદા ॥ ૪૪॥

કુમારી પૂજિતા કુર્યાદ્દુઃખદારિદ્ર્યનાશનમ્ ।
શત્રુક્ષયં ધનાયુષ્યં બલવૃદ્ધિં કરોતિ વૈ ॥ ૪૫॥

ત્રિમૂર્તિપૂજનાદાયુસ્ત્રિવર્ગસ્ય ફલં ભવેત્ ।
ધનધાન્યાગમશ્ચૈવ પુત્રપૌત્રાદિવૃદ્ધયઃ ॥ ૪૬॥

વિદ્યાર્થી વિજયાર્થી ચ રાજ્યાર્થી યશ્ચ પાર્થિવઃ ।
સુખાર્થી પૂજયેન્નિત્યં કલ્યાણીં સર્વકામદામ્ ॥ ૪૭॥

કાલિકાં શત્રુનાશાર્થં પૂજયેદ્ભક્તિપૂર્વકમ્ ।

ઐશ્વર્યધનકામશ્ચ ચણ્ડિકાં પરિપૂજયેત્ ॥ ૪૮॥

પૂજયેચ્છામ્ભવીં નિત્યં નૃપસમ્મોહનાય ચ ।
દુઃખદારિદ્ર્યનાશાય સઙ્ગ્રામે વિજયાય ચ ॥ ૪૯॥

ક્રૂરશત્રુવિનાશાર્થં તથોગ્રકર્મસાધને ।
દુર્ગાઞ્ચ પૂજયેદ્ભક્ત્યા પરલોકસુખાય ચ ॥ ૫૦॥

વાઞ્છિતાર્થસ્ય સિદ્ધ્યર્થં સુભદ્રાં પૂજયેત્સદા ।
રોહિણીં રોગનાશાય પૂજયેદ્વિધિવન્નરઃ ॥ ૫૧॥

શ્રીરસ્ત્વિતિ ચ મન્ત્રેણ પૂજયેદ્ભક્તિતત્પરઃ ।
શ્રીયુક્તમન્ત્રૈરથવા બીજમન્ત્રૈરથાપિ વા ॥ ૫૨॥

કુમારસ્ય ચ તત્ત્વાનિ યા સૃજત્યપિ લીલયા ।
કાદીનપિ ચ દેવાંસ્તાં કુમારીં પૂજયામ્યહમ્ ॥ ૫૩॥

સત્ત્વાદિભિસ્ત્રિમૂર્તિર્યા તૈર્હિ નાનાસ્વરૂપિણી ।
ત્રિકાલવ્યાપિની શક્તિસ્ત્રિમૂર્તિં પૂજયામ્યહમ્ ॥ ૫૪॥

કલ્યાણકારિણી નિત્યં ભક્તાનાં પૂજિતાઽનિશમ્ ।
પૂજયામિ ચ તાં ભક્ત્યા કલ્યાણીં સર્વકામદામ્ ॥ ૫૫॥

રોહયન્તી ચ બીજાનિ પ્રાગ્જન્મસઞ્ચિતાનિ વૈ ।
યા દેવી સર્વભૂતાનાં રોહિણીં પૂજયામ્યહમ્ ॥ ૫૬॥

કાલી કાલયતે સર્વં બ્રહ્માણ્ડં સચરાચરમ્ ।
કલ્પાન્તસમયે યા તાં કાલિકાં પૂજયામ્યહમ્ ॥ ૫૭॥

તાં ચણ્ડપાપહરણીં ચણ્ડિકાં પૂજયામ્યહમ્ ॥ ૫૮॥

અકારણાત્સમુત્પત્તિર્યન્મયૈઃ પરિકીર્તિતા ।
યસ્યાસ્તાં સુખદાં દેવીં શામ્ભવીં પૂજયામ્યહમ્ ॥ ૫૯॥

દુર્ગાત્ત્રાયતિ ભક્તં યા સદા દુર્ગાતિનાશિની ।
દુર્જ્ઞેયા સર્વદેવાનાં તાં દુર્ગાં પૂજયામ્યહમ્ ॥ ૬૦॥

સુભદ્રાણિ ચ ભક્તાનાં કુરુતે પૂજિતા સદા ।
અભદ્રનાશિનીં દેવીં સુભદ્રાં પૂજયામ્યહમ્ ॥ ૬૧॥

એભિર્મન્ત્રૈઃ પૂજનીયાઃ કન્યકાઃ સર્વદા બુધૈઃ ।

વસ્ત્રાલઙ્કરણૈર્માલ્યૈર્ગન્ધૈરુચ્ચાવચૈરપિ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે કુમારીપૂજાવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૩.૨૬॥

## ૩.૨૭ સપ્તવિંશોઽધ્યાયઃ । દેવીપૂજામહત્ત્વવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
હીનાઙ્ગીં વર્જયેત્કન્યાં કુષ્ઠયુક્તાં વ્રણાઙ્કિતામ્ ।
ગન્ધસ્ફુરિતહીનાઙ્ગીં વિશાલકુલસમ્ભવામ્ ॥ ૧॥

જાત્યન્ધાં કેકરાં કાણાં કુરૂપાં બહુરોમશામ્ ।
સન્ત્યજેદ્રોગિણીં કન્યાં રક્તપુષ્પાદિનાઙ્કિતામ્ ॥ ૨॥

ક્ષામાં ગર્ભસમુદ્ભૂતાં ગોલકાં કન્યકોદ્ભવામ્ ।
વર્જનીયાઃ સદા ચૈતાઃ સર્વપૂજાદિકર્મસુ ॥ ૩॥

અરોગિણીં સુરૂપાઙ્ગીં સુન્દરીં વ્રણવર્જિતામ્ ।
એકવંશસમુદ્ભૂતાં કન્યાં સમ્યક્પ્રપૂજયેત્ ॥ ૪॥

બ્રાહ્મણી સર્વકાર્યેષુ જયાર્થે નૃપવંશજા ।
લાભાર્થે વૈશ્યવંશોત્થા મતા વા શૂદ્રવંશજા ॥ ૫॥

બ્રાહ્મણૈર્બ્રહ્મજાઃ પૂજ્યા રાજન્યૈર્બ્રહ્મવંશજાઃ ।
વૈશ્યૈસ્ત્રિવર્ગજાઃ પૂજ્યાશ્ચતસ્રઃ પાદસમ્ભવૈઃ ॥ ૬॥

કારુભિશ્ચૈવ વંશોત્થા યથાયોગ્યં પ્રપૂજયેત્ ।
નવરાત્રવિધાનેન ભક્તિપૂર્વં સદૈવ હિ ॥ ૭॥

અશક્તો નિયતં પૂજાં કર્તુઞ્ચેન્નવરાત્રકે ।
અષ્ટમ્યાં ચ વિશેષેણ કર્તવ્યં પૂજનં સદા ॥ ૮॥

પુરાઽષ્ટમ્યાં ભદ્રકાલી દક્ષયજ્ઞવિનાશિની ।
પ્રાદુર્ભૂતા મહાઘોરા યોગિની કોટિભિઃ સહ ॥ ૯॥

અતોઽષ્ટમ્યાં વિશેષેણ કર્તવ્યં પૂજનં સદા ।
નાનાવિધોપહારૈશ્ચ ગન્ધમાલ્યાનુલેપનૈઃ ॥ ૧૦॥

પાયસૈરામિષૈર્હોમૈર્બ્રાહ્મણાનાં ચ ભોજનૈઃ ।
ફલપુષ્પોપહારૈશ્ચ તોષયેજ્જગદમ્બિકામ્ ॥ ૧૧॥

ઉપવાસે હ્યશક્તાનાં નવરાત્રવ્રતે પુનઃ ।
ઉપોષણત્રયં પ્રોક્તં યથોક્તફલદં નૃપ ॥ ૧૨॥

સપ્તમ્યાં ચ તથાઽષ્ટમ્યાં નવમ્યાં ભક્તિભાવતઃ ।
ત્રિરાત્રકરણાત્સર્વં ફલં ભવતિ પૂજનાત્ ॥ ૧૩॥

પૂજાભિશ્ચૈવ હોમૈશ્ચ કુમારિપૂજનૈસ્તથા ।
સમ્પૂર્ણં તદ્વ્રતં પ્રોક્તં વિપ્રાણાં ચૈવ ભોજનૈઃ ॥ ૧૪॥

વ્રતાનિ યાનિ ચાન્યાનિ દાનાનિ વિવિધાનિ ચ ।
નવરાત્રવ્રતસ્યાસ્ય નૈવ તુલ્યાનિ ભૂતલે ॥ ૧૫॥

ધનધાન્યપ્રદં નિત્યં સુખસન્તાનવૃદ્ધિદમ્ ।
આયુરારોગ્યદં ચૈવ સ્વર્ગદં મોક્ષદં તથા ॥ ૧૬॥

વિદ્યાર્થી વા ધનાર્થી વા પુત્રાર્થી વા ભવેન્નરઃ ।
તેનેદં વિધિવત્કાર્યં વ્રતં સૌભાગ્યદં શિવમ્ ॥ ૧૭॥

વિદ્યાર્થી સર્વવિદ્યાં વૈ પ્રાપ્નોતિ વ્રતસાધનાત્ ।
રાજભ્રષ્ટો નૃપો રાજ્યં સમવાપ્નોતિ સર્વદા ॥ ૧૮॥

પૂર્વજન્મનિ યૈર્નૂનં ન કૃતં વ્રતમુત્તમમ્ ।
તે વ્યાધિનો દરિદ્રાશ્ચ ભવન્તિ પુત્રવર્જિતાઃ ॥ ૧૯॥

વન્ધ્યા ચ યા ભવેન્નારી વિધવા ધનવર્જિતા ।
અનુમા તત્ર કર્તવ્યા નેયં કૃતવતી વ્રતમ્ ॥ ૨૦॥

નવરાત્રવ્રતં પ્રોક્તં ન કૃતં યેન ભૂતલે ।
સ કથં વિભવં પ્રાપ્ય મોદતે ચ તથા દિવિ ॥ ૨૧॥

રક્તચન્દનસમ્મિશ્રૈઃ કોમલૈર્બિલ્વપત્રકૈઃ ।
ભવાની પૂજિતા યેન સ ભવેન્નૃપતિઃ ક્ષિતૌ ॥ ૨૨॥

નારાધિતા યેન શિવા સનાતની
દુઃખાર્તિહા સિદ્ધિકરી જગદ્ધરા ।
દુઃખાવૃતઃ શત્રુયુતશ્ચ ભૂતલે
નૂનં દરિદ્રો ભવતીહ માનવઃ ॥ ૨૩॥

યાં વિષ્ણુરિન્દ્રો હરપદ્મજૌ તથા

વહ્નિઃ કુબેરો વરુણો દિવાકરઃ ।
ધ્યાયન્તિ સર્વાર્થસમાપ્તિનન્દિતા-
સ્તાં કિં મનુષ્યા ન ભજન્તિ ચણ્ડિકામ્ ॥ ૨૪॥

સ્વાહા સ્વધા નામ મનુપ્રભાવૈ-
સ્તૃપ્યન્તિ દેવાઃ પિતરસ્તથૈવ ।
યજ્ઞેષુ સર્વેષુ મુદા હરન્તિ
યન્નામ યુગ્મશ્રુતિભિર્મુનીન્દ્રાઃ ॥ ૨૫॥

યસ્યેચ્છયા સૃજતિ વિશ્વમિદં પ્રજેશો
નાનાવતારકલનં કુરુતે હરિશ્ચ ।
નૂનં કરોતિ જગતઃ કિલ ભસ્મ શમ્ભુ-
સ્તાં શર્મદાં ન ભજતે નુ કથં મનુષ્યઃ ॥ ૨૬॥

નૈકોઽસ્તિ સર્વભુવનેષુ તયા વિહીનો
દેવો નરોઽથ વિહગઃ કિલ પન્નગો વા ।
ગન્ધર્વરાક્ષસપિશાચનગેષુ નૂનં
યઃ સ્પન્દિતું ભવતિ શક્તિયુતો યથેચ્છમ્ ॥ ૨૭॥

તાં ન સેવેત કશ્ચણ્ડીં સર્વકામાર્થદાં શિવામ્ ।
વ્રતં તસ્યા ન કઃ કુર્યાદ્વાઞ્છન્નર્થચતુષ્ટયમ્ ॥ ૨૮॥

મહાપાતકસંયુક્તો નવરાત્રવ્રતં ચરેત્ ।
મુચ્યતે સર્વપાપેભ્યો નાત્ર કાર્યા વિચારણા ॥ ૨૯॥

પુરા કશ્ચિદ્વણિગ્દીનો ધનહીનઃ સુદુઃખિતઃ ।
કુટુમ્બી ચાભવત્કશ્ચિત્ કોસલે નૃપસત્તમ ॥ ૩૦॥

અપત્યાનિ બહૂન્યસ્યાભવન્ક્ષુત્પીડિતાનિ ચ ।
ભક્ષ્યં કિઞ્ચિત્તુ સાયાહ્ને પ્રાપુસ્તસ્ય ચ બાલકાઃ ॥ ૩૧॥

ભુઙ્ક્તે સ્મ કાર્યકર્તાઽસૌ પરસ્યાથ બુભુક્ષિતઃ ।
કુટુમ્બભરણં તત્ર ચકારાતિનિરાકુલઃ ॥ ૩૨॥

સદા ધર્મરતઃ શાન્તઃ સદાચારશ્ચ સત્યવાક્ ।
અક્રોધનશ્ચ ધૃતિમાન્નિર્મદશ્ચાનસૂયકઃ ॥ ૩૩॥

સમ્પૂજ્ય દેવતા નિત્યં પિતૄનપ્યતિથીંસ્તથા ।
ભુઞ્જાને પોષ્યવર્ગેઽથ કૃતવાન્ભોજનં વણિક્ ॥ ૩૪॥

એવં ગચ્છતિ કાલે વૈ સુશિલો નામતો ગુણૈઃ ।
દારિદ્ર્યાર્તો દ્વિજં શાન્તં પપ્રચ્છાતિબુભુક્ષિતઃ ॥ ૩૫॥

સુશીલ ઉવાચ ।
ભો ભૂદેવ કૃપાં કૃત્વા વદસ્વાદ્ય મહામતે ।
કથં દારિદ્ર્યનાશઃ સ્યાદિતિ મે નિશ્ચયેન વૈ ॥ ૩૬॥

ધનૈષણા મે નૈવાસ્તિ ધની સ્યામિતિ માનદ ।
કુટુમ્બભરણાર્થં વૈ પૃચ્છામિ ત્વાં દ્વિજોત્તમ ॥ ૩૭॥

પુત્રી સુતસ્તુ મે બાલો ભક્ષાર્થી રોદતે ભૃશમ્ ।
તાવન્માત્રં ગૃહે નાન્નં મુષ્ટિમેકાં દદામ્યહમ્ ॥ ૩૮॥

વિસર્જિતો યતો ગેહાદ્ગતો બાલો રુદન્મયા ।
અતો મે દહ્યતેઽત્યર્થં કિં કરોમિ ધનં વિના ॥ ૩૯॥

વિવાહોઽસ્તિ સુતાયા મે નાસ્તિ વિત્તં કરોમિ કિમ્ ।
દશવર્ષાધિકાયાસ્તુ દાનકાલોઽપિ યાત્યલમ્ ॥ ૪૦॥

તેન શોચામિ વિપ્રેન્દ્ર સર્વજ્ઞોઽસિ દયાનિધે ।
તપો દાનં વ્રતં કિઞ્ચિદ્બ્રૂહિ મન્ત્રજપં તથા ॥ ૪૧॥

યેનાહં પોષ્યવર્ગસ્ય કરોમિ દ્વિજ પોષણમ્ ।
તાવન્મે સ્યાદ્ધનપ્રાપ્તિર્નાધિકં પ્રાર્થયે કિલ ॥ ૪૨॥

ત્વત્પ્રસાદાત્કુટુમ્બં મે સુખિતં પ્રભવેદિહ ।
તત્કુરુષ્વ મહાભાગ જ્ઞાનેન પરિચિન્ત્ય ચ ॥ ૪૩॥

વ્યાસ ઉવાચ ।
ઇતિ પૃષ્ટસ્તથા તેન બ્રાહ્મણઃ સંશિતવ્રતઃ ।
ઉવાચ પરમપ્રીતસ્તં વૈશ્યં નૃપસત્તમ ॥ ૪૪॥

વૈશ્યવર્ય કુરુષ્વાદ્ય નવરાત્રવ્રતં શુભમ્ ।
પૂજનં ભગવત્યાશ્ચ હવનં ભોજનં તથા ॥ ૪૫॥

વેદપારાયણં શક્તિજપહોમાદિકં તથા ।
કુરુષ્વાદ્ય યથાશક્તિ તવ કાર્યં ભવિષ્યતિ ॥ ૪૬॥

એતસ્માદપરં કિઞ્ચિદ્વ્રતં નાસ્તિ ધરાતલે ।

નવરાત્રાભિધં વૈશ્ય પાવનં સુખદં તથા ॥ ૪૭॥

જ્ઞાનદં મોક્ષદં ચૈવ સુખસન્તાનવર્ધનમ્ ।
શત્રુનાશકરં કામં નવરાત્રવ્રતં સદા ॥ ૪૮॥

રાજ્યભ્રષ્ટેન રામેણ સીતાવિરહિતેન ચ ।
કિષ્કિન્ધાયાં વ્રતં ચૈતત્કૃતં દુઃખાતુરેણ વૈ ॥ ૪૯॥

પ્રતપ્તેનાપિ રામેણ સીતાવિરહવહ્નિના ।
વિધિવત્પૂજિતા દેવી નવરાત્રવ્રતેન વૈ ॥ ૫૦॥

તેન પ્રાપ્તાઽથ વૈદેહી કૃત્વા સેતું મહાર્ણવે ।
હત્વા મન્દોદરીનાથં કુમ્ભકર્ણં મહાબલમ્ ॥ ૫૧॥

મેઘનાદં સુતં હત્વા કૃત્વા ભૂપં બિભીષણમ્ ।
પશ્ચાદયોધ્યામાગત્ય પ્રાપ્તં રાજ્યમકણ્ટકમ્ ॥ ૫૨॥

નવરાત્રવ્રતસ્યાસ્ય પ્રભાવેણ વિશાંવર ।
સુખં ભૂમિતલે પ્રાપ્તં રામેણામિતતેજસા ॥ ૫૩॥

વ્યાસ ઉવાચ ।
ઇતિ વિપ્રવચઃ શ્રુત્વા સ વૈશ્યસ્તં દ્વિજં ગુરુમ્ ।
કૃત્વા જગ્રાહ સન્મન્ત્રં માયાબીજાભિધં નૃપ ॥ ૫૪॥

જજાપ પરયા ભક્ત્યા નવરાત્રમતન્દ્રિતઃ ।
નાનાવિધોપહારૈશ્ચ પૂજયામાસ સાદરમ્ ॥ ૫૫॥

નવસંવત્સરં ચૈવ માયાબીજપરાયણઃ ।
નવમે વત્સરાન્તે તુ મહાષ્ટમ્યાં મહેશ્વરી ॥ ૫૬॥

અર્ધરાત્રે તુ સઞ્જાતે પ્રત્યક્ષં દર્શનં દદૌ ।
નાનાવરપ્રદાનૈશ્ચ કૃતકૃત્યઞ્ચકાર તમ્ ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે દેવીપૂજામહત્ત્વવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૩.૨૭॥

## ૩.૨૮ અષ્ટાવિંશોઽધ્યાયઃ । રામચરિત્રવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કથં રામેણ તચ્ચીર્ણં વ્રતં દેવ્યાઃ સુખપ્રદમ્ ।

રાજ્યભ્રષ્ટઃ કથં સોઽથ કથં સીતા હૃતા પુનઃ ॥ ૧॥

વ્યાસ ઉવાચ ।
રાજા દશરથઃ શ્રીમાનયોધ્યાધિપતિઃ પુરા ।
સૂર્યવંશધરશ્ચાસીદ્દેવબ્રાહ્મણપૂજકઃ ॥ ૨॥

ચત્વારો જજ્ઞિરે તસ્ય પુત્રા લોકેષુ વિશ્રુતાઃ ।
રામલક્ષ્મણશત્રુઘ્ના ભરતશ્ચેતિ નામતઃ ॥ ૩॥

રાજ્ઞઃ પ્રિયકરાઃ સર્વે સદૃશા ગુણરૂપતઃ ।
કૌસલ્યાયાઃ સુતો રામઃ કૈકેય્યા ભરતઃ સ્મૃતઃ ॥ ૪॥

સુમિત્રાતનયૌ જાતૌ યમલૌ દ્વૌ મનોહરૌ ।
તે જાતા વૈ કિશોરાશ્ચ ધનુર્બાણધરાઃ કિલ ॥ ૫॥

સૂનવઃ કૃતસંસ્કારા ભૂપતેઃ સુખવર્ધકાઃ ।
કૌશિકેન તદાઽઽગત્ય પ્રાર્થિતો રઘુનન્દનઃ ॥ ૬॥

રાઘવં મખરક્ષાર્થં સૂનું ષોડશવાર્ષિકમ્ ।
તસ્મૈ સોઽયં દદૌ રામં કૌશિકાય સલક્ષ્મણમ્ ॥ ૭॥

તૌ સમેત્ય મુનિં માર્ગે જગ્મતુશ્ચારુદર્શનૌ ।
તાટકા નિહતા માર્ગે રાક્ષસી ઘોરદર્શના ॥ ૮॥

રામેણૈકેન બાણેન મુનીનાં દુઃખદા સદા ।
યજ્ઞરક્ષા કૃતા તત્ર સુબાહુર્નિહતઃ શઠઃ ॥ ૯॥

મારીચોઽથ મૃતપ્રાયો નિક્ષિપ્તો બાણવેગતઃ ।
એવં કૃત્વા મહત્કર્મ યજ્ઞસ્ય પરિરક્ષણમ્ ॥ ૧૦॥

ગતાસ્તે મિથિલાં સર્વે રામલક્ષ્મણકૌશિકાઃ ।
અહલ્યા મોચિતા શાપાન્નિષ્પાપા સા કૃતાઽબલા ॥ ૧૧॥

વિદેહનગરે તૌ તુ જગ્મતુર્મુનિના સહ ।
બભઞ્જ શિવચાપઞ્ચ જનકેન પણીકૃતમ્ ॥ ૧૨॥

ઉપયેમે તતઃ સીતાં જાનકીઞ્ચ રમાંશજામ્ ।
લક્ષ્મણાય દદૌ રાજા પુત્રીમેકાં તથોર્મિલામ્ ॥ ૧૩॥

કુશધ્વજસુતે કન્યે પ્રાપતુર્ભ્રાતરાવુભૌ ।
તથા ભરતશત્રુઘ્નૌ સુશિલૌ શુભલક્ષણૌ ॥ ૧૪॥

એવં દારક્રિયાસ્તેષાં ભ્રાતૄણાં ચાભવન્નૃપ ।
ચતુર્ણાં મિથિલાયાં તુ યથાવિધિ વિધાનતઃ ॥ ૧૫॥

રાજ્યયોગ્યં સુતં દૃષ્ટ્વા રાજા દશરથસ્તદા ।
રાઘવાય ધુરં દાતું મનશ્ચક્રે નિજાય વૈ ॥ ૧૬॥

સમ્ભારં વિહિતં દૃષ્ટ્વા કૈકેયી પૂર્વકલ્પિતૌ ।
વરૌ સમ્પ્રાર્થયામાસ ભર્તારં વશવર્તિનમ્ ॥ ૧૭॥

રાજ્યં સુતાય ચૈકેન ભરતાય મહાત્મને ।
રામાય વનવાસઞ્ચ ચતુર્દશસમાસ્તથા ॥ ૧૮॥

રામસ્તુ વચનાત્તસ્યાઃ સીતાલક્ષ્મણસંયુતઃ ।
જગામ દણ્ડકારણ્યં રાક્ષસૈરુપસેવિતમ્ ॥ ૧૯॥

રાજા દશરથઃ પુત્રવિરહેણ પ્રપીડિતઃ ।
જહૌ પ્રાણાનમેયાત્મા પૂર્વશાપમનુસ્મરન્ ॥ ૨૦॥

ભરતઃ પિતરં દૃષ્ટ્વા મૃતં માતૃકૃતેન વૈ ।
રાજ્યમૃદ્ધં ન જગ્રાહ ભ્રાતુઃ પ્રિયચિકીર્ષયા ॥ ૨૧॥

પઞ્ચવટ્યાં વસન્ રામો રાવણાવરજાં વને ।
શૂર્પણખાં વિરૂપાં વૈ ચકારાતિસ્મરાતુરામ્ ॥ ૨૨॥

ખરાદયસ્તુ તાં દૃષ્ટ્વા છિન્નનાસાં નિશાચરાઃ ।
ચક્રુઃ સઙ્ગ્રામમતુલં રામેણામિતતેજસા ॥ ૨૩॥

સ જઘાન ખરાદીંશ્ચ દૈત્યાનતિબલાન્વિતાન્ ।
મુનીનાં હિતમન્વિચ્છન્ રામઃ સત્યપરાક્રમઃ ॥ ૨૪॥

ગત્વા શૂર્પણખા લઙ્કાં ખરદૂષણઘાતનમ્ ।
દૂષિતા કથયામાસ રાવણાય ચ રાઘવાત્ ॥ ૨૫॥

સોઽપિ શ્રુત્વા વિનાશં તં જાતઃ ક્રોધવશઃ ખલઃ ।
જગામ રથમારુહ્ય મારીચસ્યાશ્રમં તદા ॥ ૨૬॥

કૃત્વા હેમમૃગં નેતું પ્રેષયામાસ રાવણઃ ।
સીતાપ્રલોભનાર્થાય માયાવિનમસમ્ભવમ્ ॥ ૨૭॥

સોઽથ હેમમૃગો ભૂત્વા સીતાદૃષ્ટિપથં ગતઃ ।

માયાવી ચાતિચિત્રાઙ્ગશ્ચરન્પ્રબલમન્તિકે ॥ ૨૮॥

તં દૃષ્ટ્વા જાનકી પ્રાહ રાઘવં દૈવનોદિતા ।
ચર્માનયસ્વ કાન્તેતિ સ્વાધીનપતિકા યથા ॥ ૨૯॥

અવિચાર્યાથ રામોઽપિ તત્ર સંસ્થાપ્ય લક્ષ્મણમ્ ।
સશરં ધનુરાદાય યયૌ મૃગપદાનુગઃ ॥ ૩૦॥

સારઙ્ગોઽપિ હરિં દૃષ્ટ્વા માયાકોટિવિશારદઃ ।
દૃશ્યાદૃશ્યો બભૂવાથ જગામ ચ વનાન્તરમ્ ॥ ૩૧॥

મત્વા હસ્તગતં રામઃ ક્રોધાકૃષ્ટધનુઃ પુનઃ ।
જઘાન ચાતિતીક્ષ્ણેન શરેણ કૃત્રિમં મૃગમ્ ॥ ૩૨॥

સ હતોઽતિબલાત્તેન ચુક્રોશ ભૃશદુઃખિતઃ ।
હા લક્ષ્મણ હતોઽસ્મીતિ માયાવી નશ્વરઃ ખલઃ ॥ ૩૩॥

સ શબ્દસ્તુમુલસ્તાવજ્જાનક્યા સંશ્રુતસ્તદા ।
રાઘવસ્યેતિ સા મત્વા દીના દેવરમબ્રવીત્ ॥ ૩૪॥

ગચ્છ લક્ષ્મણ તૂર્ણં ત્વં હતોઽસૌ રઘુનન્દનઃ ।
ત્વામાહ્વયતિ સૌમિત્રે સાહાય્યં કુરુ સત્વરમ્ ॥ ૩૫॥

તત્રાહ લક્ષ્મણઃ સીતામમ્બ રામવધાદપિ ।
નાહં ગચ્છેઽદ્ય મુક્ત્વા ત્વામસહાયામિહાશ્રમે ॥ ૩૬॥

આજ્ઞા મે રાઘવસ્યાત્ર તિષ્ઠેતિ જનકાત્મજે ।
તદતિક્રમભીતોઽહં ન ત્યજામિ તવાન્તિકમ્ ॥ ૩૭॥

દૂરં વૈ રાઘવં દૃષ્ટ્વા વને માયાવિના કિલ ।
ત્યક્ત્વા ત્વાં નાધિગચ્છામિ પદમેકં શુચિસ્મિતે ॥ ૩૮॥

કુરુ ધૈર્યં ન મન્યેઽદ્ય રામં હન્તું ક્ષમં ક્ષિતૌ ।
નાહં ત્યક્ત્વા ગમિષ્યામિ વિલઙ્ઘ્ય રામભાષિતમ્ ॥ ।૩૯॥

વ્યાસ ઉવાચ ।
રુદતી સુદતી પ્રાહ તે તદા વિધિનોદિતા ।
અક્રૂરા વચનં ક્રૂરં લક્ષ્મણં શુભલક્ષણમ્ ॥ ૪૦॥

અહં જાનામિ સૌમિત્રે સાનુરાગં ચ માં પ્રતિ ।
પ્રેરિતં ભરતેનૈવ મદર્થમિહ સઙ્ગતમ્ ॥ ૪૧॥

નાહં તથાવિધા નારી સ્વૈરિણી કુહકાધમ ।
મૃતે રામે પતિં ત્વાં ન કર્તુમિચ્છામિ કામતઃ ॥ ૪૨॥

નાગમિષ્યતિ ચેદ્રામો જીવિતં સન્ત્યજામ્યહમ્ ।
વિના તેન ન જીવામિ વિધુરા દુઃખિતા ભૃશમ્ ॥ ૪૩॥

ગચ્છ વા તિષ્ઠ સૌમિત્રે ન જાનેઽહં તવેપ્સિતમ્ ।
ક્વ ગતં તેઽદ્ય સૌહાર્દં જ્યેષ્ઠે ધર્મરતે કિલ ॥ ૪૪॥

તચ્છ્રુત્વા વચનં તસ્યા લક્ષ્મણો દીનમાનસઃ ।
પ્રોવાચ રુદ્ધકણ્ઠસ્તુ તાં તદા જનકાત્મજામ્ ॥ ૪૫॥

કિમાત્થ ક્ષિતિજે વાક્યં મયિ ક્રૂરતરં કિલ ।
કિં વદસ્યત્યનિષ્ટં તે ભાવિ જાને ધિયા હ્યહમ્ ॥ ૪૬॥

ઇત્યુક્ત્વા નિર્યયૌ વીરસ્તાં ત્યક્ત્વા પ્રરુદન્ભૃશમ્ ।
અગ્રજસ્ય યયૌ પશ્યઞ્છોકાર્તઃ પૃથિવીપતે ॥ ૪૭॥

ગતેઽથ લક્ષ્મણે તત્ર રાવણઃ કપટાકૃતિઃ ।
ભિક્ષુવેષં તતઃ કૃત્વા પ્રવિવેશ તદાશ્રમે ॥ ૪૮॥

જાનકી તં યતિં મત્વા દત્ત્વાર્ઘ્યં વન્યમાદરાત્ ।
ભૈક્ષ્યં સમર્પયામાસ રાવણાય દુરાત્મને ॥ ૪૯॥

તાં પપ્રચ્છ સ દુષ્ટાત્મા નમ્રપૂર્વં મૃદુસ્વરમ્ ।
કાઽસિ પદ્મપલાશાક્ષિ વને ચૈકાકિની પ્રિયે ॥ ૫૦॥

પિતા કસ્તેઽથ વામોરુ ભ્રાતા કઃ કઃ પતિસ્તવ ।
મૂઢેવૈકાકિની ચાત્ર સ્થિતાઽસિ વરવર્ણિનિ ॥ ૫૧॥

નિર્જને વિપિને કિં ત્વં સૌધાર્હા ત્વમસિ પ્રિયે ।
ઉટજે મુનિપત્નીવદ્દેવકન્યાસમપ્રભા ॥ ૫૨॥

વ્યાસ ઉવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા પ્રત્યુવાચ વિદેહજા ।
દિવ્યં દિષ્ટ્યા યતિં જ્ઞાત્વા મન્દોદર્યાઃ પતિં તદા ॥ ૫૩॥

રાજા દશરથઃ શ્રીમાંશ્ચત્વારસ્તસ્ય વૈ સુતાઃ ।
તેષાં જ્યેષ્ઠઃ પતિર્મેઽસ્તિ રામનામેતિ વિશ્રુતઃ ॥ ૫૪॥

વિવાસિતોઽથ કૈકેય્યા કૃતે ભૂપતિના વરે ।
ચતુર્દશ સમા રામો વસતેઽત્ર સલક્ષ્મણઃ ॥ ૫૫॥

જનકસ્ય સુતા ચાહં સીતાનામ્નીતિ વિશ્રુતા ।
ભઙ્ક્ત્વા શૈવં ધનુઃ કામં રામેણાહં વિવાહિતા ॥ ૫૬॥

રામબાહુબલેનાત્ર વસામો નિર્ભયા વને ।
કાઞ્ચનં મૃગમાલોક્ય હન્તું મે નિર્ગતઃ પતિઃ ॥ ૫૭॥

લક્ષ્મણોઽપિ પુનઃ શ્રુત્વા રવં ભ્રાતુર્ગતોઽધુના ।
તયોર્બાહુબલાદત્ર નિર્ભયાઽહં વસામિ વૈ ॥ ૫૮॥

મયેદં કથિતં સર્વં વૃત્તાન્તં વનવાસકે ।
તેઽત્રાગત્યાર્હણાં તે વૈ કરિષ્યન્તિ યથાવિધિ ॥ ૫૯॥

યતિર્વિષ્ણુસ્વરૂપોઽસિ તસ્માત્ત્વં પૂજિતો મયા ।
આશ્રમો વિપિને ઘોરે કૃતોઽસ્તિ રક્ષસાં કુલે ॥ ૬૦॥

તસ્માત્ત્વાં પરિપૃચ્છામિ સત્યં બ્રૂહિ મમાગ્રતઃ ।
કોઽસિ ત્રિદણ્ડિરૂપેણ વિપિને ત્વં સમાગતઃ ॥ ૬૧॥

રાવણ ઉવાચ ।
લઙ્કેશોઽહં મરાલાક્ષિ શ્રીમાન્મન્દોદરીપતિઃ ।
ત્વત્કૃતે તુ કૃતં રૂપં મયેત્થં શોભનાકૃતે ॥ ૬૨॥

આગતોઽહં વરારોહે ભગિન્યા પ્રેરિતોઽત્ર વૈ ।
જનસ્થાને હતૌ શ્રુત્વા ભ્રાતરૌ ખરદૂષણૌ ॥ ૬૩॥

અઙ્ગીકુરુ નૃપં માં ત્વં ત્યક્ત્વા તં માનુષં પતિમ્ ।
હૃતરાજ્યં ગતશ્રીકં નિર્બલં વનવાસિનમ્ ॥ ૬૪॥

પટ્ટરાજ્ઞી ભવ ત્વં મે મન્દોદર્યુપરિ સ્ફુટમ્ ।
દાસોઽસ્મિ તવ તન્વઙ્ગિ સ્વામિની ભવ ભામિનિ ॥ ૬૫॥

જેતાઽહં લોકપાલાનાં પતામિ તવ પાદયોઃ ।
કરં ગૃહાણ મેઽદ્ય ત્વં સનાથં કુરુ જાનકિ ॥ ૬૬॥

પિતા તે યાચિતઃ પૂર્વં મયા વૈ ત્વત્કૃતેઽબલે ।
જનકો મામુવાચેત્થં પણબન્ધો મયા કૃતઃ ॥ ૬૭॥

રુદ્રચાપભયાન્નાહં સમ્પ્રાપ્તસ્તુ સ્વયંવરે ।

મનો મે સંસ્થિતં તાવન્નિમગ્નં વિરહાતુરમ્ ॥ ૬૮॥

વનેઽત્ર સંસ્થિતાં શ્રુત્વા પૂર્વાનુરાગમોહિતઃ ।
આગતોઽસ્મ્યસિતાપાઙ્ગિ સફલં કુરુ મે શ્રમમ્ ॥ ૬૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે રામચરિત્રવર્ણનં નામ અષ્ટાવિંશોઽધ્યાયઃ ॥ ૩.૨૮॥

## ૩.૨૯ એકોનત્રિંશોઽધ્યાયઃ । લક્ષ્મણકૃતરામશોકસાન્ત્વનમ્ ।

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય વચો દુષ્ટં જાનકી ભયવિહ્વલા ।
વેપમાના સ્થિરં કૃત્વા મનો વાચમુવાચ હ ॥ ૧॥

પૌલસ્ત્ય કિમસદ્વાક્યં ત્વમાત્થ સ્મરમોહિતઃ ।
નાહં વૈ સ્વૈરિણી કિન્તુ જનકસ્ય કુલોદ્ભવા ॥ ૨॥

ગચ્છ લઙ્કાં દશાસ્ય ત્વં રામ ત્વાં વૈ હનિષ્યતિ ।
મત્કૃતે મરણં તત્ર ભવિષ્યતિ ન સંશયઃ ॥ ૩॥

ઇત્યુક્ત્વા પર્ણશાલાયાં ગતા સા વહ્નિસન્નિધૌ ।
ગચ્છ ગચ્છેતિ વદતી રાવણં લોકરાવણમ્ ॥ ૪॥

સોઽથ કૃત્વા નિજં રૂપં જગામોટજમન્તિકમ્ ।
બલાજ્જગ્રાહ તાં બાલાં રુદતી ભયવિહ્વલામ્ ॥ ૫॥

રામરામેતિ ક્રન્દન્તી લક્ષ્મણેતિ મુહુર્મુહુઃ ।
ગૃહીત્વા નિર્ગતઃ પાપો રથમારોપ્ય સત્વરઃ ॥ ૬॥

ગચ્છન્નરુણપુત્રેણ માર્ગે રુદ્ધો જટાયુષા ।
સઙ્ગ્રામોઽભૂન્મહારૌદ્રસ્તયોસ્તત્ર વનાન્તરે ॥ ૭॥

હત્વા તં તાં ગૃહીત્વા ચ ગતોઽસૌ રાક્ષસાધિપઃ ।
લઙ્કાયાં ક્રન્દતી તાત કુરરીવ દુરાત્મનઃ ॥ ૮॥

અશોકવનિકાયાં સા સ્થાપિતા રાક્ષસીયુતા ।
સ્વવૃત્તાન્નૈવ ચલિતા સામદાનાદિભિઃ કિલ ॥ ૯॥

રામોઽપિ તં મૃગં હત્વા જગામાદાય નિર્વૃતઃ ।
આયાન્તં લક્ષ્મણં વીક્ષ્ય કિં કૃતં તેઽનુજાસમમ્ ॥ ૧૦॥

એકાકિનીં પ્રિયાં હિત્વા કિમર્થં ત્વમિહાગતઃ ।
શ્રુત્વા સ્વનં તુ પાપસ્ય રાઘવસ્ત્વબ્રવીદિદમ્ ॥ ૧૧॥

સૌમિત્રિસ્ત્વબ્રવીદ્વાક્યં સીતાવાગ્બાણપીડિતઃ ।
પ્રભોઽત્રાહં સમાયાતઃ કાલયોગાન્ન સંશયઃ ॥ ૧૨॥

તદા તૌ પર્ણશાલાયાં ગત્વા વીક્ષ્યાતિદુઃખિતૌ ।
જાનક્યન્વેષણે યત્નમુભૌ કર્તું સમુદ્યતૌ ॥ ૧૩॥

માર્ગમાણૌ તુ સમ્પ્રાપ્તૌ યત્રાસૌ પતિતઃ ખગઃ ।
જટાયુઃ પ્રાણશેષસ્તુ પતિતઃ પૃથિવીતલે ॥ ૧૪॥

તેનોક્તં રાવણેનાદ્ય હૃતાઽસૌ જનકાત્મજા ।
મયા નિરુદ્ધઃ પાપાત્મા પાતિતોઽહં મૃધે પુનઃ ॥ ૧૫॥

ઇત્યુક્ત્વાઽસૌ ગતપ્રાણઃ સંસ્કૃતો રાઘવેણ વૈ ।
કૃત્વૌર્ધ્વદૈહિકં રામલક્ષ્મણૌ નિર્ગતૌ તતઃ ॥ ૧૬॥

કબન્ધં ઘાતયિત્વાસૌ શાપાચ્ચામોચયત્પ્રભુઃ ।
વચનાત્તસ્ય હરિણા સખ્યં ચક્રેઽથ રાઘવઃ ॥ ૧૭॥

હત્વા ચ વાલિનં વીરં કિષ્કિન્ધારાજ્યમુત્તમમ્ ।
સુગ્રીવાય દદૌ રામઃ કૃતસખ્યાય કાર્યતઃ ॥ ૧૮॥

તત્રૈવ વાર્ષિકાન્માસાંસ્તસ્થૌ લક્ષ્મણસંયુતઃ ।
ચિન્તયઞ્જાનકીં ચિત્તે દશાનનહૃતાં પ્રિયામ્ ॥ ૧૯॥

લક્ષ્મણં પ્રાહ રામસ્તુ સીતાવિરહપીડિતઃ ।
સૌમિત્રે કૈકયસુતા જાતા પૂર્ણમનોરથા ॥ ૨૦॥

ન પ્રાપ્તા જાનકી નૂનં નાહં જીવામિ તાં વિના ।
નાગમિષ્યામ્યયોધ્યાયામૃતે જનકનન્દિનીમ્ ॥ ૨૧॥

ગતં રાજ્યં વને વાસો મૃતસ્તાતો હૃતા પ્રિયા ।
પીડયન્માં સ દુષ્ટાત્મા દૈવોઽગ્રે કિં કરિષ્યતિ ॥ ૨૨॥

દુર્જ્ઞેયં ભવિતવ્યં હિ પ્રાણિનાં ભરતાનુજ ।
આવયોઃ કા ગતિસ્તાત ભવિષ્યતિ સુદુઃખદા ॥ ૨૩॥

પ્રાપ્ય જન્મ મનોર્વંશે રાજપુત્રાવુભૌ કિલ ।

વનેઽતિદુઃખભોક્તારૌ જાતૌ પૂર્વકૃતેન ચ ॥ ૨૪॥

ત્યક્ત્વા ત્વમપિ ભોગાંસ્તુ મયા સહ વિનિર્ગતઃ ।
દૈવયોગાચ્ચ સૌમિત્રે ભુઙ્ક્ષ્વ દુઃખં દુરત્યયમ્ ॥ ૨૫॥

ન કોઽપ્યસ્મત્કુલે પૂર્વં મત્સમો દુઃખભાઙ્નરઃ ।
અકિઞ્ચનોઽક્ષમઃ ક્લિષ્ટો ન ભૂતો ન ભવિષ્યતિ ॥ ૨૬॥

કિં કરોમ્યદ્ય સૌમિત્રે મગ્નોઽસ્મિ દુઃખસાગરે ।
ન ચાસ્તિ તરણોપાયો હ્યસહાયસ્ય મે કિલ ॥ ૨૭॥

ન વિત્તં ન બલં વીર ત્વમેકઃ સહચારકઃ ।
કોપં કસ્મિન્કરોમ્યદ્ય ભોગેસ્મિન્સ્વકૃતેઽનુજ ॥ ૨૮॥

ગતં હસ્તગતં રાજ્યં ક્ષણાદિન્દ્રાસનોપમમ્ ।
વને વાસસ્તુ સમ્પ્રાપ્તઃ કો વેદ વિધિનિર્મિતમ્ ॥ ૨૯॥

બાલભાવાચ્ચ વૈદેહી ચલિતા ચાવયોઃ સહ ।
નીતા દૈવેન દુષ્ટેન શ્યામા દુઃખતરાં દશામ્ ॥ ૩૦॥

લઙ્કેશસ્ય ગૃહે શ્યામા કથં દુઃખં ભવિષ્યતિ ।
પતિવ્રતા સુશીલા ચ મયિ પ્રીતિયુતા ભૃશમ્ ॥ ૩૧॥

ન ચ લક્ષ્મણ વૈદેહી સા તસ્ય વશગા ભવેત્ ।
સ્વૈરિણીવ વરારોહા કથં સ્યાજ્જનકાત્મજા ॥ ૩૨॥

ત્યજેત્પ્રાણાન્નિયન્તૃત્વે મૈથિલી ભરતાનુજ ।
ન રાવણસ્ય વશગા ભવેદિતિ સુનિશ્ચિતમ્ ॥ ૩૩॥

મૃતા ચેજ્જાનકી વીર પ્રાણાંસ્ત્યક્ષ્યામ્યસંશયમ્ ।
મૃતા ચેદસિતાપાઙ્ગીં કિં મે દેહેન લક્ષ્મણ ॥ ૩૪॥

એવં વિલપમાનં તં રામં કમલલોચનમ્ ।
લક્ષ્મણઃ પ્રાહ ધર્માત્મા સાન્ત્વયન્નૃતયા ગિરા ॥ ૩૫॥

ધૈર્યં કુરુ મહાબાહો ત્યક્ત્વા કાતરતામિહ ।
આનયિષ્યામિ વૈદેહીં હત્વા તં રાક્ષસાધમમ્ ॥ ૩૬॥

આપદિ સમ્પદિ તુલ્યા ધૈર્યાદ્ભવન્તિ તે ધીરાઃ ।
અલ્પધિયસ્તુ નિમગ્નાઃ કષ્ટે ભવન્તિ વિભવેઽપિ ॥ ૩૭॥

સંયોગો વિપ્રયોગશ્ચ દૈવાધીનાવુભાવપિ ।
શોકસ્તુ કીદૃશસ્તત્ર દેહેનાત્મનિ ચ ક્વચિત્ ॥ ૩૮॥

રાજ્યાદ્યથા વને વાસો વૈદેહ્યા હરણં યથા ।
તથા કાલે સમીચીને સંયોગોઽપિ ભવિષ્યતિ ॥ ૩૯॥

પ્રાપ્તવ્યં સુખદુઃખાનાં ભોગાન્નિર્વર્તનં ક્વચિત્ ।
નાન્યથા જાનકીજાને તસ્માચ્છોકં ત્યજાધુના ॥ ૪૦॥

વાનરાઃ સન્તિ ભૂયાંસો ગમિષ્યન્તિ ચતુર્દિશમ્ ।
શુદ્ધિં જનકનન્દિન્યા આનયિષ્યન્તિ તે કિલ ॥ ૪૧॥

જ્ઞાત્વા માર્ગસ્થિતિં તત્ર ગત્વા કૃત્વા પરાક્રમમ્ ।
હત્વા તં પાપકર્માણમાનયિષ્યામિ મૈથિલીમ્ ॥ ૪૨॥

સસૈન્યં ભરતં વાઽપિ સમાહૂય સહાનુજમ્ ।
હનિષ્યામો વયં શત્રું કિં શોચસિ વૃથાગ્રજ ॥ ૪૩॥

રઘુણૈકરથેનૈવ જિતાઃ સર્વા દિશઃ પુરા ।
તદ્વંશજઃ કથં શોકં કર્તુમર્હસિ રાઘવ ॥ ૪૪॥

એકોઽહં સકલાઞ્જેતું સમર્થોઽસ્મિ સુરાસુરાન્ ।
કિં પુનઃ સસહાયો વૈ રાવણં કુલપાંસનમ્ ॥ ૪૫॥

જનકં વા સમાનીય સાહાય્યે રઘુનન્દન ।
હનિષ્યામિ દુરાચારં રાવણં સુરકણ્ટકમ્ ॥ ૪૬॥

સુખસ્યાનન્તરં દુઃખં દુઃખસ્યાનન્તરં સુખમ્ ।
ચક્રનેમિરિવૈકં યન્ન ભવેદ્રઘુનન્દન ॥ ૪૭॥

મનોઽતિકાતરં યસ્ય સુખદુઃખસમુદ્ભવે ।
સ શોકસાગરે મગ્નો ન સુખી સ્યાત્કદાચન ॥ ૪૮॥

ઇન્દ્રેણ વ્યસનં પ્રાપ્તં પુરા વૈ રઘુનન્દન ।
નહુષઃ સ્થાપિતો દેવૈઃ સર્વૈર્મઘવતઃ પદે ॥ ૪૯॥

સ્થિતઃ પઙ્કજમધ્યે ચ બહુવર્ષગણાનપિ ।
અજ્ઞાતવાસં મઘવા ભીતસ્ત્યક્ત્વા નિજં પદમ્ ॥ ૫૦॥

પુનઃ પ્રાપ્તં નિજસ્થાનં કાલે વિપરિવર્તિતે ।
નહુષઃ પતિતો ભૂમૌ શાપાદજગરાકૃતિઃ ॥ ૫૧॥

ઇન્દ્રાણીં કામયાનસ્તુ બ્રાહ્મણાનવમન્ય ચ ।
અગસ્તિકોપાત્સઞ્જાતઃ સર્પદેહો મહીપતિઃ ॥ ૫૨॥

તસ્માચ્છોકો ન કર્તવ્યો વ્યસને સતિ રાઘવ ।
ઉદ્યમે ચિત્તમાસ્થાય સ્થાતવ્યં વૈ વિપશ્ચિતા ॥ ૫૩॥

સર્વજ્ઞોઽસિ મહાભાગ સમર્થોઽસિ જગત્પતે ।
કિં પ્રાકૃત ઇવાત્યર્થં કુરુષે શોકમાત્મનિ ॥ ૫૪॥

વ્યાસ ઉવાચ ।
ઇતિ લક્ષ્મણવાક્યેન બોધિતો રઘુનન્દનઃ ।
ત્યક્ત્વા શોકં તથાત્યર્થં બભૂવ વિગતજ્વરઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં તૃતીયસ્કન્ધે
લક્ષ્મણકૃતરામશોકસાન્ત્વનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૩.૨૯॥

## ૩.૩૦ ત્રિંશોઽધ્યાયઃ । રામાય દેવીવરદાનમ્ ।

વ્યાસ ઉવાચ ।
એવં તૌ સંવિદં કૃત્વા યાવત્તૂષ્ણીં બભૂવતુઃ ।
આજગામ તદાઽઽકાશાન્નારદો ભગવાનૃષિઃ ॥ ૧॥

રણયન્મહતીં વીણાં સ્વરગ્રામવિભૂષિતામ્ ।
ગાયન્બૃહદ્રથં સામ તદા તમુપતસ્થિવાન્ ॥ ૨॥

દૃષ્ટ્વા તં રામ ઉત્થાય દદાવથ વૃષં શુભમ્ ।
આસનં ચાર્ઘ્યપાદ્યઞ્ચ કૃતવાનમિતદ્યુતિઃ ॥ ૩॥

પૂજાં પરમિકાં કૃત્વા કૃતાઞ્જલિરુપસ્થિતઃ ।
ઉપવિષ્ટઃ સમીપે તુ કૃતાજ્ઞો મુનિના હરિઃ ॥ ૪॥

ઉપવિષ્ટં તદા રામં સાનુજં દુઃખમાનસમ્ ।
પપ્રચ્છ નારદઃ પ્રીત્યા કુશલં મુનિસત્તમઃ ॥ ૫॥

કથં રાઘવ શોકાર્તો યથા વૈ પ્રાકૃતો નરઃ ।
હૃતાં સીતાં ચ જાનામિ રાવણેન દુરાત્મના ॥ ૬॥

સુરસદ્મગતશ્ચાહં શ્રુતવાઞ્જનકાત્મજામ્ ।

પૌલસ્ત્યેન હૃતાં મોહાન્મરણં સ્વમજાનતા ॥ ૭॥

તવ જન્મ ચ કાકુત્સ્થ પૌલસ્ત્યનિધનાય વૈ ।
મૈથિલીહરણં જાતમેતદર્થં નરાધિપ ॥ ૮॥

પૂર્વજન્મનિ વૈદેહી મુનિપુત્રી તપસ્વિની ।
રાવણેન વને દૃષ્ટા તપસ્યન્તી શુચિસ્મિતા ॥ ૯॥

પ્રાર્થિતા રાવણેનાસૌ ભવ ભાર્યેતિ રાઘવ ।
તિરસ્કૃતસ્તયાઽસૌ વૈ જગ્રાહ કબરં બલાત્ ॥ ૧૦॥

શશાપ તત્ક્ષણં રામ રાવણં તાપસી ભૃશમ્ ।
કુપિતા ત્યક્તુમિચ્છન્તી દેહં સંસ્પર્શદૂષિતમ્ ॥ ૧૧॥

દુરાત્મંસ્તવ નાશાર્થં ભવિષ્યામિ ધરાતલે ।
અયોનિજા વરા નારી ત્યક્ત્વા દેહં જહાવપિ ॥ ૧૨॥

સેયં રમાંશસમ્ભૂતા ગૃહીતા તેન રક્ષસા ।
વિનાશાર્થં કુલસ્યૈવ વ્યાલી સ્રગિવ સમ્ભ્રમાત્ ॥ ૧૩॥

તવ જન્મ ચ કાકુત્સ્થ તસ્ય નાશાય ચામરૈઃ ।
પ્રાર્થિતસ્ય હરેરંશાદજવંશેઽપ્યજન્મનઃ ॥ ૧૪॥

કુરુ ધૈર્યં મહાબાહો તત્ર સા વર્તતેઽવશા ।
સતી ધર્મરતા સીતા ત્વાં ધ્યાયન્તી દિવાનિશમ્ ॥ ૧૫॥

કામધેનુપયઃ પાત્રે કૃત્વા મઘવતા સ્વયમ્ ।
પાનાર્થં પ્રેષિતં તસ્યાઃ પીતં ચૈવામૃતં યથા ॥ ૧૬॥

સુરભીદુગ્ધપાનાત્સા ક્ષુત્તૃડ્દુઃખવિવર્જિતા ।
જાતા કમલપત્રાક્ષી વર્તતે વીક્ષિતા મયા ॥ ૧૭॥

ઉપાયં કથયામ્યદ્ય તસ્ય નાશાય રાઘવ ।
વ્રતં કુરુષ્વ શ્રદ્ધાવાનાશ્વિને માસિ સામ્પ્રતમ્ ॥ ૧૮॥

નવરાત્રોપવાસઞ્ચ ભગવત્યાઃ પ્રપૂજનમ્ ।
સર્વસિદ્ધિકરં રામ જપહોમવિધાનતઃ ॥ ૧૯॥

મેધ્યૈશ્ચ પશુભિર્દેવ્યા બલિં દત્ત્વા વિશંસિતૈઃ ।
દશાંશં હવનં કૃત્વા સશક્તસ્ત્વં ભવિષ્યસિ ॥ ૨૦॥

વિષ્ણુના ચરિતં પૂર્વં મહાદેવેન બ્રહ્મણા ।
તથા મઘવતા ચીર્ણં સ્વર્ગમધ્યસ્થિતેન વૈ ॥ ૨૧॥

સુખિના રામ કર્તવ્યં નવરાત્રવ્રતં શુભમ્ ।
વિશેષેણ ચ કર્તવ્યં પુંસા કષ્ટગતેન વૈ ॥ ૨૨॥

વિશ્વામિત્રેણ કાકુત્સ્થ કૃતમેતન્ન સંશયઃ ।
ભૃગુણાઽથ વસિષ્ઠેન કશ્યપેન તથૈવ ચ ॥ ૨૩॥

ગુરુણા હૃતદારેણ કૃતમેતન્મહાવ્રતમ્ ।
તસ્માત્ત્વં કુરુ રાજેન્દ્ર રાવણસ્ય વધાય ચ ॥ ૨૪॥

ઇન્દ્રેણ વૃત્રનાશાય કૃતં વ્રતમનુત્તમમ્ ।
ત્રિપુરસ્ય વિનાશાય શિવેનાપિ પુરા કૃતમ્ ॥ ૨૫॥

હરિણા મધુનાશાય કૃતં મેરૌ મહામતે ।
વિધિવત્કુરુ કાકુત્સ્થ વ્રતમેતદતન્દ્રિતઃ ॥ ૨૬॥

શ્રીરામ ઉવાચ ।
કા દેવી કિં પ્રભાવા સા કુતો જાતા કિમાહ્વયા ।
વ્રતં કિં વિધિવદ્બ્રૂહિ સર્વજ્ઞોઽસિ દયાનિધે ॥ ૨૭॥

નારદ ઉવાચ ।
શ‍ૃણુ રામ સદા નિત્યા શક્તિરાદ્યા સનાતની ।
સર્વકામપ્રદા દેવી પૂજિતા દુઃખનાશિની ॥ ૨૮॥

કારણં સર્વજન્તૂનાં બ્રહ્માદીનાં રઘૂદ્વહ ।
તસ્યાઃ શક્તિં વિના કોઽપિ સ્પન્દિતું ન ક્ષમો ભવેત્ ॥ ૨૯॥

વિષ્ણોઃ પાલનશક્તિઃ સા કર્તૃશક્તિઃ પિતુર્મમ ।
રુદ્રસ્ય નાશશક્તિઃ સા ત્વન્યાશક્તિઃ પરા શિવા ॥ ૩૦॥

યચ્ચ કિઞ્ચિત્ક્વચિદ્વસ્તુ સદસદ્ભુવનત્રયે ।
તસ્ય સર્વસ્ય યા શક્તિસ્તદુત્પત્તિઃ કુતો ભવેત્ ॥ ૩૧॥

ન બ્રહ્મા ન યદા વિષ્ણુર્ન રુદ્રો ન દિવાકરઃ ।
ન ચેન્દ્રાદ્યાઃ સુરાઃ સર્વે ન ધરા ન ધરાધરાઃ ॥ ૩૨॥

તદા સા પ્રકૃતિઃ પૂર્ણા પુરુષેણ પરેણ વૈ ।
સંયુતા વિહરત્યેવ યુગાદૌ નિર્ગુણા શિવા ॥ ૩૩॥

સા ભૂત્વા સગુણા પશ્ચાત્કરોતિ ભુવનત્રયમ્ ।
પૂર્વં સંસૃજ્ય બ્રહ્માદીન્દત્ત્વા શક્તીશ્ચ સર્વશઃ ॥ ૩૪॥

તાં જ્ઞાત્વા મુચ્યતે જન્તુર્જન્મસંસારબન્ધનાત્ ।
સા વિદ્યા પરમા જ્ઞેયા વેદાદ્યા વેદકારિણી ॥ ૩૫॥

અસઙ્ખ્યાતાનિ નામાનિ તસ્યા બ્રહ્માદિભિઃ કિલ ।
ગુણકર્મવિધાનૈસ્તુ કલ્પિતાનિ ચ કિં બ્રુવે ॥ ૩૬॥

અકારાદિક્ષકારાન્તૈઃ સ્વરૈર્વર્ણૈસ્તુ યોજિતૈઃ ।
અસઙ્ખ્યેયાનિ નામાનિ ભવન્તિ રઘુનન્દન ॥ ૩૭॥

રામ ઉવાચ ।
વિધિં મે બ્રૂહિ વિપ્રર્ષે વ્રતસ્યાસ્ય સમાસતઃ ।
કરોમ્યદ્યૈવ શ્રદ્ધાવાઞ્છ્રીદેવ્યાઃ પૂજનં તથા ॥ ૩૮॥

નારદ ઉવાચ ।
પીઠં કૃત્વા સમે સ્થાને સંસ્થાપ્ય જગદમ્બિકામ્ ।
ઉપવાસાન્નવૈવ ત્વં કુરુ રામ વિધાનતઃ ॥ ૩૯॥

આચાર્યોઽહં ભવિષ્યામિ કર્મણ્યસ્મિન્મહીપતે ।
દેવકાર્યવિધાનાર્થમુત્સાહં પ્રકરોમ્યહમ્ ॥ ૪૦॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં સત્યં મત્વા રામઃ પ્રતાપવાન્ ।
કારયિત્વા શુભં પીઠં સ્થાપયિત્વામ્બિકાં શિવામ્ ॥ ૪૧॥

વિધિવત્પૂજનં તસ્યાશ્ચકાર વ્રતવાન્ હરિઃ ।
સમ્પ્રાપ્તે ચાશ્વિને માસિ તસ્મિન્ગિરિવરે તદા ॥ ૪૨॥

ઉપવાસપરો રામઃ કૃતવાન્વ્રતમુત્તમમ્ ।
હોમઞ્ચ વિધિવત્તત્ર બલિદાનઞ્ચ પૂજનમ્ ॥ ૪૩॥

ભ્રાતરૌ ચક્રતુઃ પ્રેમ્ણા વ્રતં નારદસમ્મતમ્ ।
અષ્ટમ્યાં મધ્યરાત્રે તુ દેવી ભગવતી હિ સા ॥ ૪૪॥

સિંહારૂઢા દદૌ તત્ર દર્શનં પ્રતિપૂજિતા ।
ગિરિશ‍ૃઙ્ગે સ્થિતોવાચ રાઘવં સાનુજં ગિરા ॥ ૪૫॥

મેઘગમ્ભીરયા ચેદં ભક્તિભાવેન તોષિતા ।

દેવ્યુવાચ ।
રામ રામ મહાબાહો તુષ્ટાઽસ્મ્યદ્ય વ્રતેન તે ॥ ૪૬॥

પ્રાર્થયસ્વ વરં કામં યત્તે મનસિ વર્તતે ।
નારાયણાંશસમ્ભૂતસ્ત્વં વંશે માનવેઽનઘે ॥ ૪૭॥

રાવણસ્ય વધાયૈવ પ્રાર્થિતસ્ત્વમરૈરસિ ।
પુરા મત્સ્યતનું કૃત્વા હત્વા ઘોરઞ્ચ રાક્ષસમ્ ॥ ૪૮॥

ત્વયા વૈ રક્ષિતા વેદાઃ સુરાણાં હિતમિચ્છતા ।
ભૂત્વા કચ્છપરૂપસ્તુ ધૃતવાન્મન્દરં ગિરિમ્ ॥ ૪૯॥

અકૂપારં પ્રમન્થાનં કૃત્વા દેવાનપોષયઃ ।
કોલરૂપં પરં કૃત્વા દશનાગ્રેણ મેદિનીમ્ ॥ ૫૦॥

ધૃતવાનસિ યદ્રામ હિરણ્યાક્ષં જઘાન ચ ।
નારસિંહીં તનું કૃત્વા હિરણ્યકશિપું પુરા ॥ ૫૧॥

પ્રહ્લાદં રામ રક્ષિત્વા હતવાનસિ રાઘવ ।
વામનં વપુરાસ્થાય પુરા છલિતવાન્બલિમ્ ॥ ૫૨॥

ભૂત્વેન્દ્રસ્યાનુજઃ કામં દેવકાર્યપ્રસાધકઃ ।
જમદગ્નિસુતસ્ત્વં મે વિષ્ણોરંશેન સઙ્ગતઃ ॥ ૫૩॥

કૃત્વાન્તં ક્ષત્રિયાણાં તુ દાનં ભૂમેરદાદ્દ્વિજે ।
તથેદાનીં તુ કાકુત્સ્થ જાતો દશરથાત્મજ ॥ ૫૪॥

પ્રાર્થિતસ્તુ સુરૈઃ સર્વૈ રાવણેનાતિપીડિતૈઃ ।
કપયસ્તે સહાયા વૈ દેવાંશા બલવત્તરાઃ ॥ ૫૫॥

ભવિષ્યન્તિ નરવ્યાઘ્ર મચ્છક્તિસંયુતા હ્યમી ।
શેષાંશોઽપ્યનુજસ્તેઽયં રાવણાત્મજનાશકઃ ॥ ૫૬॥

ભવિષ્યતિ ન સન્દેહઃ કર્તવ્યોઽત્ર ત્વયાઽનઘ ।
વસન્તે સેવનં કાર્યં ત્વયા તત્રાતિશ્રદ્ધયા ॥ ૫૭॥

હત્વાઽથ રાવણં પાપં કુરુ રાજ્યં યથાસુખમ્ ।
એકાદશ સહસ્રાણિ વર્ષાણિ પૃથિવીતલે ॥ ૫૮॥

કૃત્વા રાજ્યં રઘુશ્રેષ્ઠ ગન્તાઽસિ ત્રિદિવં પુનઃ ।
વ્યાસ ઉવાચ ।

ઇત્યુક્ત્વાન્તર્દધે દેવી રામસ્તુ પ્રીતમાનસઃ ॥ ૫૯॥

સમાપ્ય તદ્વ્રતં ચક્રે પ્રયાણં દશમીદિને ।
વિજયાપૂજનં કૃત્વા દત્ત્વા દાનાન્યનેકશઃ ॥ ૬૦॥

કપિપતિબલયુક્તઃ સાનુજઃ શ્રીપતિશ્ચ
પ્રકટપરમશક્ત્યા પ્રેરિતઃ પૂર્ણકામઃ ।
ઉદધિતટગતોઽસૌ સેતુબન્ધં વિધાયા-
પ્યહનદમરશત્રું રાવણં ગીતકીર્તિઃ ॥ ૬૧॥

યઃ શ‍ૃણોતિ નરો ભક્ત્યા દેવ્યાશ્ચરિતમુત્તમમ્ ।
સ ભુક્ત્વા વિપુલાન્ભોગાન્પ્રાપ્નોતિ પરમં પદમ્ ॥ ૬૨॥

સન્ત્યન્યાનિ પુરાણાનિ વિસ્તરાણિ બહૂનિ ચ ।
શ્રીમદ્ભાગવતસ્યાસ્ય ન તુલ્યાનીતિ મે મતિઃ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
તૃતીયસ્કન્ધે રામાય દેવીવરદાનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૩.૩૦॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે તૃતીયસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*3 Shrimaddevibhagavatamahapurane Tritiyah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*